॥६०॥ श्रीवीतरागाय नमः ॥ मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृतां ज्ञातारं विश्वतत्त्वानां वंदे तद्गुणलब्धये १ क
श्चिद्भव्यः प्रत्यासन्ननिष्ठः प्रज्ञावान् स्वहितमुपलिप्सुर्विविक्ते परमरम्ये भव्यसत्त्वविश्रामास्पदे क्वचिदाश्रमपदे
मुनिपरिषन्मध्ये संनिषण्णं मूर्त्तमिव मोक्षमार्गमवाग्विसर्गं वपुषा निरूपयंतं युक्त्यागमकुशलं परहितप्रति
पादनैककार्यमार्यनिषेव्यं निर्ग्रंथाचार्यवर्यमुपसद्य सविनयं परिपृच्छति स्म भगवन् किं खलु आत्मनो हितं
स्यादिति स आह मोक्ष इति स एव पुनः प्रत्याह किंस्वरूपोसौ मोक्षः कश्चास्य प्राप्त्युपाय इति आचार्य आह नि
रवशेषनिराकृतकर्ममलकलंकस्याशरीरस्यात्मनोचिंत्यस्वाभाविकज्ञानादिगुणमव्याबाधसुखमात्यंतिक
मवस्थांतरं मोक्षः तस्यात्यंतपरोक्षत्वात् छद्मस्थाः प्रवादिनस्तीर्थकरंमन्यास्तस्य स्वरूपमसंस्पृशंतीभिर्वा
ग्भिर्युक्त्याभासनिबंधनाभिः अन्यथैव परिकल्पयंति चैतन्यं पुरुषस्य स्वरूपमिति तच्च ज्ञेयाकारपरिच्छेदपरां १
ङ्मुखं तत्सदप्यसदेव निराकारत्वात् खरविषाणवत् बुद्ध्यादिवैशेषिकगुणोच्छेदः पुरुषस्य मोक्ष इति तदपि प

स्व २

१ तहते ए रिकल्पनमसदेव विशेषशून्यस्यावस्तुत्वात् प्रदीपनिर्वाणकल्पमात्मनिर्वाणमिति च तस्य खरविषाणकल्प
नातैरेवाहत्य निरूपितं त्येवमादि तत्स्वरूपमनवद्यमुत्तरत्र वक्ष्यामः तत्प्राप्त्युपायं प्रत्यपि ते विसंवदंते ज्ञाना वादिनो
देव चारित्रनिरपेक्षात्तत्प्राप्तिः श्रद्धानमात्रादेव वा ज्ञाननिरपेक्षाच्चारित्रमात्रादेवेति च व्याधिनिवृत्तस्य तद्वि
निवृत्त्युपायमभूतभेषजविषयव्यस्तज्ञानादिसाधनत्वाभाववत् एवं व्यस्तज्ञानादिर्मोक्षप्राप्त्युपायो न भ
वति किं तर्हि तत्त्रितयं समुदितमित्याह सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः १ सम्यगित्यव्युत्पन्नशब्दः
व्युत्पन्नो वा अंचतेः क्वौ समंचतीति सम्यगिति कोस्यार्थः प्रशंसा स प्रत्येकं परिसमाप्यते सम्यग्दर्शनं सम्यक्ज्ञानं
सम्यक्चारित्रमिति एतेषां स्वरूपं लक्षणतो विधानतश्च पुरस्ताद्विस्तरेण निर्देक्ष्यामः उद्देशमात्रं त्विदमुच्यते
भावानां याथात्म्यप्रतिपत्तिविषयश्रद्धानसंग्रहार्थं दर्शनस्य सम्यग्विशेषणं संसारकारणनिवृत्तिं प्रत्यागू २ आरूढस्य =
र्णस्य ज्ञानवतः कर्मादाननिमित्तक्रियोपरमः सम्यक्चारित्रं अज्ञानपूर्वकाचरणनिवृत्त्यर्थं सम्यग्विशेषणं

येन येन प्रकारेण जीवादयः पदार्थाः व्यवस्थिताः तेन तेनावगमः सम्यग्ज्ञानं
मोहसंशयविपर्ययनिवृत्त्यर्थं सम्यग्विशेषणं

यस्मादितिपश्यति दृश्यते ऽनेनेतिदृष्टिमात्रंवादर्शनं जानातिज्ञायतेऽनेनेतिज्ञातिमात्रंवाज्ञानंचरति
चर्यतेवाऽनेनेतिचरणमात्रं वाचारित्रं नत्वेवंसएवकर्त्तासएवकरणमित्यायातंतच्च विरुद्धं सत्यं
स्वपरिणामपरिणामिनोर्भेदविवक्षायां तथाभिधानात् ०ऽ यथाअग्निर्दहतिइंधनंदाहपरिण
मेनउक्तः ॥ कर्त्रादिसाधनभावःपर्यायपर्यायिणो रेकत्वानेकत्वंप्रत्यनेकांतोपपत्तौस्वातंत्र्यपारतंत्र्य
पर्यायि विवक्षोपपत्ते रेकस्मि नप्यर्थेनविरुध्यते ॥ अग्नौदहनादिक्रियायाः कर्त्रादिसाधनभाव
वत ॥ ज्ञानग्रहणमादौन्याय्यंदर्शनस्यतत्पूर्वकत्वात ॥ अल्पाक्षरत्वाच्च ॥ नैतद्युक्तंयुगपदुत्प
त्तेः ॥ यदास्यदर्शनमोहस्योपशमात्क्षयात् क्षयोपशमाद्वाआत्मासम्यग्दर्शनपर्यायेणाविर्भव २

ति तदैवतस्यमत्यज्ञानश्रुताज्ञाननिवृत्तिपूर्वकं मतिज्ञानंश्रुतज्ञानंचाविर्भवति घनपटलविगमे
सवितुःप्रतापप्रकाशाभिव्यक्तिवत् अल्पाच्तरादभ्यर्हितंपूर्वंनिपतति कथमभ्यर्हितत्वं ज्ञानस्यसम्य
ग्व्यपदेशहेतुत्वात् चारित्रात्पूर्वंज्ञानंप्रयुक्तंतत्पूर्वकत्वाच्चारित्रस्यसर्वकर्मविप्रमोक्षोमोक्षः त
त्प्राप्त्युपायोमार्गः मार्गइतिचैकवचननिर्देशः समस्तमार्गभावज्ञापनार्थः तेनव्यस्तस्यमार्गत्वनि
वृत्तिःकृताभवति अतःसम्यग्दर्शनंसम्यग्ज्ञानंसम्यक्चारित्रमित्येतत्त्रितयंसमुदितंमोक्षस्यसाक्षा
न्मार्गोवेदितव्यः तत्रादावुद्दिष्टस्यसम्यग्दर्शनस्यलक्षणनिर्देशार्थमिदमुच्यते ॥ श्री ॥ तत्वार्थश्रद्धा
नंसम्यग्दर्शनं ॥ तत्वशब्दोभावसामान्यवाची कथंतदितिसर्वनामपदं सर्वनामचसामान्येवर्त्ततेतस्य
भावस्तत्वं तस्यकस्ययोऽर्थोयथावस्थितः तथातस्यभवनमित्यर्थः अर्यतइत्यर्थो निश्चीयतेइत्यर्थः
तत्वेनार्थः तत्वार्थः अथवाभावेनभाववतोऽभिधानंतदव्यतिरेकात् तत्वमेवार्थस्तत्वार्थः तत्वार्थस्यश्र
वे

२ द्धानं सम्यग्दर्शनं प्रत्येतव्यं । तत्वार्थश्च वक्ष्यमाणो जीवादिः । दृशेरालोकार्थत्वात् श्रद्धानार्थगतिर्नोपपद्य
ते धातूनामनेकार्थत्वाददोषः प्रसिद्धार्थत्यागः कुत इति चेन्मोक्षमार्गप्रकरणात् तत्वार्थश्रद्धानं
हि आत्मपरिणामो मोक्षसाधनं युज्यते भव्यजीवविषयत्वात् आलोकस्तु चक्षुरादिनिमित्तः सर्वसंसा
रिजीवसाधारणत्वान्न मोक्षमार्गो युक्तः । अर्थश्रद्धानमिति चेत्सर्वार्थप्रसंगः । तत्वश्रद्धानमिति चेद्भाव प्रत्य०
मात्रप्रसंगः सत्ताद्रव्यत्वगुणत्वकर्मत्वादि । तत्वमिति कैश्चित्कल्प्यत इति । तत्वमेकत्वमिति वा सर्वैक्य
ग्रहणप्रसंगः पुरुष एवेदं सर्वमित्यादि कैश्चित्कल्प्यत इति तस्मादव्यभिचारार्थमुभयोरुपादानं । तत्
द्विविधं सरागवीतरागविषयभेदात् प्रशमसंवेगानुकंपास्तिक्याद्यभिव्यक्तिलक्षणं प्रथमं । आत्म
विशुद्धिमात्रमितरत् । अथैतत्सम्यग्दर्शनं जीवादिपदार्थविषयं तत्कथमुत्पद्यत इत्यत आह ॥ आ
तन्निसर्गादधिगमाद्वा ॥ निसर्गः स्वभाव इत्यर्थः । अधिगमोऽर्थावबोधः । तयोः हेतुत्वेन निर्देशः । कस्याः क्रि ३
ग

यायाः का च क्रिया उत्पद्यत इत्यध्याक्रियते सोपस्कारत्वात्सूत्राणां तदेतत्सम्यग्दर्शनं निसर्गादधिगमा
द्वोत्पद्यत इति । अत्राह निसर्गजे सम्यग्दर्शने अर्थाधिगमः स्याद्वा न वा यद्यस्ति तदपि अधिगमजमेव ना
र्थांतरं । अथ नास्ति कथमनवबुद्धतत्वस्यार्थश्रद्धानमिति नैष दोषः । उभयत्र सम्यग्दर्शने अंतरंगो
हेतुस्तुल्यः दर्शनमोहस्योपशमः । क्षयः । क्षयोपशमो वा तस्मिन्सति यद्बाह्योपदेशादृते प्रादुर्भवति तन्नै
सर्गिकं । यत्परोपदेशपूर्वकं जीवाद्यधिगमनिमित्तं । तदुत्तरमित्यनयोरयं भेदः । तद्ग्रहणं किमर्थं अनं
तरनिर्देशार्थं । अनंतरं सम्यग्दर्शनं तदित्यनेन निर्दिश्यते । इतरथा हि मोक्षमार्गोपि प्रकृतः । तस्याभि
संबंधः स्यात् । ननु च अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति अनंतरस्य सम्यग्दर्शनस्य ग्रहणं सिद्धं ५
प्रत्यासत्तेः प्रधानं बलीय इति मोक्षमार्ग एव संबध्येत । तस्मात्तद्वचनं क्रियते । तत्वार्थश्रद्धानं सम्यग्द
र्शनमित्युक्तं अथ किं तत्वमित्यत इदमाह ॥ जीवाजीवाश्रवबंधसंवरनिर्जरामोक्षास्तत्वं ॥ तत्र चे

४ तनालक्षणोजीवः साचज्ञानादिभेदादनेकधाभिद्यते तद्विपर्ययलक्षणोऽजीवः शुभाशुभकर्म्मागमद्वा
रुरूपआश्रवः आत्मकर्म्मणोरन्योन्यप्रदेशानुप्रवेशात्मकोबंधः आश्रवनिरोधलक्षणः संवरः एकदेश
कर्म्मसंक्षयलक्षणानिर्ज्जरा कृत्स्नकर्म्मवियोगलक्षणोमोक्षः एषांप्रपंचउत्तरत्रवक्ष्यते सर्वस्यफल
स्यात्माधीनत्वात् आदौजीवग्रहणंतदुपकारार्थत्वात् तदनंतरमजीवाभिधानं तदुभयविषयत्वात्तद
तरं+ नंतरमाश्रवग्रहणं तत्पूर्वकत्वात्तदनंतरंबंधाभिधानंसंवृत्तस्यबंधाभावात् तत्प्रत्यनीकप्रतिपत्त्यर्थंसंवर
वचनं संवरेसतिनिर्ज्जरोपपत्तेस्तदंतिकेनिर्ज्जरावचनं अंतेप्राप्यत्वात्मोक्षस्यांतेवचनं इहपुण्यपा
पग्रहणं कर्त्तव्यं नवपदार्थाइत्यन्यैरप्युक्तत्वात् नकर्त्तव्यं आश्रवेबंधेचांतर्भावात् यद्येवमाश्रवा
दिग्रहणमनर्थकंजीवाजीवयोरंतर्भावात् नानर्थकमिहमोक्षःप्रकृतः सोवश्यंनिर्देष्टव्यः सचसंसा
रपूर्वकः संसारस्यप्रधानहेतुराश्रवोबंधश्चमोक्षस्यप्रधानहेतु संवरोनिर्ज्जराच अतःप्रधानहेतु ५

हेतुमत्फलनिदर्शनार्थत्वात् पृथगुपदेशः कृतः दृश्यतेहिसामान्येऽन्तर्भूतस्यापिविशेषस्यपृथगुपा
दानंप्रयोजनार्थं क्षत्रियाआयाताः सूरवर्म्मापीति तत्त्वशब्दोभाववाचीत्युक्तः सकथंजीवादिभिर्द्रव्य
वचनैःसामानाधिकरण्यंप्रतिपद्यते अव्यतिरेकात्तद्भावाध्यारोपात् सामानाधिकरण्यंभवति यथा
उपयोगएवात्मेति यद्येवंतल्लिंगसंख्यानुवृत्तिः प्राप्नोति विशेषणविशेष्यसंबंधेसत्यपिशब्दशक्तिव्य
पेक्षयाउपात्तलिंगसंख्याव्यतिक्रमोनभवति अयंक्रमः आदिसूत्रेपियोज्यः एवमेषामुद्दिष्टानांसम्य
ग्दर्शनादीनांजीवादीनांचसंव्यवहारविशेषव्यभिचारनिवृत्त्यर्थमाह ॥श्री॥ नामस्थापनाद्रव्यभावतस्त
न्न्यासः ॥ अतद्गुणेवस्तुनिसंव्यवहारार्थंपुरुषकारान्नियुज्यमानंसंज्ञाकर्म्मनामकाष्ठपुस्तचित्रविव
क्षितप्रदेशेस्थापनंकर्म्माक्षनिक्षेपादिषुसोयमितिस्थाप्यमानास्थापनागुणैर्द्रोष्यतेगुणान्द्रोष्यतीति
वाद्रव्यंवर्त्तमानतत्पर्यायोपलक्षितंद्रव्यंभावः तद्यथानामजीवःस्थापनाजीवोद्रव्यजीवोभावजीवइतिच

कस्य

तुर्द्धाजीवशब्दार्थो न्यस्यते । जीवनगुणमनपेक्ष्य यस्य चिन्नाम क्रियमाणं नामजीवः । अक्षनिक्षेपादिषु जीव
इति वा मनुष्यजीव इति वा व्यवस्थाप्यमानः स्थापनाजीवः । द्रव्यजीवो द्विविधः आगमद्रव्यजीवः नोआग
मद्रव्यजीवश्चेति तत्र जीवप्राभृतज्ञायी मनुष्यजीवप्राभृतज्ञायी वा अनुपयुक्तः आत्मा आगमद्रव्यजी
वः नोआगमद्रव्यजीवः त्रेधा व्यवतिष्ठते ज्ञायकशरीरभावितद्व्यतिरिक्तभेदात् । तत्र ज्ञातुर्यच्छरीरं त्रि
त्रिकालगोचरं तत् ज्ञायकशरीरं सामान्यापेक्षया नोआगमभाविजीवो नास्ति जीवनसामान्यस्य सदा
पि विद्यमानत्वात् । विशेषापेक्षया त्वस्ति गत्यंतरे जीवो व्यवस्थितः मनुष्यभवप्राप्तिं प्रत्यभिमुखः मनु
ष्यभावी जीवः तद्व्यतिरिक्तः कर्मनोकर्मविकल्पः भावजीवो द्विविधः आगमभावजीवो नोआगम
भावजीवश्चेति । तत्र जीवप्राभृतविषयोपयोगाविष्टः मनुष्यजीवप्राभृतविषयोपयोगयुक्तो वा आत्मा आ
गमभावजीवः । जीवनपर्यायेण मनुष्यजीवत्वपर्यायेण वा समाविष्टः आत्मा नोआगमभावजीवः । एव

DR. BHAU DAJI MEMORIAL

५

मितरेषामपि पदार्थानां अजीवादीनां नामादिनिक्षेपविधिर्नियोज्यः । स किमर्थः । अप्रकृतनिराकरणा
य प्रकृतनिरूपणाय च निक्षेपविधिना नामशब्दार्थः प्रस्तीर्यते । तच्छब्दग्रहणं किमर्थं । सर्वसंग्रहार्थं । अ
सति हि तत् शब्दे सम्यग्दर्शनादीनां प्रधानानामेव न्यासेनाभिसंबंधः स्यात् । तद्विषयभावेनोपगृहीता
नां जीवादीनां अप्रधानानां न स्यात् । तच्छब्दग्रहणे पुनः क्रियमाणे सति सामर्थ्यात् प्रधानानामप्रधा
नानां च ग्रहणं सिद्धं भवति । एवं नामादिभिः प्रस्तीर्णानामधिकृतानां तत्त्वाधिगमः कुतः इत्यत इदमुच्य
ते ॥ प्रमाणनयैरधिगमः ॥ नामादिनिक्षेपविधिनोपक्षिप्तानां जीवादीनां तत्त्वं प्रमाणाभ्यां नयैश्चा
धिगम्यते । प्रमाणनयावक्ष्यमाणलक्षणविकल्पाः । तत्र प्रमाणं द्विविधं । स्वार्थं परार्थं च तत्र स्वार्थं प्रमा
णं श्रुतवर्ज्यं श्रुतं पुनः स्वार्थं भवति परार्थं च । ज्ञानात्मकं स्वार्थं वचनात्मकं परार्थं तद्विकल्पा नयाः । अ
त्राह नयशब्दस्य अल्पाच्तरत्वात् पूर्वनिपातः प्राप्नोति । नैष दोषः अभ्यर्हितत्वात् प्रमाणस्य पूर्वनिपातः

DR. BHAU DAJI MEMORIAL

अभ्यर्हितत्वं च सर्वतो बलीयः॥ कुतोभ्यर्हितत्वं नयप्ररूपणप्रभवयोनित्वात् एवं ह्युक्तं प्रगृह्य प्रमाणतः प
रिणतिविशेषादर्थावधारणं नय इति॥ सकलविषयत्वाच्च प्रमाणस्य॥ तथा चोक्तं सकलादेशः प्रमाणाधी
नो विकलादेशो नयाधीन इति॥ नयो द्विधः द्रव्यार्थिकः पर्यायार्थिकश्च पर्यायार्थिकनयेन भावतत्त्वमा
धिगंतव्यमितरेषां त्रयाणां द्रव्यार्थिकनयेन सामान्यात्मकत्वात्॥ द्रव्यमर्थः प्रयोजनमस्येत्यसौ द्रव्यार्थिकः
पर्यायोऽर्थः प्रयोजनमस्येति असौ पर्यायार्थिकः॥ तत्सर्वं समुदितं प्रमाणेनाधिगंतव्यं॥ एवं प्रमाणनयैर
धिगतानां जीवादीनां पुनरप्यधिगमोपायांतरप्रदर्शनार्थमाह॥ निर्देशस्वामित्वसाधनाधिकरण
स्थितिविधानतः॥७॥ निर्देशः स्वरूपाभिधानं स्वामित्वमाधिपत्यं साधनमुत्पत्तिनिमित्तं अधिकरणमधि
ष्ठानं॥ स्थितिः कालपरिच्छेदः विधानं प्रकारः तत्र सम्यग्दर्शनं किमिति प्रश्ने तत्त्वार्थश्रद्धानमिति नि
र्देशः नामादिर्वा कस्येत्युक्ते सामान्येन जीवस्य॥ विशेषेण गत्यनुवादेन नरकगतौ सर्वासु पृथिवीषु ना

रकाणां पर्याप्तकानां औपशमिकं क्षायोपशमिकं चास्ति प्रथमायां पृथिव्यां पर्याप्तापर्याप्तकानां क्षायिकं क्षा
योपशमिकं चास्ति तिर्यग्गतौ तिरश्चां पर्याप्तकानां औपशमिकमस्ति क्षायिकं क्षायोपशमिकं च पर्याप्तकाप
र्याप्तकानामस्ति तिरश्चीनां क्षायिकं नास्ति औपशमिकं क्षायोपशमिकं च पर्याप्तिकानामेव नापर्याप्तिका
नां॥ एवं मनुष्यगतौ मनुष्याणां पर्याप्तापर्याप्तकानां क्षायिकं क्षायोपशमिकं चास्ति॥ औपशमिकं पर्या
प्तकानामेव कुतः इत्युक्ते मनुष्यः कर्मभूमिज एव दर्शनमोहक्षपणाप्रारंभको भवति क्षपणाप्रारंभका
लात्पूर्वं तिर्यक्षु बद्धायुष्कोपि उत्कृष्टभोगभूमितिर्यक्पुरुषेष्वेवोत्पद्यते न तिर्यक्स्त्रीषु नाववेदस्त्री
णां तासां क्षायिकासंभवात् एवं तिरश्चामपि अपर्याप्तकानां क्षायोपशमिकं ज्ञेयं च नापर्याप्तकानां मानु
षीणां त्रितयमप्यस्ति पर्याप्तिकानामेव नापर्याप्तिकानां क्षायिकं पुनर्भाववेदेनैव देवगतौ देवानां पर्याप्ताप
र्याप्तकानां त्रितयमप्यस्ति॥ औपशमिकं पर्याप्तकानां कथमिति चेत् चारित्रमोहोपशमेन सह मृता नू

७ प्रति भवनवासिव्यंतरजोतिष्काणांदेवानांदेवीनांचसौधर्मैशानकल्पवासिनीनांचक्षायिकंनास्ति तेषां
पर्याप्तकानांऊपशमिकंक्षायोपशमिकंचास्ति इंद्रियानुवादेनपंचेंद्रियाणांसंज्ञिनांत्रितयमप्यस्तिनेतरे
षां कायानुवादेन त्रसकायिकानांत्रितयमप्यस्तिनेतरेषां योगानुवादेन त्रयाणांयोगानांत्रितयमप्य
स्त्ययोगिनांक्षायिकमेव वेदानुवादेन त्रिवेदानांत्रितयमप्यस्ति अपगतवेदानांऊपशमिकंक्षायिकंचा
स्ति कषायानुवादेन चतुःकषायाणांत्रितयमप्यस्ति अकषायाणांऊपशमिकंक्षायिकंचास्ति ज्ञा
नानुवादेन अभिनिबोधकश्रुतावधिमनःपर्ययज्ञानिनांत्रितयमप्यस्तिकेवलज्ञानिनांक्षायिकमेव
संयमानुवादेन सामायिकछेदोपस्थापनसंयतानांत्रितयमप्यस्ति परिहारविशुद्धिसंयतानांऊपशमि
कंनास्ति इतरद्वितयमप्यस्तिसूक्ष्मसांपराययथाख्यातसंयतानांऊपशमिकंक्षायिकंचास्ति मिथ्याचा
द्रिअसंयतनांसंयतासंयतानांचत्रितयमप्यस्तिदर्शनानुवादेनचक्षुर्दर्शनाचक्षुर्दर्शनावधिदर्शनिनांत्रि ७

तयमप्यस्ति केवलदर्शनिनांक्षायिकमेव लेश्यानुवादेन षड्लेश्यानांत्रितयमप्यस्ति अलेश्यानांक्षायि
कमेव भव्यानुवादेन भव्यानांत्रितयमप्यस्तिनाभव्यानां सम्यक्त्वानुवादेन यत्रयत्सम्यग्दर्शनंतत्रतदेव
ज्ञेयं संज्ञानुवादेन संज्ञिनांत्रितयमप्यस्ति नासंज्ञिनां तदुभयव्यपदेशरहितानांक्षायिकमेव आहा
रानुवादेन आहारकाणांत्रितयमप्यस्ति अनाहारकाणांछद्मस्थानांत्रितयमप्यस्ति केवलिनांसमुद्
घातगतानांक्षायिकमेव साधनंद्विविधं अभ्यंतरंबाह्यंच अभ्यंतरंदर्शनमोहस्योपशमःक्षयःक्षयोप
शमोवा बाह्यंनारकाणांप्राक्चतुर्थ्याःसम्यग्दर्शनस्यसाधनंकेषांचिज्जातिस्मरणंकेषांचिद्धर्मश्रव
णंकेषांचिद्वेदनाभिभवः चतुर्थीमारभ्यआसप्तम्याः नारकाणांजातिस्मरणंवेदनाभिभवश्चतिरश्चां
केषांचिज्जातिस्मरणंकेषांचिद्धर्मश्रवणंकेषांचिज्जिनबिंबदर्शनंमनुष्याणामपितथैव देवानामपि
केषांचिज्जातिस्मरणंकेषांचिद्धर्मश्रवणंकेषांचिज्जिनमहिमदर्शनंकेषांचिद्देवर्द्धिदर्शनंएवंप्रागानतात्

८ आनतप्राणतारणाच्युतदेवानां देवर्द्धिदर्शनं मुक्त्वा अन्यत्तृतयमप्यस्ति नवग्रैवेयकवासिनां केषां
चिज्जातिस्मरणं केषांचिद्धर्मश्रवणं । अनुदिशानुत्तरविमानवासिनामियं कल्पना न भवति । प्रागे
व गृहीतसम्यक्त्वानां तत्रोत्पत्तेः । अधिकरणं द्विविधं । अभ्यंतरं बाह्यं च । अभ्यंतरं स्वामिसंबंधार्ह ए स्व×
वात्मा विवक्षातः कारकप्रवृत्तेः । बाह्यं लोकनाडी । सा कियती एकरज्जुविष्कंभा चतुर्दशरज्ज्वायामा ज्वा–
स्थितिरौपशमिकस्य जघन्योत्कृष्टा चांतर्मौहूर्तिकी । क्षायिकस्य संसारिणः जघन्यांतर्मौहूर्तिकी
उत्कृष्टा त्रयस्त्रिंशत्सागरोपमाणि सांतर्मुहूर्त्तान्यष्टवर्षहीनपूर्वकोटीद्वयाधिकानि । मुक्तस्य सा
दिरपर्यवसाना । क्षायोपशमिकस्य जघन्यांतर्मौहूर्तिकी उत्कृष्टा षट्षष्टिसागरोपमाणि । विधानं
सामान्यादेकं । सम्यग्दर्शनं द्वितयं निसर्गजाधिगमजभेदात् । त्रितयं औपशमिकक्षायिकक्षायोपश ८
मिकभेदात् । एवं संख्येयाः विकल्पाः शब्दतः । असंख्येया अनंताश्च भवंति । श्रद्धातृश्रद्धातव्यभेदात् । एव

मयं निर्देशादिर्विधिर्ज्ञानचारित्रयोः जीवाजीवादिषु चागमानुसारेण योजयितव्यः । किमेतैरेव जीवादी
नामधिगमो भवति । उतान्योऽप्यधिगमोपायोऽस्तीति परिपृष्टोऽस्तीत्याह । सत्संख्याक्षेत्रस्पर्शनकालां
श्री तरभावाल्पबहुत्वैश्च ॥ सदित्यस्तित्वनिर्देशः । स प्रशंसादिषु वर्त्तमानो नेह गृह्यते । संख्या भेदगणना ग्र पं३
क्षेत्रं निवासः । वर्त्तमानकालविषयः । तदेव स्पर्शनं त्रिकालगोचरं । कालो द्विविधः मुख्यो व्यावहारि
कश्च तयोरुत्तरत्र निर्णयो वक्ष्यते । अंतरं विरहकालः । भावः औपशमिकादिलक्षणः । अल्पबहुत्वमन्यो
न्यापेक्षया विशेषप्रतिपत्तिः । एतैश्च सम्यग्दर्शनादीनां जीवादीनां चाधिगमो वेदितव्यः । ननु च निर्देशा
देव सद्ग्रहणं सिद्धं विधानग्रहणात् संख्यागतिरधिकरणग्रहणात् क्षेत्रस्पर्शनावबोधः स्थितिग्रह
णात् कालसंग्रहः । भावो नामादिषु संगृहीत एव पुनरेषां किमर्थं ग्रहणमिति । सत्यं सिद्धं विनेयाशय
वशात्तत्त्वदेशनाविकल्पः । केचित्संक्षेपरुचयः केचिद्विस्तररुचयः । अपरे नातिसंक्षेपेण नातिवि

९ त्तरेणाप्रतिपाद्याः सर्वसत्त्वानुग्रहार्थो हि सतां प्रयास इति अधिगमाभ्युपायभेदोद्देशः कृतः इतरथा
हि प्रमाणनयैरधिगम इत्यनेनैव सिद्धत्वादितरेषां ग्रहणमनर्थकं स्यात् ॥ तत्र जीवद्रव्यमधिकृत्य सदाद्य
नुयोगद्वारनिरूपणं क्रियते ॥ जीवाश्चतुर्दशसु गुणस्थानेषु व्यवस्थिताः मिथ्यादृष्टिः सासादनसम्यग्दृ
सम्यग्मिथ्यादृष्टिः ष्टिः असंयतसम्यग्दृष्टिः संयतासंयतः प्रमत्तसंयतः ॥ अप्रमत्तसंयतः ॥ अपूर्वकरणस्थाने उपशामि
कः क्षपकः अनिवृत्तिबादरसांपरायस्थाने उपशमकः क्षपकः ॥ सूक्ष्मसांपरायस्थाने उपशमः क्षपकः
उपशांतकषायवीतरागछद्मस्थाः क्षीणकषायवीतरागछद्मस्थः सयोगकेवली अयोगकेवली चे
ति ॥ एतेषामेव जीवसमासानां निरूपणार्थं चतुर्दश मार्गणास्थानानि ज्ञेयानि ॥ गतींद्रियकाययोग
वेदकषायज्ञानसंयमदर्शनलेश्याभव्यसम्यक्त्वसंज्ञाहारका इति ॥ तत्र सत्प्ररूपणा द्विविधा सामा
न्येन विशेषेण च सामान्येन अस्ति मिथ्यादृष्टिः ॥ सासादनसम्यग्दृष्टिरित्येवमादि ॥ विशेषेण गत्यनुवा ९

देन नरकगतौ सर्वासु पृथिवीषु आद्यानि चत्वारि गुणस्थानानि संति ॥ तिर्यग्गतौ तान्येव संयतासंयतस्थाना
धिकानि ॥ मनुष्यगतौ चतुर्दशापि संति ॥ देवगतौ नारकवत् ॥ इंद्रियानुवादेन एकेंद्रियादिषु चतुरिंद्रियपर्यं
तेषु एकमेव मिथ्यादृष्टिस्थानं ॥ पंचेंद्रियेषु चतुर्दशापि संति ॥ कायानुवादेन पृथिवीकायादिवनस्पति
कायांतेषु एकमेव मिथ्यादृष्टिस्थानं ॥ त्रसकायेषु चतुर्दशापि संति ॥ योगानुवादेन ॥ त्रिषु योगेषु त्रयोद
शगुणस्थानानि भवंति ॥ ततः परं अयोगिकेवली ॥ वेदानुवादेन त्रयाणां वेदानां मिथ्यादृष्ट्याद्यनिवृत्ति
बादरांतानि संति ॥ अपगतवेदेषु अनिवृत्तिबादराद्ययोगकेवल्यंतानि ॥ कषायानुवादेन ॥ क्रोधमानमा बदरगुणस्थानानि संति
यासु मिथ्यादृष्ट्यादीनि अनिवृत्तिबादरस्थानांतानि संति लोभकषाये तान्येव सूक्ष्मसांपरायस्थानाधि
कानि ॥ अकषायाः उपशांतकषायः क्षीणकषायः सयोगिकेवली चेति ॥ ज्ञानानुवादेन मत्यज्ञानश्रु
ताज्ञानविभंगज्ञानेषु मिथ्यादृष्टिः सासादनसम्यग्दृष्टिश्चास्ति ॥ आभिनिबोधिकश्रुतावधिज्ञानेषु अ

अयोगकेवली २

१० संतसम्यग्दृष्ट्यादीनि क्षीणकषायांतानि संति ॥ मनःपर्ययज्ञाने प्रमत्तसंयतादयः क्षीणकषायांताः सं
ति केवलज्ञाने सयोगः अयोगश्च ॥ संयमानुवादेन संयताः प्रमत्तादयः अयोगकेवल्यंताः सामायि
कछेदोपस्थापनशुद्धिसंयताः प्रमत्तादयः अनिवृत्तिस्थानांताः परिहारशुद्धिसंयताः ॥ प्रमत्ताप्रमत्ता
श्च सूक्ष्मसंपरायशुद्धिसंयताः एकस्मिन्नेव सूक्ष्मसंपरायस्थाने यथाख्यातविहारशुद्धिसंयता उ
पशांतकषायादयः अयोगकेवल्यंताः संयतासंयताः ॥ एकस्मिन्नेव संयतासंयतस्थाने असंयताः
आद्येषु चतुर्षु गुणस्थानेषु ॥ दर्शनानुवादेन ॥ चक्षुर्दर्शनाचक्षुर्दर्शनयोर्मिथ्यादृष्ट्यादीनि क्षीण
७ य कषायांतानि संति ॥ अवधिदर्शने असंयतसम्यग्दृष्ट्यादीनि क्षीणकषायांतानि केवलदर्शने सयो
गकेवली अयोगकेवली च लेश्यानुवादेन ॥ कृष्णनीलकापोतलेश्यासु मिथ्यादृष्ट्यादीनि असंय
तसम्यग्दृष्ट्यांतानि संति तेजःपद्मलेश्ययोः मिथ्यादृष्ट्यादीनि अप्रमत्तस्थानांतानि ॥ शुक्ललेश्यायां १०

मिथ्यादृष्ट्यादीनि सयोगकेवल्यंतानि अलेश्याः अयोगकेवलिनः भव्यानुवादेन ॥ भव्येषु चतुर्दशापि
संति ॥ अभव्या आद्य एव स्थाने ॥ सम्यक्त्वानुवादेन ॥ क्षायिकसम्यक्त्वे असंयतसम्यग्दृष्ट्यादीनि अयोगके
वल्यंतानि संति ॥ क्षायोपशमिकसम्यक्त्वे असंयतसम्यग्दृष्ट्यादीनि अप्रमत्तां ॥ तानि ॥ औपशमिकसम्य
क्त्वे असंयतसम्यग्दृष्ट्यादीनि उपशांतकषायांतानि ॥ सासादनसम्यग्दृष्टिः सम्यग्मिथ्यादृष्टिः मिथ्या
दृष्टिश्च स्वे स्वे स्थाने ॥ संज्ञानुवादेन ॥ संज्ञिषु द्वादशगुणस्थानानि क्षीणकषायांतानि ॥ असंज्ञिषु एकं
य एव मिथ्यादृष्टिस्थानं तदुभयव्यपदेशरहितः सयोगकेवली अयोगकेवली च ॥ आहारानुवादेन ॥ आहार
केषु मिथ्यादृष्ट्यादीनि सयोगकेवल्यंतानि अनाहारकेषु विग्रहगत्यापन्नेषु त्रीणि गुणस्थानानि मिथ्या
दृष्टिः सासादनसम्यग्दृष्टिः असंयतसम्यग्दृष्टिश्च समुद्घातगतः ॥ सयोगकेवली अयोगकेवली च
सिद्धाः परमेष्ठिनः अतीतगुणस्थानाः ॥ श्री ॥ उक्ता सत्प्ररूपणा ॥ संख्याप्ररूपणोच्यते ॥ सा द्विविधा सा

DR BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

११ मान्येनविशेषेणाच सामान्येनतावत्जीवामिथ्यादृष्टयः अनंतानंताः सासादनसम्यग्दृष्टयः सम्यग्मि
थ्यादृष्टयः असंयतसम्यग्दृष्टयः संयतासंयताश्च पल्योपमासंख्येयभाग प्रमिताः प्रमत्तसंयताः को
टीपृथक्त्वसंख्याः पृथक्तमित्यागमसंज्ञा तिसृणांकोटीनामुपरिनवानामधः अप्रमत्तसंयताः संख्ये
याः चत्वारउपशमकाः प्रवेशेनएकोवाद्वौत्रयोवाउत्कर्षेणचतुः पंचाशत्स्वकालेनसमुदिताः सं
ख्येयाः चत्वारः क्षपकाः अयोगकेवलिनश्चप्रवेशेनएकोवाद्वौवात्रयोवाउत्कर्षेणाष्टोत्तरशतसं
ख्याः स्वकालेनसमुदितासंख्येयाः सयोगकेवलिनः प्रवेशेनएकोवाद्वौवात्रयोवाउत्कर्षेणाष्टोत्तर
शतसंख्याः स्वकालेनसमुदिताः शतसहस्रपृथक्त्वसंख्याः विशेषेणगत्यनुवादेन नरकगतौप्र
थमायांपृथिव्यांनारकाः मिथ्यादृष्टयः असंख्येयाः श्रेणयःप्रतरासंख्येयभागप्रमिताः द्वितीयादिष्वा स्या४
सप्तम्याः मिथ्यादृष्टयः श्रेण्यसंख्येयभागप्रमिताःसचासंख्येयभागः असंख्येयोजनकोट्यः सर्वा ११

का१

सुपृथिवीषुसासादनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयः असंयतसम्यग्दृष्टयश्चपल्योपमासंख्येय
भागप्रमिताः तिर्यग्गतौ तिरश्चांमिथ्यादृष्टयः अनंतानंताः सासादनसम्यग्दृष्ट्यादयः संयतासंयतांप ताः२
ल्योपमासंख्येयभागप्रमिताः मनुष्यगतौमनुष्याः मिथ्यादृष्टयः श्रेण्यसंख्येयभागप्रमिताः सचासं
ख्येयभागः असंख्येयाः योजनकोट्यः सासादनसम्यग्दृष्ट्यादयः संयतासंयतांताःसंख्येयाः प्रमत्तादी
नांसामान्योक्तासंख्या देवगतौदेवाः मिथ्यादृष्टयः असंख्येयाश्रेणयः प्रतरासंख्येयभागप्रमिताः सा
सादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टिअसंयतसम्यग्दृष्टयः पल्योपमासंख्येयभागप्रमिताः इंद्रिया
नुवादेनएकेंद्रियामिथ्यादृष्टयः अनंतानंता द्वींद्रियाः त्रींद्रियाः चतुरिंद्रियाः असंख्येयाश्रेणयः प्र
तराःसंख्येयभागप्रमिताः पंचेंद्रियेषुमिथ्यादृष्टयः असंख्येयाः प्रतरासंख्येयभागप्रमिताः सासा
दनसम्यग्दृष्ट्याद्यः अयोगकेवल्यंतासामान्योक्तसंख्याः कायानुवादेनपृथिवीकायिकाः अप्का प

श्रेणयः२

१२ यिकाः तेजकायिकाः वायुकायिकाः असंख्येयलोकाः वनस्पतिकायिकाः अनंतानंताः त्रसकायि
कसंख्या पंचेंद्रियवत् । योगानुवादेन । मनोयोगिनो वाग्योगिनश्च मिथ्यादृष्टयः असंख्येयाः श्रेणयः
प्रतरासंख्येयभागप्रमिताः । काययोगिनो मिथ्यादृष्टयः अनंतानंताः । त्रयाणामपि योगिनां सासादनस
म्यग्दृष्ट्यादयः संयतासंयतांताः पल्योपमासंख्येयभागप्रमिताः प्रमत्तसंयतादयः सयोगकेवल्यं
ताः संख्येयाः अयोगकेवलिनः सामान्योक्तसंख्या । वेदानुवादेन । स्त्रीवेदाः पुंवेदा मिथ्यादृष्टयः । अ
संख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः । नपुंसकवेदा मिथ्यादृष्टयः । अनंतानंताः । स्त्रीवेदा नपुं
सकवेदाश्च सासादनसम्यग्दृष्ट्यादयः संयतासंयतांताः सामान्योक्तसंख्या । प्रमत्तसंयतादयः अनि
वृत्तिबादरांताः संख्येयाः पुंवेदाः सासादनसम्यग्दृष्ट्यादयः संयतासंयतांताः सामान्योक्तसंख्या । प्रम
त्तसंयतादयः अनिवृत्तिबादरांताः सामान्योक्तसंख्या । अपगतवेदाः । अनिवृत्तिबादरादयः अयोगके १२

वल्यंताः सामान्योक्तसंख्या । कषायानुवादेन । क्रोधमानमायासु मिथ्यादृष्ट्यादयः संयतासंयतांताः
सामान्योक्तसंख्या । प्रमत्तसंयतादयः अनिवृत्तिबादरांताः संख्येयाः लोभकषायाणामुक्त एव क्रमः
अयं तु विशेषः सूक्ष्मसांपरायसंयताः सामान्योक्तसंख्या । अकषायाः उपशांतकषायादयः । अयोगके
वल्यंताः सामान्योक्तसंख्या । ज्ञानानुवादेन । मत्यज्ञानिनः श्रुताज्ञानिनश्च मिथ्यादृष्टि । सासादनसम्य
ग्दृष्ट्यादयः सामान्योक्तसंख्या । विभंगज्ञानिनो मिथ्यादृष्टयः असंख्येयाः श्रेणयः प्रतरासंख्येयभाग
प्रमिताः सासादनसम्यग्दृष्टयः पल्योपमासंख्येयभागप्रमिताः ~~सासादन~~ मतिश्रुतज्ञानिनः असं
यतसम्यग्दृष्ट्यादयः क्षीणकषायांताः सामान्योक्तसंख्या । अवधिज्ञानिनः । असंयतसम्यग्दृष्टिसं संयतासं
यताः सामान्योक्तसंख्या । प्रमत्तसंयतादयः क्षीणकषायांताः संख्येयाः मनःपर्ययज्ञानिनः प्रमत्त ३ यः संयतांताः
संयतादयः क्षीणकषायांताः संख्येयाः केवलज्ञानिनः सयोगायोगाश्च सामान्योक्तसंख्या । संयमानु

१३ वादेन सामायिकछेदोपस्थापनशुद्धिसंयताः प्रमत्तादयः अनिवृत्तिवादरांताः सामान्योक्तसंख्याः परि
हारविशुद्धिसंयताः प्रमत्ताश्चाप्रमत्ताश्च संख्येयाः सूक्ष्मसांपरायशुद्धिसंयताः यथाख्यातविहारशु
अ द्धिसंयताः संयतासंयताः असंयताश्च सामान्योक्तसंख्याः दर्शनानुवादेन चक्षुदर्शनिनो मिथ्यादृष्टयः
असंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः अचक्षुदर्शनिनो मिथ्यादृष्टयः अनंतानंताः उभ
येषां सासादनसम्यग्दृष्ट्यादयः क्षीणकषायांताः सामान्योक्तसंख्याः अवधिदर्शनिनो अवधिज्ञान
वत् केवलदर्शनिनः केवलज्ञानवत् लेश्यानुवादेन कृष्णनीलकापोतलेश्या मिथ्यादृष्ट्याद्यसं
यतसम्यग्दृष्ट्यंताः सामान्योक्तसंख्याः तेजःपद्मलेश्या मिथ्यादृष्ट्यादयः संयतासंयतांताः स्त्रीवे
दवत् प्रमत्ताप्रमत्तसंयताः संख्येयाः शुक्ललेश्या मिथ्यादृष्ट्यादयः संयतासंयतांताः पल्योपमासंख्ये १३
यभागप्रमिताः प्रमत्ताप्रमत्तसंयताः संख्येयाः अपूर्वकरणादयः सयोगकेवल्यंताः ~~[illegible]~~

ले२ सामान्योक्तसंख्याः ~~[illegible]~~

ख्याः अलेश्याश्च सामान्योक्तसंख्याः भव्यानुवादेन भव्येषु मिथ्यादृष्ट्यादयः अयोगकेवल्यंताः सामा
न्योक्तसंख्याः अभव्या अनंताः सम्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टयः पल्योप
मासंख्येयभागप्रमिताः संयतासंयतादयः उपशांतकषायांताः संख्येयाः चत्वारः क्षपकाः सयोगकेव
ली अयोगकेवली च सामान्योक्तसंख्याः क्षायोपशमिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्ट्यादयः अप्र
मत्तांताः सामान्योक्तसंख्याः औपशमिकसम्यग्दृष्टिषु असंयतासंयताः पल्योपमासंख्येयभागप्र
मिताः प्रमत्ताप्रमत्तसंयताः संख्येयाः चत्वारः उपशमकाः सामान्योक्तसंख्याः सासादनसम्यग्दृष्टयः
सम्यग्मिथ्यादृष्टयः मिथ्यादृष्टयश्च सामान्योक्तसंख्याः संज्ञानुवादेन संज्ञिषु मिथ्यादृष्ट्यादयः क्षीणक
षायांताः चक्षुर्दर्शनिवत् असंज्ञिनः मिथ्यादृष्टयः अनंतानंताः तदुभयव्यपदेशरहिताः सामान्यो
क्तसंख्याः आहारानुवादेन आहारकेषु मिथ्यादृष्ट्यादयः सयोगकेवल्यंताः सामान्योक्तसंख्याः अनाहा

संयतसम्यग्दृष्टि ५

१४ रकेषु मिथ्यादृष्टिसासादनसम्यग्दृष्टियः सामान्योक्तसंख्याः सयोगकेवलिनः संख्येयाः अयोगकेवलिनः
सामान्योक्तसंख्या संख्यानिर्णीतेति क्षेत्रमुच्यते तद्द्विविधं सामान्येन विशेषेण च सामान्येन तावत्
मिथ्यादृष्टीनां सर्वलोकः सासादनसम्यग्दृष्ट्यादीनामयोगकेवल्यंतानां लोकस्यासंख्येयभागः सयोगके उदी
वलिनां लोकस्यासंख्येयभागो असंख्येयभागा वा सर्वलोको वा विशेषेण गत्यनुवादेन नरकगतौ सर्वा
सु पृथिवीषु नारकाणां चतुर्षु गुणस्थानेषु लोकस्यासंख्येयभागः तिर्यग्गतौ तिरश्चां मिथ्यादृष्ट्यादिसं
यतासंयतांतानां सामान्योक्तं क्षेत्रं मनुष्यगतौ मनुष्याणां मिथ्यादृष्ट्याद्ययोगकेवल्यंतानां लोकस्यासं
ख्येयभागः सयोगकेवलिनां सामान्योक्तं क्षेत्रं देवगतौ देवानां सर्वेषां चतुर्षु गुणस्थानेषु लोकस्यासंख्ये
यभागः इंद्रियानुवादेन एकेंद्रियाणां क्षेत्रं सर्वो लोकः विकलेंद्रियाणां लोकस्यासंख्येयभागः पंचेंद्रिया १४
णां मनुष्यवत् कायानुवादेन पृथिवीकायादिवनस्पतिकायांतानां सर्वलोकः त्रसकायिनां योगाऽनुवादे
कां पंचेंद्रियवत् २

न वाग्मानसयोगिनां मिथ्यादृष्ट्यादिसयोगकेवल्यंतानां लोकस्यासंख्येयभागः काययोगिनां मिथ्यादृष्ट्या
दिसयोगकेवल्यंतानां अयोगकेवलिनां च सामान्योक्तं क्षेत्रं वेदानुवादेन स्त्रीपुंवेदानां मिथ्यादृष्ट्याद्यनि
वृत्तिबादरांतानां लोकस्यासंख्येयभागः नपुंसकवेदानां मिथ्यादृष्ट्याद्यनिवृत्तिबादरांतानां अपगतवेदा
कषायाणां ४ नां च सामान्योक्तं क्षेत्रं कषायाऽनुवादेन क्रोधमानमायालोभकषायाणां च मिथ्यादृष्ट्याद्यनिवृत्तिबादरांता
नां सूक्ष्मसांपरायाणां अकषायाणां च सामान्योक्तं क्षेत्रं ज्ञानानुवादेन मत्यज्ञानिश्रुताज्ञानिनां मिथ्यादृ
ष्टिसासादनसम्यग्दृष्टीनां सामान्योक्तं क्षेत्रं विभंगज्ञानिनां मिथ्यादृष्टिसासादनसम्यग्दृष्टीनां लोकस्या
संख्येयभागः आभिनिबोधिकश्रुतावधिज्ञानिनां असंयतसम्यग्दृष्ट्यादीनां मनःपर्ययज्ञानिनां च प्रम
त्तादीनां क्षीणकषायांतानां केवलज्ञानिनां सयोगानामयोगानां च सामान्योक्तं क्षेत्रं संयमानुवादेन सामा
यिकच्छेदोपस्थापनशुद्धिसंयतानां चतुर्णां परिहारविशुद्धिसंयतानां प्रमत्ताऽप्रमत्तानां सूक्ष्मसांपरायशुद्धि
क्षीणकषायांतानां २

१५ संयतानां यथाख्यातविहारशुद्धिसंयतानां चतुर्णां संयतासंयतानां असंयतानां च चतुर्णां सामान्योक्तं क्षेत्रं
दर्शनानुवादेन चक्षुर्दर्शनिनां मिथ्यादृष्ट्यादिक्षीणकषायांतानां लोकस्यासंख्येयभागः अचक्षुर्दर्शि
निनां मिथ्यादृष्ट्यादिक्षीणकषायांतानां सामान्योक्तं क्षेत्रं अवधिदर्शनिनामवधिज्ञानिवत् केवल
दर्शनिनां केवलज्ञानिवत् लेश्यानुवादेन कृष्णनीलकापोतलेश्यानां मिथ्यादृष्ट्याद्यसंयतसम्यग्दृ
ष्ट्यंतानां सामान्योक्तं क्षेत्रं तेजःपद्मलेश्यानां मिथ्यादृष्ट्याद्यप्रमत्तांतानां लोकस्यासंख्येयभागः शु ५द्यु×
क्ललेश्यानां मिथ्यादृष्ट्यादिक्षीणकषायांतानां लोकस्यासंख्येयभागः सयोगकेवलिनामलेश्यानां
च सामान्योक्तं क्षेत्रं भव्यानुवादेन भव्यानां चतुर्दशानां सामान्योक्तं क्षेत्रं अभव्यानां सर्वलोकः सम्य
क्त्वानुवादेन क्षायिकसम्यग्दृष्टीनां असंयतसम्यग्दृष्ट्याद्ययोगकेवल्यंतानां क्षायोपशमिकसम्य
ग्दृष्टीनामसंयतसम्यग्दृष्ट्याद्यप्रमत्तांतानां औपशमिकसम्यग्दृष्टीनामसंयतसम्यग्दृष्ट्याद्युपशांत १५

२सं× मिथ्यादृष्टीनां

कषायांतानां सासादनसम्यग्दृष्टीनां सम्यग्मिथ्यादृष्टीनां च सामान्योक्तं क्षेत्रं संज्ञ्यनुवादेन संज्ञिनां
चक्षुर्दर्शनिवत् असंज्ञिनां सर्वलोकः तदुभयव्यपदेशरहितानां सामान्योक्तं क्षेत्रं आहारानुवादेन
आहारकाणां मिथ्यादृष्ट्यादिक्षीणकषायांतानां सामान्योक्तं क्षेत्रं सयोगिकेवलिनां लोकस्यासंख्येय
भागः अनाहारकाणां मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्ट्ययोगकेवलिनां सामान्योक्तं क्षे
त्रं सयोगकेवलिनां लोकस्यासंख्येयभागः सर्वलोको वा क्षेत्रनिर्णयः कृतः स्पर्शनमुच्यते तद्द्विधा
सामान्येन विशेषेण च सामान्येन तावत् मिथ्यादृष्टिभिः सर्वलोकः स्पृष्टः सासादनसम्यग्दृष्टिभिर्लो
कस्यासंख्येयभागः अष्टौ द्वादश वा चतुर्दशभागा देशोनाः सम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिभिर्लोक
स्यासंख्येयभागः अष्टौ वा चतुर्दशभागा देशोनाः संयतासंयतैर्लोकस्यासंख्येयभागः षट् चतु
र्दशभागा देशोनाः प्रमत्तसंयतादीनामयोगकेवल्यंतानां क्षेत्रवत्स्पर्शनं विशेषेण गत्यनुवादेन नरक

१वी

२ता×

DR. BHAU DAJI MEMORIAL

क

२६ गतौ प्रथमायां पृथिव्यां नारकैश्चतुर्गुणस्थानैर्लोकस्यासंख्येयभागः स्पृष्टः द्वितीयादिषु आसप्तम्याः मि
थ्यादृष्टिसासादनसम्यग्दृष्टिभिः लोकस्यासंख्येयभागः एको द्वौ त्रयः चत्वारः पंच चतुर्दशभागा वा देशोनाः
सम्यग्मिथ्यादृष्ट्यसंयत सम्यग्दृष्टिभिर्लोकस्यासंख्येयभागः सप्तम्यां पृथिव्यां मिथ्यादृष्टिभिर्लोकस्या
संख्येयभागः षट्चतुर्दशभागा वा देशोनाः शेषैस्त्रिभिर्लोकस्यासंख्येयभागः तिर्यग्गतौ तिरश्चां मिथ्या
दृष्टिभिः सर्वलोकः स्पृष्टः सासादनसम्यग्दृष्टिभिः लोकस्यासंख्येयभागः सप्त चतुर्दशभागा वा देशोनाः
४ भिः सम्यग्मिथ्यादृष्टिभिर्लोकस्यासंख्येयभागः असंयतसम्यग्दृष्टिसंयतां षट्चतुर्दशभागा वा देशोना म संयतैः लोकस्यासंख्येयभागः
नुष्यगतौ मनुष्यैः मिथ्यादृष्टिभिर्लोकस्यासंख्येयभागः सर्वलोको वा स्पृष्टः सासादनसम्यग्दृष्टिभिर्लो
कस्यासंख्येयभागः सप्त चतुर्दशभागा वा देशोनाः सम्यग्मिथ्यादृष्ट्यादीनां [illegible]योगकेवल्यंतानां क्षेत्र
वत्स्पर्शनं देवगतौ देवैः मिथ्यादृष्टिसासादनसम्यग्दृष्टिभिः लोकस्यासंख्येयभागः अष्टौ नव चतुर्द २६

२ म ४

शभागा वा देशोनाः सम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिभिर्लोकस्यासंख्येयभागः अष्टौ चतुर्दशभागा वा दे
शोनाः इंद्रियानुवादेन एकेंद्रियैः सर्वलोकः स्पृष्टः विकलेंद्रियैः लोकस्यासंख्येयभागः सर्वलोको वा पंचे
न्द्रियेषु मिथ्यादृष्टिभिः लोकस्यासंख्येयभागः अष्टौ चतुर्दशभागा वा देशोनाः सर्वलोको वा शेषाणां
सामान्योक्तं स्पर्शनं कायानुवादेन स्थावरकायिकैः सर्वलोकः स्पृष्टः त्रसकायिकानां पंचेंद्रियवत्स्प
र्शनं योगानुवादेन वाङ्मानसयोगिनां मिथ्यादृष्टिभिः लोकस्यासंख्येयभागः अष्टौ चतुर्दशभागा वा
देशोनाः सर्वलोको वा सासादनसम्यग्दृष्ट्यादीनां क्षीणकषायान्तानां सामान्योक्तं स्पर्शनं सयोगके
वलिनां लोकस्यासंख्येयभागः काययोगिनां मिथ्यादृष्ट्यादीनां सयोगकेवल्यंतानां अयोगकेवलिनां सा
मान्योक्तं स्पर्शनं वेदानुवादेन स्त्रीपुंवेदैः मिथ्यादृष्टिभिः लोकस्यासंख्येयभागः स्पृष्टः अष्टौ चतुर्दशभागा नव २
गा वा देशोनाः सर्वलोको वा सासादनसम्यग्दृष्टिभिः लोकस्यासंख्येयभागः अष्टौ नव चतुर्दशभागा

१७ वदिशो नाः ॥ सम्यग्मिथ्यादृष्ट्याद्यनिवृत्तिबादरांतानां सामान्योक्तं स्पर्शनं नपुंसकवेदेषु मिथ्यादृष्टीनां सा-
सादनसम्यग्दृष्टीनां च सामान्योक्तं स्पर्शनं ॥ सम्यग्मिथ्यादृष्टिभिः लोकस्यासंख्येयभागः स्पृष्टः ॥ असंयत
सम्यग्दृष्टिसंयतासंयतैः लोकस्यासंख्येयभागः षट्चतुर्दशभागा वा देशोनाः ॥ प्रमत्ताद्यनिवृत्तिबादरां
तानां अपगतवेदानां च सामान्योक्तं स्पर्शनं ॥ कषायानुवादेन ॥ चतुःकषायाणां च सामान्योक्तं स्पर्शनं ॥ अकषायाणां ४
ज्ञानानुवादेन ॥ मत्यज्ञानिश्रुताज्ञानिनां मिथ्यादृष्टिसासादनसम्यग्दृष्टीनां सामान्योक्तं स्पर्शनं ॥ वि
भंगज्ञानिनां मिथ्यादृष्टीनां लोकस्यासंख्येयभागः अष्टौ चतुर्दशभागा वा देशोनाः सर्वलोको वा ॥
सासादनसम्यग्दृष्टीनां सामान्योक्तं स्पर्शनं ॥ आभिनिबोधिकश्रुतावधिमनःपर्ययकेवलिनां सामा- ज्ञानि ५
न्योक्तं स्पर्शनं ॥ संयमानुवादेन ॥ संयतानां सर्वेषां संयतासंयतानामसंयतानां च सामान्योक्तं स्पर्शनं ॥ द- १७
र्शनानुवादेन ॥ चक्षुर्दर्शनिनां मिथ्यादृष्ट्यादिक्षीणकषायांतानां पंचेंद्रियवत् ॥ अचक्षुर्दर्शनिनां मि-

थ्यादृष्ट्यादिक्षीणकषायांतानां अवधिदर्शनकेवलदर्शिनां च सामान्योक्तं स्पर्शनं ॥ लेश्यानुवादेन ॥ कृ-
ष्णनीलकापोतलेश्यैः मिथ्यादृष्टिभिः सर्वलोकः स्पृष्टः सासादनसम्यग्दृष्टिभिः लोकस्यासंख्येयभागः
पंच चत्वारः द्वौ चतुर्दशभागा वा देशोनाः ॥ द्वादशभागाः कुतो न लभ्यंते इति चेत् ॥ तत्रावस्थितलेश्यापेक्ष-
या पंचैव ॥ अथवा येषां मते सासादन एकेंद्रियेषु नोत्पद्यते तन्मतापेक्षया द्वादशभागा न दत्ताः ॥ स-
म्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिभिः लोकस्यासंख्येयभागः ॥ तेजोलेश्यैः मिथ्यादृष्टिसासादनसम्य-
ग्दृष्टिभिः लोकस्यासंख्येयभागः ॥ अष्टौ नव चतुर्दशभागा वा देशोनाः ॥ सम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टि-
भिः लोकस्यासंख्येयभागः अष्टौ चतुर्दशभागा वा देशोनाः ॥ संयतासंयतैः लोकस्यासंख्येयभागः
२६४ अध्यर्धचतुर्दशभागा वा देशोनाः ॥ प्रमत्ताप्रमत्तैः लोकस्यासंख्येयभागः ॥ पद्मलेश्यैः मिथ्यादृष्ट्याद्यसं-
यतसम्यग्दृष्ट्यंतैः लोकस्यासंख्येयभागः ॥ अष्टौ चतुर्दशभागा वा देशोनाः ॥ संयतासंयतैः लोकस्यासंख्ये-

१८ यभागः पंचचतुर्दशभागा वा देशोनाः प्रमत्ताप्रमत्तैः लोकस्यासंख्येयभागः शुक्ललेश्यैः मिथ्यादृष्ट्यादि
संयतासंयतांतैः लोकस्यासंख्येयभागः षट्चतुर्दशभागा वा देशोनाः प्रमत्तादिसयोगकेवल्यंतानां अ
लेश्यानां च सामान्योक्तस्पर्शनं ॥ भव्यानुवादेन भव्यानां मिथ्यादृष्ट्याद्ययोगकेवल्यंतानां सामान्योक्तं स्
स्पर्शनं ॥ अभव्यैः सर्वलोकः स्पृष्टः सम्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टीनां असंयतसम्यग्दृष्ट्याद्ययो
गकेवल्यंतानां सामान्योक्तं किंतु संयतासंयतानां लोकस्यासंख्येयभागः क्षायोपशमिकसम्यग्दृष्टी
नां सामान्योक्तं ॥ औपशमिकसम्यक्त्वानां असंयतसम्यग्दृष्टीनां सामान्योक्तं ॥ शेषाणां लोकस्यासंख्येय
भागः सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टिमिथ्यादृष्टीनां सामान्योक्तं ॥ संज्ञ्यनुवादेन संज्ञिनां च चक्षु
दर्शनिवत् असंज्ञिभिः सर्वलोकः स्पृष्टः तदुभयव्यपदेशरहितानां सामान्योक्तं ॥ आहारानुवादेन आ
हारकाणां मिथ्यादृष्ट्यादिक्षीणकषायांतानां सामान्योक्तं ॥ सयोगकेवलिनां लोकस्यासंख्येयभागः अ १८

नाहारकेषु मिथ्यादृष्टिभिः सर्वलोकः स्पृष्टः सासादनसम्यग्दृष्टिभिः लोकस्यासंख्येयभागः एकादशचा
तुर्दशभागा वा देशोनाः असंयतसम्यग्दृष्टिभिः लोकस्यासंख्येयभागः षट्चतुर्दशभागा वा देशोनाः सयो
गिकेवलिनां लोकस्यासंख्येयभागः सर्वलोको वा ॥ अयोगकेवलिनां लोकस्यासंख्येयभागः स्पर्शनं व्या
ख्यातं ॥ कालः प्रस्तूयते ॥ स द्विविधः सामान्येन विशेषेण च ॥ सामान्येन तावत् मिथ्यादृष्टेर्नानाजीवापेक्ष
या सर्वः कालः एकजीवापेक्षया त्रयो भंगाः ॥ अनादिरपर्यवसानः अनादिसपर्यवसानः सादिसपर्यव
सानश्चेति ॥ तत्र सादिः सपर्यवसानः जघन्येनांतर्मुहूर्तः ॥ उत्कर्षेण अर्द्धपुद्गलपरिवर्तो देशोनः
सासादनसम्यग्दृष्टेः नानाजीवापेक्षया जघन्येन एकसमयः ॥ उत्कर्षेण पल्योपमासंख्येयभागः ॥ एक
जीवं प्रति जघन्येनैकः समयः उत्कर्षेण षडावलिकाः सम्यग्मिथ्यादृष्टेः नानाजीवापेक्षया जघन्येना
तर्मुहूर्तः असंयतसम्यग्दृष्टेः नानाजीवापेक्षया सर्वः कालः एकजीवं प्रति जघन्येनांतर्मुहूर्तः उत्कर्षेण

१ उत्कर्षेण पल्योपमासंख्येयभागः ॥ एकजीवं प्रति जघन्येनोत्कर्षेण चांतर्मुहूर्तः

१८ अंतं त्रयस्त्रिंशत्सागरोपमाणि सातिरेकाणि संयतासंयतस्य नानाजीवापेक्षया सर्वकालः । एकजीवं प्रति जघन्ये
नांतर्मुहूर्त्तः । उत्कर्षेण पूर्वकोटी देशोना प्रमत्ताप्रमत्तयोः नानाजीवापेक्षया सर्वकालः एकजीवं प्रति जघ
न्येनैकः समयः उत्कर्षेणांतर्मुहूर्त्तः । चतुर्णामुपशमकानां नानाजीवापेक्षया एकजीवापेक्षया च जघन्ये
२४ नैकः समयः उत्कर्षेणांतर्मुहूर्त्तः चतुर्णां क्षपकाणां अयोगकेवलिनां च नानाजीवापेक्षया एकजीवापेक्ष
या च जघन्यश्चोत्कृष्टश्चांतर्मुहूर्त्तः सयोगकेवलिनां नानाजीवापेक्षया सर्वकालः । एकजीवं प्रति
जघन्येनांतर्मुहूर्त्तः । उत्कर्षेण पूर्वकोटी देशोना । विशेषेण गत्यनुवादेन नरकगतौ नारकेषु सप्तसु पृ
थिवीषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वकालः । एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः उत्कर्षेण यथासंख्यं
एकत्रिसप्तदश सप्तदश द्वाविंशति त्रयस्त्रिंशत्सागरोपमाणि । सासादनसम्यग्दृष्टेः सम्यग्मिथ्यादृष्टे
श्च सामान्योक्तः कालः । असंयतसम्यग्दृष्टेः नानाजीवापेक्षया सर्वकालः एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः १८

उक्त एवोत्कृष्टदेशोनः । तिर्यग्गतौ तिरश्चां मिथ्यादृष्टीनां नानाजीवापेक्षया सर्वकालः एकजीवं प्रति ज
घन्येनांतर्मुहूर्त्तः । उत्कर्षेणानंतः कालोऽसंख्येयाः पुद्गलपरिवर्त्ताः सासादनसम्यग्दृष्टिसम्यग्मिथ्या
दृष्टिसंयतासंयतानां सामान्योक्तः कालः असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया सर्वकालः । एकजीवं प्र
ति जघन्येनांतर्मुहूर्त्तः । उत्कर्षेण त्रीणि पल्योपमाणि । मनुष्यगतौ मनुष्येषु मिथ्यादृष्टेः नानाजीवापेक्ष
या सर्वकालः । एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः । उत्कर्षेण त्रीणि पल्योपमानि पूर्वकोटीपृथक्त्वैरभ्यधि
कानि । सासादनसम्यग्दृष्टेः नानाजीवापेक्षया जघन्येनैकः समयः । उत्कर्षेणांतर्मुहूर्त्तः एकजीवं प्रति
जघन्येनैकः समयः । उत्कर्षेण षडावलिकाः सम्यग्मिथ्यादृष्टेः नानाजीवापेक्षया एकजीवापेक्षया च
जघन्यश्चोत्कृष्टश्चांतर्मुहूर्त्तः असंयतसम्यग्दृष्टेः नानाजीवापेक्षया सर्वकालः एकजीवं प्रति जघन्येनां
तर्मुहूर्त्तः । उत्कर्षेण त्रीणि पल्योपमानि सातिरेकाणि शेषाणां सामान्योक्तः देवगतौ देवेषु मिथ्यादृष्टेर्नाना

२० नाजीवापेक्षयासर्वकालः।एकजीवंप्रतिजघन्येनांतर्मुहूर्त्तः।उत्कर्षेणएकत्रिंशत्सागरोपमाणि।सासाद
नसम्यग्मिथ्यादृष्ट्योःसामान्योक्तःकालः।असंयतसम्यग्दृष्टेःनानाजीवापेक्षयासर्वकालः।एकजीवंप्रतिज
घन्येनांतर्मुहूर्त्तः।उत्कर्षेणत्रयस्त्रिंशत्सागरोपमाणि।इंद्रियानुवादेन।एकेंद्रियाणांनानाजीवापेक्षया
सर्वकालः।एकजीवंप्रतिजघन्येनक्षुद्रभवग्रहणं।उत्कर्षेणानंतःकालोऽसंख्येयाःपुद्गलपरिवर्त्ताः।
वि कलेंद्रियाणांनानाजीवापेक्षयासर्वकालः।एकजीवंप्रतिजघन्येनक्षुद्रभवग्रहणं।उत्कर्षेणसंख्येयानि
वर्षसहस्राणि।पंचेंद्रियेषुमिथ्यादृष्टेःनानाजीवापेक्षयासर्वकालः।एकजीवंप्रतिजघन्येनांतर्मुहूर्त्तः।उत्क
उ को र्षेणसागरोपमसहस्रंपूर्वकोटीपृथक्त्वैरभ्यधिकं।शेषाणांसामान्योक्तःकालः।कायानुवादेनपृथिव्यप्ते
जोवायुकायिकानांनानाजीवापेक्षयासर्वकालः।एकजीवंप्रतिजघन्येनक्षुद्रभवग्रहणं।उत्कर्षेणासं २०
ख्येयाःकालाः।वनस्पतिकायिनांएकेंद्रियवत्।त्रसकायिकेषुमिथ्यादृष्टेःनानाजीवापेक्षयासर्वकालः।ए

कजीवंप्रतिजघन्येनांतर्मुहूर्त्तः।उत्कर्षेणद्वेसागरोपमसहस्रेपूर्वकोटीपृथक्त्वैरभ्यधिके।शेषाणांपंचेंद्रि
यवत्।योगानुवादेन।वाङ्मनसयोगिषुमिथ्यादृष्ट्यसंयतसम्यग्दृष्टिसंयतासंयतप्रमत्ताप्रमत्तसयोगकेव
लिनांनानाजीवापेक्षयासर्वकालः।एकजीवापेक्षयाजघन्येनैकसमयः।उत्कर्षेणांतर्मुहूर्त्तः।सासादन
सम्यग्दृष्टेःसामान्योक्तः।सम्यग्मिथ्यादृष्टेःनानाजीवापेक्षयाजघन्येनैकसमयः।उत्कर्षेणपल्योपमासं
समयः ३ क ५ ख्येयभागः।एकजीवंप्रतिजघन्येनोत्कर्षेणचांतर्मुहूर्त्तः।चतुर्णामुपशमकानांक्षपकाणांचनानाजीवा
पेक्षया।एकजीवापेक्षयाचजघन्येनैकसमयः।उत्कर्षेणांतर्मुहूर्त्तः।काययोगिषुमिथ्यादृष्टेर्नानाजीवा
पेक्षयासर्वकालः।एकजीवंप्रतिजघन्येनैकसमयः।उत्कर्षेणानंतःकालोऽसंख्येयाःपुद्गलपरिवर्त्ताः।शे
षाणांमनोयोगिवत्।अयोगिनांसामान्यवत्।वेदानुवादेनस्त्रीवेदेषुमिथ्यादृष्टेःनानाजीवापेक्षयासर्वका
लः।एकजीवंप्रतिजघन्येनांतर्मुहूर्त्तः।उत्कर्षेणपल्योपमशतपृथक्त्वं।सासादनसम्यग्दृष्ट्याद्यनिवृत्तिबा

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

दर्शनानां सामान्योक्तः कालः किंतु असंयतसम्यग्दृष्टेः नानाजीवापेक्षया सर्वः कालः एकजीवं प्रति जघन्ये
नांतर्मुहूर्त्तः। उत्कर्षेण पंचपंचाशत्पल्योपमानि देशोनानि। पुंवेदेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः का
लः एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण सागरोपमशतपृथक्त्वं। सासादनसम्यग्दृष्ट्याद्यनिवृत्तिबा
दरांतानां सामान्योक्तः नपुंसकवेदेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः एकजीवं प्रति जघन्येनांत
र्मुहूर्त्तः। उत्कर्षेण अनंतकालो असंख्येयाः पुद्गलपरिवर्त्ताः। सासादनसम्यग्दृष्ट्याद्यनिवृत्तिबादरांता
नां सामान्यवत्। किंतु असंयतसम्यग्दृष्टेः नानाजीवापेक्षया सर्वः कालः। एकजीवं प्रति जघन्येनांतर्मुहू
र्त्तः उत्कर्षेण त्रयस्त्रिंशत्सागरोपमानि देशोनानि। अपगतवेदानां सामान्यवत् कषायानुवादेन। चतुःक
षायाणां मिथ्यादृष्ट्याद्यप्रमत्तांतानां मनोयोगिवत्। द्वयोः उपशमकयोः क्षपकयोः केवललोभस्य च अ
कषायाणां च सामान्योक्तः कालः ज्ञानानुवादेन। मत्यज्ञानिश्रुताज्ञानिषु मिथ्यादृष्टिसासादनसम्यग्दृष्ट्योः सा २१

ना१ द्वयोः२

मान्यवत्। विभंगज्ञानिषु मिथ्यादृष्टेः। नानाजीवापेक्षया सर्वः कालः। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः।
उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि देशोनानि। सासादनसम्यग्दृष्टेः सामान्योक्तः कालः आभिनिबोधि
कश्रुतावधिमनःपर्ययज्ञानिनां केवलज्ञानिनां च सामान्योक्तः कालः संयमानुवादेन। सामायिकछेदो
पस्थापनपरिहारविशुद्धिसूक्ष्मसांपराययथाख्यातसंयतानां संयतासंयतानाम् असंयतानां च चतुर्णां सा
मान्योक्तः कालः दर्शनानुवादेन। चक्षुर्दर्शनिषु मिथ्यादृष्टेः नानाजीवापेक्षया सर्वः कालः एकजीवं प्र
ति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण द्वे सागरोपमसहस्रे सासादनसम्यग्दृष्ट्यादीनां क्षीणकषायांतानां
सामान्योक्तः कालः अचक्षुर्दर्शनिषु मिथ्यादृष्ट्यादिक्षीणकषायांतानां सामान्योक्तः कालः अवधि
केवलदर्शनिनोः अवधिकेवलज्ञानिवत्। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण त्रयस्त्रिंशत्सम
द्रशसप्तसागरोपमाणि सातिरेकाणि। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः सामान्योक्तः कालः
लेश्यानुवादेन कृष्णनीलकापोतलेश्यासु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः ×

२२ असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया सर्वकालः एकजीवंप्रतिजघन्येनांतर्मुहूर्त्तः। उत्कर्षेणत्रयस्त्रिं-
शत्सप्तदशसप्तसागरोपमाणिदेशोनानि। तेजःपद्मलेश्ययोःमिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योःना-
नाजीवापेक्षयासर्वकालः। एकजीवंप्रतिजघन्ये नांतर्मुहूर्त्तः। उत्कर्षेणद्वेसागरोपमेअष्टादशच
सातिरेकाणि। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः सामान्योक्तःकालः संयतासंयतप्रमत्ता-
प्रमत्तानांनानाजीवापेक्षयासर्वकालः। एकजीवंप्रतिजघन्येनैकःसमयउत्कर्षेणांतर्मुहूर्त्तः। शुक्ला-
लेश्यानांमिथ्यादृष्टेर्नानाजीवापेक्षयासर्वकालः। एकजीवंप्रतिजघन्येनांतर्मुहूर्त्तः। उत्कर्षेणए-
कत्रिंशत्सागरोपमाणिसातिरेकाणि। सासादनसम्यग्दृष्ट्यादिसयोगकेवल्यंतानांअलेश्यानांच
सामान्योक्तः। किंतुसंयतासंयतस्यनानाजीवापेक्षयासर्वकालः। एकजीवंप्रतिजघन्येनैकसमयः
उत्कर्षेणांतर्मुहूर्त्तः। भव्यानुवादेन। भव्येषुमिथ्यादृष्टेःनानाजीवापेक्षयाद्वौभंगौअनादिःसपर्यव- २२

१ सर्वकालः एकजीवापेक्षया +

सानः सादिःसपर्यवसानश्चतत्रसादिसपर्यवसानः जघन्येनांतर्मुहूर्त्तः। उत्कर्षेणार्धपुद्गलपरिवर्तो
देशोनः सासादनसम्यग्दृष्ट्याद्ययोगकेवल्यंतानांसामान्योक्तः अभव्यानांअनादिरपर्यवसानसम्य-
क्त्वानुवादेन। क्षायिकसम्यग्दृष्टीनांअसंयतसम्यग्दृष्ट्याद्ययोगकेवल्यंतानांसामान्योक्तः। क्षायो-
पशमिकसम्यग्दृष्टीनांचतुर्णांसामान्योक्तः औपशमिकसम्यक्त्वेषुअसंयतसम्यग्दृष्टिसंयतासंय-
तयोः। नानाजीवापेक्षयाजघन्येनांतर्मुहूर्त्तः। उत्कर्षेणपल्योपमासंख्येयभागः एकजीवंप्रतिज-
घन्यश्चोत्कृष्टश्चांतर्मुहूर्त्तः। प्रमत्ताप्रमत्तयोःचतुर्णामुपशमकानांच। नानाजीवापेक्षयाएकजी-
वापेक्षयाचजघन्येनैकःसमयः उत्कर्षेणांतर्मुहूर्त्तः सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टिमिथ्या-
दृष्टीनांचसामान्योक्तः संज्ञानुवादेन। संज्ञिषुमिथ्यादृष्ट्याद्यनिवृत्तिबादरांतानांपुंवेदवत्। शेषा-
णांसामान्योक्तः असंज्ञिनांमिथ्यादृष्टेः नानाजीवापेक्षयासर्वकालः एकजीवंप्रतिजघन्येनक्षुद्रभ-

२३ वग्रहणंउत्कर्षेणअनंतकालोअसंख्येयाःपुद्गलपरिवर्त्ताःतदुक्तव्ययपदेशारहितानांसामन्योक्तः।
अ हारानुवादेन॥आहारकेषुमिथ्यादृष्टेर्नानाजीवापेक्षयासर्वकालःएकजीवंप्रतिजघन्येनांतर्मुहूर्त्तः
उत्कर्षेणांगुलासंख्येयभागाःअसंख्येयासंख्येयाःउत्सर्पिण्यवसर्पिण्यःशेषाणांसामन्योक्तःअ
नाहारकेषुमिथ्यादृष्टेर्नानाजीवापेक्षयासर्वकालःएकजीवंप्रतिजघन्येनैकसमयः।उत्कर्षेणत्र
यःसमयाःसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्ट्योः।नानाजीवापेक्षयाजघन्येनैकःसमयः।उत्कर्षे
णावलिकायाः।असंख्येयभागः।एकजीवंप्रतिजघन्येनैकसमयःउत्कर्षेणद्वौसमयौसयोगकेव
लिनःनानाजीवापेक्षयाजघन्येनत्रयःसमयःउत्कर्षेणसंख्येयाःसमयाः।एकजीवंप्रतिजघन्यश्चो
त्कृष्टश्चत्रयःसमयाः।अयोगकेवलिनांसामान्योक्तःकालःकालोवर्णितः।अंतरंनिरूप्यते।विव
क्षितस्यगुणस्यगुणांतरसंक्रमेसतिपुनस्तत्प्राप्तेःप्रागंतरमंतरं।तद्द्विविधंसामान्येनविशेषेणच २३

सामान्येनतावन्मिथ्यादृष्टेःनानाजीवापेक्षयानास्त्यंतरं।एकजीवंप्रतिजघन्येनांतर्मुहूर्त्तः।उत्कर्षेणद्वे
षट्षष्टीदेशोनेसागरोपमाणांसासादनसम्यग्दृष्टेःअंतरंनानाजीवापेक्षयाजघन्येनैकसमयः।उत्कर्षे
णपल्योपमासंख्येयभागः।एकजीवंप्रतिजघन्येनपल्योपमासंख्येयभागः।उत्कर्षेणअर्द्धपुद्गलपरि
वर्त्तोदेशोनः।सम्यग्मिथ्यादृष्टेरंतरंनानाजीवापेक्षयासासादनवत्।एकजीवंप्रतिजघन्येनांतर्मुहूर्त्तः
उत्कर्षेणअर्द्धपुद्गलपरिवर्त्तोदेशोनः।असंयतसम्यग्दृष्ट्याद्यप्रमत्तांतानांनानाजीवापेक्षयानास्त्यं
तरं।एकजीवंप्रतिजघन्येनांतर्मुहूर्त्तः।उत्कर्षेणार्द्धपुद्गलपरिवर्त्तोदेशोनः।चतुर्णामुपशमकानां
नानाजीवापेक्षयाजघन्येनैकःसमयः।उत्कर्षेणवर्षपृथक्त्वं।एकजीवंप्रतिजघन्येनांत मुहूर्त्तः
उत्कर्षेणार्द्धपुद्गलपरिवर्त्तोदेशोनः।चतुर्णांक्षपकाणांअयोगकेवलिनांचनानाजीवापेक्षयाजघन्ये
नैकसमयःउत्कर्षेणषण्मासाः।एकजीवंप्रतिनास्त्यंतरं।सयोगकेवलिनांनानाजीवापेक्षयाएक

२५

जीवापेक्षया नास्त्यंतरं। विशेषेण गत्यनुवादेन। नरकगतौ नारकाणां सप्तसु पृथिवीषु मिथ्यादृष्ट्यसंयत
सम्यग्दृष्ट्योः नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण एकत्रिसप्तदशसप्त
दशद्वाविंशतित्रयस्त्रिंशत्सागरोपमाणि देशोनानि। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः नाना
जीवापेक्षया जघन्येनैकसमयः। उत्कर्षेण पल्योपमासंख्येयभागः। एकजीवं प्रति जघन्येन पल्योपमासं
ख्येयभागः अंतर्मुहूर्त्तश्च। उत्कर्षेण एकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमाणि दे
शोनानि तिर्यग्गतौ तिरश्चां मिथ्यादृष्टेर्नानाजीवापेक्षया नास्त्यंतरं एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः
उत्कर्षेण त्रीणि पल्योपमानि देशोनानि। सासादनसम्यग्दृष्ट्यादीनां चतुर्णां सामान्योक्तमंतरं। म
नुष्यगतौ मनुष्याणां मिथ्यादृष्टेः तिर्यग्वत्। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः नानाजीवापे
क्षया सामान्यवत्। एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागोंतर्मुहूर्त्तश्च उत्कर्षेण त्रीणि पल्योप २५

मानि पूर्वकोटीपृथक्त्वैरभ्यधिकानि। असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया नास्त्यंतरं। एकजीवापेक्षया
जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण त्रीणि पल्योपमानि पूर्वकोटीपृथक्त्वैरभ्यधिकानि। संयतासंयतप्रमत्ता
प्रमत्तानां नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण पूर्वकोटीपृथ
क्त्वानि चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्क
र्षेण पूर्वकोटीपृथक्त्वानि शेषाणां सामान्यवत्। देवगतौ देवानां मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योर्नाना
जीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण एकत्रिंशत्सागरोपमाणि देशो
नानि सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्ये
न पल्योपमासंख्येयभागोंतर्मुहूर्त्तश्च। उत्कर्षेण एकत्रिंशत्सागरोपमाणि देशोनानि। इंद्रियानुवा
देन। एकेंद्रियाणां नानाजीवापेक्षया नास्त्यंतरं। एकजीवापेक्षया जघन्येन क्षुद्रभवग्रहणं उत्कर्ष

णद्वेसागरोपमसहस्रे पूर्वकोटीपृथक्त्वैरभ्यधिके ॥ विकलेंद्रियाणां नानाजीवापेक्षया नास्त्यंतरं ॥ एकजी
वं प्रति जघन्येन क्षुद्रभवग्रहणं उत्कर्षेणानंतः कालोऽसंख्येयाः पुद्गलपरिवर्ताः एवमिंद्रियं प्रत्यंतर
मुक्तं गुणं प्रति उभयतोपि नास्त्यंतरं ॥ पंचेंद्रियेषु मिथ्यादृष्टेः सामान्यवत् ॥ सासादनसम्यग्दृष्टिसम्यग्मि
थ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत् ॥ एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागोंतर्मुहूर्त
श्च उत्कर्षेण सागरोपमसहस्रं पूर्वकोटीपृथक्त्वैरभ्यधिकं ॥ चतुर्णामुपशमकानां नानाजीवापेक्षया सा
मान्यवत् ॥ एकजीवं प्रति जघन्येनांतर्मुहूर्तः उत्कर्षेण सागरोपमसहस्रं ॥ पूर्वकोटीपृथक्त्वैरभ्यधि
कं शेषाणां सामान्योक्तं ॥ कायानुवादेन ॥ पृथिव्यप्तेजोवायुकायिकानां नानाजीवापेक्षया नास्त्यंतरं ए
कजीवं प्रति जघन्येन क्षुद्रभवग्रहणं उत्कर्षेणानंतः कालोऽसंख्येयाः पुद्गलपरिवर्ताः वनस्पतिका
यिकानां नानाजीवापेक्षया नास्त्यंतरं ॥ एकजीवापेक्षया जघन्येन क्षुद्रभवग्रहणं ॥ उत्कर्षेणासंख्येयाः लोकाः ॥ २५
असंयतसम्यग्दृष्ट्याद्यप्रमत्तांतानां नानाजीवापेक्षया नास्त्यंतरं एकजीवं प्रति जघन्येनांतर्मुहूर्तः उत्कर्षेण सागरोपमसहस्रं पूर्वको
टीपृथक्त्वैरभ्यधिकं

एवं कायं प्रत्यंतरं ॥ उक्तं गुणं प्रति उभयतो नास्त्यंतरं ॥ त्रसकायिकेषु मिथ्यादृष्टेः सामान्यवत् ॥ सासादनसम्य
ग्दृष्टिसम्यग्मिथ्यादृष्ट्योः नानाजीवापेक्षया सामान्यवत् ॥ एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागो
ंतर्मुहूर्तश्च ॥ उत्कर्षेण द्वे सागरोपमसहस्रे पूर्वकोटीपृथक्त्वैरभ्यधिके असंयतसम्यग्दृष्ट्याद्यप्रमत्ता
ंतानां नानाजीवापेक्षया नास्त्यंतरं ॥ एकजीवं प्रति जघन्येनांतर्मुहूर्तः ॥ उत्कर्षेण द्वे सागरोपमसहस्रे पूर्व
कोटीपृथक्त्वैरभ्यधिके ॥ चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत् ॥ एकजीवं प्रति जघन्येनांत
र्मुहूर्तः उत्कर्षेण द्वे सागरोपमसहस्रे पूर्वकोटीपृथक्त्वैरभ्यधिके ॥ शेषाणां पंचेंद्रियवत् ॥ योगानुवा
देन ॥ कायवाङ्मनसयोगिनां मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिसंयतासंयतप्रमत्ताप्रमत्तसयोगिकेवलिनां ना
नाजीवापेक्षया एकजीवापेक्षया च नास्त्यंतरं ॥ सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः नानाजीवापेक्ष
या सामान्यवत् ॥ एकजीवं प्रति नास्त्यंतरं ॥ चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत् ॥ एकजीवं

DR. BHAU DAJI MEMORIAL

२६ प्रति नास्त्यंतरं। चतुर्णां क्षपकाणां अयोगकेवलिनां च सामान्यवत्। वेदानुवादेन स्त्रीवेदेषु मिथ्यादृष्टेः ना
नाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण पंचपंचाशत्पल्योपमानि देशोनानि
ति। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येन पल्यो
पमासंख्येयभागोंऽतर्मुहूर्त्तश्च। उत्कर्षेण पल्योपमशतपृथक्त्वं। असंयतसम्यग्दृष्ट्याद्यप्रमत्तांतानां नाना
जीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण पल्योपमशतपृथक्त्वं। द्वयोरुपशमक
योः नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण पल्योपमशतपृथक्त्वं। द्वयोः
क्षपकयोः नानाजीवापेक्षया जघन्येनैकसमयः। उत्कर्षेण वर्षपृथक्त्वं। एकजीवं प्रति नास्त्यंतरं। पुंवेदेषु
मिथ्यादृष्टेः सामान्यवत्। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः नानाजीवापेक्षया सामान्यवत्। एकजीवं
प्रति जघन्येन पल्योप संख्येयभागोंतर्मुहूर्त्तश्च। उत्कर्षेण सागरोपमशतपृथक्त्वं। असंयतसम्यग्दृष्ट्या २६
मा

द्यप्रमत्तांतानां नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण सागरोपमशतपृथक्त्वं।
द्वयोरुपशमकयोः नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण सागरोपम
शतपृथक्त्वं। द्वयोः क्षपकयोः। नानाजीवापेक्षया जघन्येनैकसमयः। उत्कर्षेण संवत्सरः सातिरेकः। एकजी
वं प्रति नास्त्यंतरं। नपुंसकवेदेषु मिथ्यादृष्टेः नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहू
र्त्तः। उत्कर्षेण त्रयस्त्रिंशत्सागरोपमानि देशोनानि। सासादनसम्यग्दृष्ट्याद्यनिवृत्त्युपशमकांतानां सामा
न्योक्तं। द्वयोः क्षपकयोः स्त्रीवेदवत्। अपगतवेदेष्वनिवृत्तिबादरोपशमकसूक्ष्मसांपरायोपशमकयोः ना
नाजीवापेक्षया सामान्योक्तं। एकजीवं प्रति जघन्यमुत्कृष्टं चांतर्मुहूर्त्तः। उपशांतकषायस्य नानाजीवा
पेक्षया सामान्यवत्। एकजीवं प्रति नास्त्यंतरं। शेषाणां सामान्यवत्। कषायानुवादेन क्रोधमानमायालो
भकषायाणां मिथ्यादृष्ट्याद्यनिवृत्त्युपशमकांतानां मनोयोगिवत्। द्वयोः क्षपकयोः नानाजीवापेक्षया

२१ जघन्येनैकसमयः। उत्कर्षेण संवत्सरः सातिरेकः। केवललोभस्य सूक्ष्मसांपरायोपशमकस्य नानाजीवापे-
क्षया सामान्यवत्। एकजीवं प्रति नास्त्यंतरं। क्षपकस्य तस्य सामान्यवत्। अकषायेषु उपशांतकषायस्य ना-
नाजीवापेक्षया सामान्यवत्। एकजीवं प्रति नास्त्यंतरं। शेषाणां त्रयाणां सामान्यवत्। ज्ञानानुवादेन मत्य-
ज्ञानश्रुताज्ञानविभंगज्ञानिषु मिथ्यादृष्टेः नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यंतरं। सासादनस-
म्यग्दृष्टेः नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति नास्त्यंतरं। आभिनिबोधिकश्रुतावधिज्ञानिषु अ-
संयतसम्यग्दृष्टेः नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण पूर्वकोटी दे-
शोना। संयतासंयतस्य नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण षट्ष-
ष्टिसागरोपमाणि सातिरेकाणि। प्रमत्ताप्रमत्तयोर्नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनां-
तर्मुहूर्त्तः। उत्कर्षेण [illegible]त्सागरोपमाणि सातिरेकाणि। चतुर्णामुपशमकानां नानाजीवापेक्षया सामा- २१

॰त्रयस्त्र+

अप्रमत्त२

न्यवत्। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण षट्षष्टिसागरोपमाणि सातिरेकाणि। चतुर्णां क्षपका-
णां सामान्यवत्। किंतु अवधिज्ञानिनां नानाजीवापेक्षया जघन्येनैकः समयः। उत्कर्षेण वर्षपृथक्त्वं। एक-
जीवं प्रति नास्त्यंतरं। मनःपर्ययज्ञानिषु प्रमत्तसंयतयोर्नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्ये-
नोत्कृष्टेनांतर्मुहूर्त्तः। चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येनां-
उत्कर्षेण पूर्वकोटी देशोना+ तर्मुहूर्त्तः। चतुर्णां क्षपकाणां अवधिज्ञानिवत्। द्वयोः केवलज्ञानिनोः सामान्यवत्। संयमानुवादेन
सामायिकछेदोपस्थापनशुद्धिसंयतेषु प्रमत्ताप्रमत्तसंयतयोः नानाजीवापेक्षया नास्त्यंतरं। एकजीवं
प्रति जघन्यमुत्कृष्टं चांतर्मुहूर्त्तः। द्वयोरुपशमकयोः नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघ-
न्येनांतर्मुहूर्त्तः। उत्कर्षेण पूर्वकोटी देशोना। द्वयोः क्षपकयोः सामान्यवत्। परिहारशुद्धिसंयतेषु प्रमत्ताप्र-
मत्तयोर्नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्यमुत्कृष्टं चांतर्मुहूर्त्तः। सूक्ष्मसांपरायशुद्धिसंय-

२८ मेउपशमकस्य नानाजीवापेक्षया सामान्यवत् । एकजीवं प्रति नास्त्यंतरं । तस्यैव क्षपकस्य सामान्यवत् । पश्चा
ख्याते ऽकषायवत् । संयतासंयतस्य नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यंतरं । असंयतेषु मिथ्या
दृष्टेर्नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि
देशोनानि । शेषाणां त्रयाणां सामान्यवत् । दर्शनानुवादेन चक्षुर्दर्शनिषु मिथ्यादृष्टेः सामान्यवत् । सा
सादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत् । एकजीवं प्रति जघन्येन पल्योपमा
संख्येयभागोंतर्मुहूर्त्तश्च । उत्कर्षेण द्वे सागरोपमसहस्रे देशोने । असंयतसम्यग्दृष्ट्याद्यप्रमत्तांतानां ना घ
नाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः । उत्कर्षेण द्वे सागरोपमसहस्रे देशोने । चतु
र्णामुपशमकानां नानाजीवापेक्षया सामान्यवत् । एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः । उत्कर्षेण द्वे साग
रोपमसहस्रे देशोने । चतुर्णां क्षपकाणां सामान्योक्तं । अचक्षुर्दर्शनिषु मिथ्यादृष्ट्यादिक्षीणकषायांता २८

नां सामान्योक्तमंतरं । अवधिदर्शनिनः अवधिज्ञानिवत् । केवलदर्शनिनः केवलज्ञानवत् । लेश्यानुवादेन कृ
ष्णनीलकापोतलेश्येषु मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योः नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रति जघन्येनांत
र्मुहूर्त्तः । उत्कर्षेण त्रयस्त्रिंशत्सप्तदशसप्तसागरोपमाणि देशोनानि । सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः
नानाजीवापेक्षया सामान्यवत् । एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागोंतर्मुहूर्त्तश्च उत्कर्षेण त्रयस्त्रिं
शत्सप्तदशसप्तसागरोपमाणि देशोनानि । तेजःपद्मलेश्ययोः मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योः नानाजीवापे
क्षया नास्त्यंतरं । एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः । उत्कर्षेण द्वे सागरोपमे अष्टादश सागरोपमाणि सा
तिरेकाणि । सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः नानाजीवापेक्षया सामान्यवत् । एकजीवं प्रति जघ
न्येन पल्योपमासंख्येयभागः अंतर्मुहूर्त्तश्च उत्कर्षेण द्वे सागरोपमे अष्टादश च सागरोपमाणि सातिरेका
णि । संयतासंयतप्रमत्ताप्रमत्तसंयतानां नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यंतरं । शुक्ललेश्येषु मि

२५ थ्यादृष्ट्यसंयतसम्यग्दृष्ट्योः नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रतिजघन्येनांतर्मुहूर्त्तः । उत्कर्षेणएक
त्रिंशत्सागरोपमाणि देशोनानि । सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः नानाजीवापेक्षया सामान्यवत् । ए
कजीवं प्रतिजघन्येनपल्योपमासंख्येयभागोंतर्मुहूर्त्तश्च । उत्कर्षेणैक त्रिंशत्सागरोपमानि देशोनानि । संय
तासंयतप्रमत्तसंयतयोः तेजोलेश्यावत् । अप्रमत्तसंयतस्य नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रतिजघ
न्यमुत्कृष्टं चांतर्मुहूर्त्तश्च । त्रयाणामुपशमकानां नानाजीवापेक्षया सामान्यवत् । एकजीवं प्रतिजघन्य
मुत्कृष्टं चांतर्मुहूर्त्तः । उपशांतकषायस्य नानाजीवापेक्षया सामान्यवत् । एकजीवं प्रति नास्त्यंतरं । चतुर्णां
क्षपकाणां सयोगकेवलिनां अलेश्यानां च सामान्यवत् । भव्यानुवादेन भव्येषु मिथ्यादृष्ट्याद्ययोगकेव
ल्यंतानां सामान्यवत् । अभव्यानां नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यंतरं । सम्यक्त्वानुवादेन क्षायि
कसम्यग्दृष्टिष्वसंयतसम्यग्दृष्टेर्नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रतिजघन्येनांतर्मुहूर्त्तः । उत्कर्षेण २५

पूर्वकोटी देशोना । संयतासंयतप्रमत्ताप्रमत्तसंयतानां नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रतिजघन्येनां
तर्मुहूर्त्तः । उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि सातिरेकाणि । चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्य
वत् । एकजीवं प्रतिजघन्येनांतर्मुहूर्त्तः । उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि सातिरेकाणि । शेषाणां सामान्यव
४क त् । क्षायोपशमिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रतिजघन्येनांतर्मु
हूर्त्तः । उत्कर्षेण पूर्वकोटी देशोना । संयतासंयतस्य नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रतिजघन्येनां
तर्मुहूर्त्तः । उत्कर्षेण षट्षष्टिसागरोपमाणि देशोनानि । प्रमत्ताप्रमत्तसंयतयोः नानाजीवापेक्षया नास्त्यं पे
तरं । एकजीवं प्रतिजघन्येनांतर्मुहूर्त्तः । उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि सातिरेकाणि । औपशमिकसम्य
ग्दृष्टिषु असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया जघन्येनैकसमयः । उत्कर्षेण सप्तरात्रिंदिनानि । एकजीवं प्र
तिजघन्यमुत्कृष्टं चांतर्मुहूर्त्तः । संयतासंयतस्य नानाजीवापेक्षया जघन्येनैकसमयः । उत्कर्षेण चतुर्दशरा

३० त्रिदिवानि। एकजीवं प्रति जघन्यमुत्कृष्टं चांतर्मुहूर्त्तः। प्रमत्ताप्रमत्तसंयतयोः नानाजीवापेक्षया जघन्येनैकः
समयः उत्कर्षेण पंचदशरात्रिदिवानि। एकजीवं प्रति जघन्यमुत्कृष्टं चांतर्मुहूर्त्तः त्रयाणामुपशमकानां ना
नाजीवापेक्षया जघन्येनैकः समयः। उत्कर्षेण वर्षपृथक्त्वं एकजीवं प्रति जघन्यमुत्कृष्टं चांतर्मुहूर्त्तः उपशां
तकषायस्य नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति नास्त्यंतरं। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः
नानाजीवापेक्षया जघन्येनैकः समयः उत्कर्षेण पल्योपमासंख्येयभागः। एकजीवं प्रति नास्त्यंतरं। मिथ्या
दृष्टेर्नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यंतरं। संज्ञानुवादेन संज्ञिषु मिथ्यादृष्टेः सामान्यवत्॥
सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येन पल्योप
मासंख्येयभागोंतर्मुहूर्त्तश्च उत्कर्षेण सागरोपमशतपृथक्त्वं असंयतसम्यग्दृष्ट्याद्यप्रमत्तांतानां नाना
जीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण सागरोपमशतपृथक्त्वं चतुर्णामु ३०
१ चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत् एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः उत्कर्षेण सागरोपमशतपृथक्त्वं

पकानां सामान्यवत् असंज्ञिनां नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यंतरं तदुभयव्यपदेशरहितानां सा
मान्यवत् आहारानुवादेन आहारकेषु मिथ्यादृष्टेः सामान्यवत् सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः ना
नाजीवापेक्षया सामान्यवत् एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागोंतर्मुहूर्त्तश्च उत्कर्षेण अंगुला
संख्येयभागः असंख्येयासंख्येया उत्सर्पिण्यवसर्पिण्यः असंयतसम्यग्दृष्ट्याद्यप्रमत्तांतानां नानाजी
वापेक्षया नास्त्यंतरं एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः उत्कर्षेणांगुलासंख्येयभागाः असंख्येयासंख्येयाः
उत्सर्पिण्यवसर्पिण्यः चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत् एकजीवं प्रति जघन्येनां
तर्मुहूर्त्तः उत्कर्षेणांगुलासंख्येयभागोऽसंख्येयासंख्येयाः उत्सर्पिण्यवसर्पिण्यः चतुर्णां क्षपकाणां
सयोगिकेवलिनां च सामान्यवत् अनाहारकेषु मिथ्यादृष्टेः नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यं
तरं सासादनसम्यग्दृष्टेः नानाजीवापेक्षया जघन्येनैकः समयः उत्कर्षेण पल्योपमासंख्येयभागः एक

DR BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

३१ जीवंप्रतिनास्त्यंतरं असंयतसम्यग्दृष्टेः नानाजीवापेक्षयाजघन्येनैकसमयः उत्कर्षेणमासपृथक्त्वं एक
जीवंप्रतिनास्त्यंतरं सयोगिकेवलिनः नानाजीवापेक्षयाजघन्येनैकसमयः उत्कर्षेणवर्षपृथक्त्वंएक
३.त्र जीवंप्रतिनास्त्यंतरं अयोगिकेवलिनः नानाजीवापेक्षयाजघन्येनैकसमयः उत्कर्षेणषण्मासाः एक
जीवंप्रतिनास्त्यंतरं अंतरमवगतं भावोविधीयते सद्विविधः सामान्येनविशेषेणच सामान्येन
तावत् मिथ्यादृष्टिरितिऔदयिकोभावः सासादनसम्यग्दृष्टिरितिपारिणामिकोभावः सम्यग्मिथ्यादृष्टि
रितिक्षायोपशमिकोभावः असंयतसम्यग्दृष्टिरिति औपशमिकोवाक्षायिकोवाक्षायोपशमिकोवा
भावः असंयतः पुनः औदयिकेनभावेनसंयतासंयतः प्रमत्तसंयतोऽप्रमत्तसंयतइतिचक्षायोपश
मिकोभावः चतुर्णामुपशमकानामितिऔपशमिकोभावः चतुर्षुक्षपकेषुसयोगायोगकेवलिनोःक्षा
यिकोभावः विशेषेण गत्यनुवादेन नरकगतौप्रथमायांपृथिव्यांनारकाणांमिथ्यादृष्ट्याद्यसंयतसम्य ३१

न्२

ग्दृष्ट्यंतानांसामान्यवत् द्वितीयादिष्वासप्तम्याः मिथ्यादृष्टिसासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टीनांसामा
न्यवत् असंयतसम्यग्दृष्टेःऔपशमिकोवाक्षायोपशमिकोवाभावः असंयतःपुनःऔदयिकेनभावेन ति
र्यग्गतौतिरश्चांमिथ्यादृष्ट्यादिसंयतासंयतांतानांसामान्यवत् मनुष्यगतौ मनुष्याणांमिथ्यादृष्ट्याद्ययोगि ३.प्र
केवल्यंतानांसामान्यमेव देवगतौ देवानांमिथ्यादृष्ट्याद्यसंयतसम्यग्दृष्ट्यंतानांसामान्यवत् इंद्रियानु
वादेन एकेंद्रियविकलेंद्रियाणांऔदयिकोभावः पंचेंद्रियेषुमिथ्यादृष्ट्याद्ययोगकेवल्यंतानांसामान्यव
त् कायानुवादेन स्थावरकायिकानांऔदयिकोभावः त्रसकायिकानांसामान्यमेवः योगानुवादेन का
यवाङ्मनसयोगिनांमिथ्यादृष्ट्यादिसयोगिकेवल्यंतानांअयोगिकेवलिनांचसामान्यमेवा वेदानुवादे
न स्त्रीपुंनपुंसकवेदानांअवेदानांचसामान्यवत् कषायानुवादेन क्रोधमानमायालोभकषायाणांअक
षायाणांचसामान्यवत् ज्ञानानुवादेन मत्यज्ञानश्रुताज्ञानविभंगज्ञानिनांमतिश्रुतावधिमनःपर्ययके

असंयतानां च १

वलज्ञानिनां च सामान्यवत् संयमानुवादेन सर्वेषां संयतानां संयतासंयतानां सामान्यवत् दर्शनानुवा
देन चक्षुर्दर्शनाचक्षुर्दर्शनावधिदर्शनकेवलदर्शनिनां सामान्यवत् लेश्यानुवादेन षड्लेश्यानामलेश्या
नां च सामान्यवत् भव्यानुवादेन भव्यानां मिथ्यादृष्ट्याद्ययोगकेवल्यंतानां सामान्यवत् अभव्यानां पारिणा
मिको भावः सम्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टिष्वसंयतसम्यग्दृष्टेः क्षायिको भावः असंयतत्वमौद
यिकेन भावेन संयतासंयतप्रमत्ताप्रमत्तसंयतानां क्षायोपशमिको भावः क्षायिकं सम्यक्त्वं चतुर्णामुप
शमकानामौपशमिको भावः क्षायिकं सम्यक्त्वं शेषाणां सामान्यवत् क्षायोपशमिकसम्यक्त्वे असंयतः
पुनः औदयिकेन भावेन संयतासंयतप्रमत्ताप्रमत्तसंयतानां क्षायोपशमिको भावः क्षायोपशमिकं स
म्यक्त्वं औपशमिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेरौपशमिको भावः औपशमिकं सम्यक्त्वं चतुर्णामुपशमका
नामौपशमिको भावः औपशमिकं सम्यक्त्वं सासादनसम्यग्दृष्टेः पारिणामिको भावः सम्यग्मिथ्यादृष्टेः क्षा

४ क्षायोपशमिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेः क्षायोपशमिको भावः

क्षायिकं सम्यक्त्वं

असंयतः पुनः औदयिकेन भावेन संयतासंयतप्रमत्ताप्रमत्तसंयतानां क्षायोपशमिको भावः मिको भावः औपशमिकसम्यक्त्वे

२८८

योपशमिको भावः मिथ्यादृष्टेरौदयिको भावः संज्ञ्यनुवादेन संज्ञिनां सामान्यवत् असंज्ञिनामौदयिको भा
वः तदुभयव्यपदेशरहितानां सामान्यवत् आहारानुवादेन आहारकाणामनाहारकाणां च सामान्यवत्
भावः परिसमाप्तः अल्पबहुत्वमुपवर्ण्यते तद्द्विविधं सामान्येन विशेषेण च सामान्येन तावत् त्रयः
उपशमकाः सर्वतः स्तोकाः स्वगुणस्थानकालेषु प्रवेशेन तुल्यसंख्या उपशांतकषायास्तावंत एव त्रयः क्ष
पकाः संख्येयगुणाः क्षीणकषायवीतरागछद्मस्थाः तावंत एव सयोगकेवलिनो अयोगकेवलिनश्च प्रवे
शेन तुल्यसंख्याः सयोगकेवलिनः स्वकालेन समुदिताः संख्येयगुणाः अप्रमत्तसंयताः संख्येयगुणाः प्र
मत्तसंयताः संख्येयगुणाः संयतासंयताः असंख्येयगुणाः सासादनसम्यग्दृष्टयो असंख्येयगुणाः सम्य
ग्मिथ्यादृष्टयः असंख्येयगुणाः असंयतसम्यग्दृष्टयोऽसंख्येयगुणाः मिथ्यादृष्टयोऽनंतगुणाः विशेषे
ण गत्यनुवादेन नरकगतौ सर्वासु पृथिवीषु नारकेषु सर्वतः स्तोकाः सासादनसम्यग्दृष्टयः सम्य

३३ ग्मिथ्यादृष्टयः संख्येयगुणाः असंयतसम्यग्दृष्टयोऽसंख्येयगुणाः मिथ्यादृष्टयोऽसंख्येयगुणाः तिर्यग्गतौ
तिरश्चां सर्वतः स्तोकाः संयतासंयताः इतरेषां सामान्यवत् मनुष्यगतौ मनुष्याणां उपशमकादिप्रमत्तसं
यतांतानां सामान्यवत् ततः संख्येयगुणाः संयतासंयताः सासादनसम्यग्दृष्टयः संख्येयगुणाः सम्यग्मि
थ्यादृष्टयः संख्येयगुणाः असंयतसम्यग्दृष्टयः संख्येयगुणाः मिथ्यादृष्टयोऽसंख्येयगुणाः देवगतौ
देवानां नारकवत् इंद्रियानुवादेन एकेंद्रियविकलेंद्रियेषु गुणस्थानभेदो नास्तीत्यल्पबहुत्वाभावः इंद्रि
यं प्रत्युच्यते पंचेंद्रियाद्येकेंद्रियांतं उत्तरोत्तरे बहवः पंचेंद्रियाणां सामान्यवत् अयं तु विशेषः मि
थ्यादृष्टयोऽसंख्येयगुणाः कायानुवादेन स्थावरकायेषु गुणस्थानभेदाभावादल्पबहुत्वाभावः का
यं प्रत्युच्यते सर्वतः तेजःकायिका अल्पास्ततो बहवः पृथिवीकायिकाः ततः अप्कायिकाः ततः वातका
यिकाः सर्वतः अनंतगुणाः वनस्पतयः त्रसकायिकायिकानां पंचेंद्रियवत् योगानुवादेन वाक्मनसयो ३३

गिनां पंचेंद्रियवत् काययोगिनां सामान्यवत् वेदानुवादेन स्त्रीपुंवेदानां पंचेंद्रियवत् नपुंसकवेदानाम
वेदानां च सामान्यवत् कषायानुवादेन क्रोधमानमायाकषायाणां पुंवेदवत् अयं तु विशेषः मिथ्यादृष्ट
योऽनंतगुणाः लोभकषायाणां द्वयोरुपशमकयोः तुल्यसंख्याः क्षपकाः संख्येयगुणाः सूक्ष्मसांपरायशु
द्ध्युपशमकसंयता विशेषाधिकाः सूक्ष्मक्षपकाः संख्येयगुणाः शेषाणां सामान्यवत् ज्ञानानुवादेन मत्य
ज्ञानिश्रुताज्ञानिषु सर्वतः स्तोकाः सासादनसम्यग्दृष्टयः मिथ्यादृष्टयोऽनंतगुणाः विभंगज्ञानिषु
सर्वतः स्तोकाः सासादनसम्यग्दृष्टः मिथ्यादृष्टयोऽसंख्येयगुणाः मतिश्रुतावधिज्ञानिषु सर्वतः स्तोकाः
चत्वारः उपशमकाः चत्वारः क्षपकाः संख्येयगुणाः अप्रमत्तसंयताः संख्येयगुणाः संयतासंयताः असं प्रमत्तसंयताः संख्येय गुणाः
ख्येयगुणाः असंयतसम्यग्दृष्टयोऽसंख्येयगुणाः मनःपर्ययज्ञानिषु सर्वतः स्तोकाश्चत्वारः उपशमकाः
चत्वारः क्षपकाः संख्येयगुणाः अप्रमत्ताः संख्येयगुणाः प्रमत्तसंयताः संख्येयगुणाः केवलज्ञानिषु अ

३४ योगकेवलिभ्यः सयोगकेवलिनः संख्येयगुणाः संयमानुवादेन सामायिकछेदोपस्थापनशुद्धिसंयतेषुद्व
योरुपशमकयोः तुल्यसंख्या ततः संख्येयगुणौ क्षपकौ अप्रमत्ताः संख्येयगुणाः प्रमत्ताः संख्येयगुणाः परि
हारशुद्धिसंयतेषु अप्रमत्तेभ्यः प्रमत्ताः संख्येयगुणाः सूक्ष्मसांपरायशुद्धिसंयतेषु उपशमकेभ्यः क्षपकाः
संख्येयगुणाः यथाख्यातविहारशुद्धिसंयतेषु उपशांतकषायेभ्यः क्षीणकषायाः संख्येयगुणाः अयोगके
वलिनः तावंत एव सयोगकेवलिनः संख्येयगुणाः संयतासंयतानां नास्त्यल्पबहुत्वं असंयतेषु सर्वतः
स्तोकाः सासादनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयोऽसंख्येयगुणाः असंयतसम्यग्दृष्टयोऽसंख्येयगुणाः
मिथ्यादृष्टयोऽनंतगुणाः दर्शनानुवादेन चक्षुर्दर्शनिनां मनोयोगिवत् अचक्षुर्दर्शनिनां काययोगिव
त् अवधिदर्शनिनां अवधिज्ञानिवत् केवलदर्शनिनां केवलज्ञानवत् लेश्यानुवादेन कृष्णनीलकापो
तलेश्यानां असंयतवत् तेजःपद्मलेश्यानां सर्वतः स्तोकाः अप्रमत्ताः संख्येयगुणाः एवमितरेषामपि पंचे ३४

१ प्रमत्ताः

न्द्रियवत् शुक्ललेश्यानां सर्वतः स्तोकाः उपशमकाः क्षपकाः संख्येयगुणाः सयोगकेवलिनः संख्येयगुणाः
अप्रमत्तसंयताः संख्येयगुणाः प्रमत्तसंयताः संख्येयगुणाः संयतासंयताः असंख्येयगुणाः सासादनसम्य
ग्दृष्टयो असंख्येयगुणाः सम्यग्मिथ्यादृष्टयः संख्येयगुणाः मिथ्यादृष्टयोऽसंख्येयगुणाः असंयतसम्य
ग्दृष्टयोऽसंख्येयगुणाः भव्यानुवादेन भव्यानां सामान्यवत् अभव्यानां नास्त्यल्पबहुत्वं सम्यक्त्वानुवादे
न क्षायिकसम्यग्दृष्टिषु सर्वतः स्तोकाः चत्वारः उपशमकाः इतरेषां प्रमत्तांतानां सामान्यवत् ततः संय
तासंयताः संख्येयगुणाः असंयतसम्यग्दृष्टयोऽसंख्येयगुणाः क्षायोपशमिकसम्यग्दृष्टिषु सर्वतः स्तोकाः
अप्रमत्ताः प्रमत्ताः संख्येयगुणाः संयतासंयताः असंख्येयगुणाः असंयतसम्यग्दृष्टयोऽसंख्येयगुणाः औप
शमिकसम्यग्दृष्टीनां सर्वतः स्तोकाः चत्वारः उपशमकाः अप्रमत्ताः संख्येयगुणाः प्रमत्ताः असंख्येयगुणाः
संयतासंयताः असंख्येयगुणाः असंयतसम्यग्दृष्टयोऽसंख्येयगुणाः शेषाणां नास्त्यल्पबहुत्वं विपक्षे के

ते १

३५ कगुणस्थानग्रहणात् संज्ञानुवादेन संज्ञिनां चक्षुर्दर्शनिवत् असंज्ञिनां नास्त्यल्पबहुत्वं तदुभयव्यप
देशरहितानां केवलज्ञानिवत् आहारानुवादेन आहारकाणां काययोगिवत् अनाहारकाणां सर्वतः स्तो
काः सयोगकेवलिनः अयोगकेवलिनः संख्येयगुणाः सासादनसम्यग्दृष्टयोऽसंख्येयगुणाः असंयतस
म्यग्दृष्टयोऽसंख्येयगुणाः मिथ्यादृष्टयोऽनंतगुणाः एवं मिथ्यादृष्ट्यादीनां गत्यादिषु मार्गणा कृता सामा
न्येन तत्र सूक्ष्मभेदः आगमाविरोधेनानुसर्तव्यः एवं सम्यग्दर्शनस्यादावुद्दिष्टस्य लक्षणोत्पत्तिस्वामि
विषयन्यासाधिगमोपायाः निर्दिष्टाः तत्संबंधेन च जीवादीनां संपरिमाणादि निर्दिष्टं तदनंतरं सम्यग्ज्ञानं ज्ञा४
विचारार्हमित्याह   मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानं ९ ज्ञानशब्दः प्रत्येकं परिसमाप्यते म
तिज्ञानं श्रुतज्ञानं अवधिज्ञानं मनःपर्ययज्ञानं केवलज्ञानमिति इंद्रियैर्मनसा च यथास्वमर्थो मन्यते अन ३५
या मनुते मननमात्रं वा मतिः तदावरणक्षयोपशमे सति निरूप्यमाणं श्रूयते अनेन शृणोति श्रवणमात्रं वा

१कर्म×

श्रुतं अनयोः प्रत्यासन्ननिर्देशः कृतः कारणकार्यभावात् तथा च वक्ष्यते श्रुतं मतिपूर्वमिति अवाग्धाना
दवच्छिन्नविषयत्वादवधिः परकीयमनोगतोऽर्थो मन इत्युच्यते साहचर्यात्तस्य पर्ययणं परिगमनं मनः
पर्ययः मतिज्ञानप्रसंग इति चेन्नापेक्षामात्रत्वात् क्षयोपशमशक्तिमात्रविजृंभितं तत् केवलं स्वपरम
नोभिर्व्यपदिश्यते यथाभ्रे चंद्रमसं पश्येति बाह्येनाभ्यंतरेण च तपसा यदर्थमर्थिनः केवंते सेवंते तत्के
१८ वलमसहायमिति वा अंते प्राप्यत इत्यंते क्रियते तस्य प्रत्यासन्नत्वात् तत्समीपे मनःपर्ययग्रहणं कुतः प्र
त्यासत्तेः संयमैकाधिकरणत्वात् तस्यावधिः विप्रकृष्टः कृतः विप्रकृष्टांतरत्वात् प्रत्यक्षात् परोक्षं पूर्वमु सुक्तं×
गमत्वात् श्रुतपरिचितानुभूता हि मतिश्रुतपद्धतिः सर्वेण प्राणिगणेन प्रायः प्राप्यते यतः एवमेतत्पंच
विधं ज्ञानं तद्भेदादयश्च पुरस्ताद्वक्ष्यंते प्रमाणनयैरधिगम इत्युक्तं प्रमाणं च केषांचित् ज्ञानमभिमतं के
के षांचित् सन्निकर्षः केषांचिदिंद्रियमिति अतोऽधिकृतानामेव मत्यादीनां प्रमाणत्वख्यापनार्थमाह   तत्प्र

३६ माणे। तद्वचनं किमर्थं प्रमाणांतरपरिकल्पनानिवृत्त्यर्थं सन्निकर्षः प्रमाणं इंद्रियं प्रमाणमिति केचित् क
ल्पयंति तन्निवृत्त्यर्थं तदित्युच्यते तदेव मत्यादि प्रमाणं नान्यदिति अथ सन्निकर्षे प्रमाणे सति इंद्रिये वा
को दोषः यदि सन्निकर्षः प्रमाणं सूक्ष्मव्यवहितविप्रकृष्टानामर्थानामग्रहणप्रसंगः न हि ते इंद्रियैः सन्नि
कृष्यंते अतः सर्वज्ञत्वाभावः स्यात् इंद्रियमपि यदि प्रमाणं स एव दोषः अल्पविषयत्वाच्चक्षुरादीनां ज्ञेयस्य
चापरिमाणत्वात् सर्वेंद्रियसन्निकर्षाभावश्च चक्षुर्मनसोः प्राप्यकारित्वाभावात् अप्राप्यकारित्वं चउ
त्तरत्र वक्ष्ये यदि ज्ञानं प्रमाणं फलाभावः अधिगमो हि फलमिष्टं न भावांतरं स चेत्प्रमाणं न तस्यान्यत्फलं
भवितुमर्हति फलवता च प्रमाणेन भवितव्यं सन्निकर्षे इंद्रिये वा प्रमाणे सति अधिगमः फलमर्थांतर
भूतं युज्यत इति तदयुक्तं यदि सन्निकर्षः प्रमाणमर्थाधिगमः फलं तस्य द्विष्ठत्वात् तत्फलेनाधिगमे
नापि द्विष्ठेन भवितव्यमिति अर्थादीनामप्यधिगमः प्राप्नोति आत्मनश्चेतनत्वात्तत्रैव समवायः इति चेन्न ३६

ज्ञस्वभावाभावे सर्वेषामचेतनत्वात् ज्ञस्वभावाभ्युपगमो वात्मनः तर्हि प्रतिज्ञाहानिः ननु चोक्तं ज्ञाने प्र
माणे सति फलाभावः इति नैष दोषः अर्थाधिगमे प्रीतिदर्शनात् ज्ञस्वभावस्यात्मनः कर्ममलीमसस्य क
रणालंबनादर्थनिश्चये प्रीतिरुपजायते सा फलमित्युच्यते उपेक्षा अज्ञाननाशो वा फलं रागद्वेषयोरप्र
णिधानमुपेक्षा अंधकारकल्पाज्ञानाभावः अज्ञाननाशो वा फलमित्युच्यते प्रमि[illegible]णोति प्रमीयते ऽ
नेन प्रमितिमात्रं वा प्रमाणं किमनेन प्रमीयते जीवादिरर्थः यदि जीवादेरधिगमे प्रमाणं प्रमाणाधिगमे
अन्यत्प्रमाणं कल्पयितव्यं तथा सत्यनवस्था नानवस्था प्रदीपवत् यथा घटादीनां प्रकाशने प्रदीपो हेतुः
स्वस्वरूपप्रकाशनेपि स एव न प्रकाशांतरं मृग्यं तथा प्रमाणमपीति अवश्यं चैतदभ्युपगंतव्यं प्रमेयवत्
प्रमाणस्य प्रमाणांतरपरिकल्पनायां स्वाधिगमाभावात् स्मृत्यभावः तदभावाद्व्यवहारलोपः स्यात् वक्ष्य
माणभेदापेक्षया द्विवचननिर्देशः वक्ष्यते हि आद्ये परोक्षं प्रत्यक्षमन्यदिति सत्त्वाद्विवचननिर्देशः प्रमाणे

DR. BHAU DAJI MEMORIAL

१ प्रत्यक्षं चानुमानं शाब्दं चोपमया सह अर्थापत्तिरभावश्च षट् प्रमाणानि जैमिनेः ×

३१ तरसंख्यानिवृत्त्यर्थः उपमानार्थापत्त्यादीनामत्रैवांतर्भावात् उक्तस्य पंचविधस्य ज्ञानस्य प्रमाणद्वयांतःपा
तित्वे प्रतिपादिते प्रत्यक्षानुमानादिप्रमाणद्वयकल्पनानिवृत्त्यर्थमाह आद्ये परोक्षं ॥११॥ आदिशब्दः प्रा
थम्यवचनः आदौ भवमाद्यं कथं द्वयोः प्रथमत्वं मुख्योपचारकल्पनया मतिज्ञानं तावन्मुख्यकल्पनया
प्रथमं श्रुतमपि तस्य प्रत्यासत्त्या प्रथममित्युपचर्यते द्विवचननिर्देशसामर्थ्याद्गौणस्यापि ग्रहणं आ
आद्ये द्यं च आद्ये मतिश्रुते इत्यर्थः तदुभयमपि परोक्षं प्रमाणमित्यभिसंबध्यते कुतोऽस्य परोक्षत्वं परापेक्षत्वात् १ प्रमाणं+
मतिज्ञानमिंद्रियानिंद्रियनिमित्तमिति वक्ष्यते श्रुतमनिंद्रियस्येति च अतः पराणींद्रियाणि मनश्च
प्रकाशोपदेशादि च बाह्यं निमित्तं प्रतीत्य तदावरणकर्मक्षयोपशमापेक्षस्यात्मनः मतिश्रुतं उत्पद्य
मानं परोक्षमित्याख्यायते अत उपमानागमादीनामत्रैवांतर्भावः अभिहितलक्षणात्परोक्षादितरस्य
सर्वस्य प्रत्यक्षत्वप्रतिपादनार्थमाह प्रत्यक्षमन्यत् ॥१२॥ अक्ष्णोति व्याप्नोति जानातीत्यक्ष आत्मा तमे ३१

१ कर्म ×
प्राप्तक्षयोपशमं प्रक्षीणावरणं वा प्रतिनियतं प्रत्यक्षं अवधिदर्शनं केवलदर्शनमपि अक्षमेव प्रति नि
यतं अतस्तस्यापि ग्रहणं प्राप्नोति नैष दोषः ज्ञानमित्यनुवर्त्तते तेन दर्शनस्य व्युदासः एवमपि विभंग
ज्ञानमक्षमेव प्रतिनियतमतोऽस्यापि ग्रहणं प्राप्नोति सम्यगित्यधिकारात् तन्निवृत्तिः सम्यगित्यनु
वर्त्तते तेन ज्ञानं विशिष्यते ततो विभंगज्ञानस्य निवृत्तिः कृता तद्धि मिथ्यादर्शनोदयात् विपरीतार्थवि
षयमिति न सम्यक् स्यात् मतं इंद्रियव्यापारजनितं ज्ञानं प्रत्यक्षं व्यतीतेंद्रियविषयव्यापारं परोक्षमित्ये तं ५
तदविसंवादिलक्षणमभ्युपगंतव्यमिति तदयुक्तम् आप्तस्य प्रत्यक्षज्ञानाभावप्रसंगात् यदि इंद्रियनिमि
त्तमेव ज्ञानं प्रत्यक्षमिष्यते एवं सत्याप्तस्य प्रत्यक्षज्ञानं न स्यात् नहि तस्येंद्रियपूर्वोऽर्थाधिगमः अथ तस्या ४३
पि करणपूर्वकमेव ज्ञानं कल्प्यते तस्यासर्वज्ञत्वं स्यात् तस्य मानसं प्रत्यक्षमिति चेत् मनःप्रणिधानपू
र्वकत्वात् ज्ञानस्य सर्वज्ञत्वाभाव एव आगमात्तत्सिद्धिरिति चेत् न तस्य आगमस्य प्रत्यक्षज्ञानपूर्वक

त्वात् योगिप्रत्यक्षमन्यत् ज्ञानं दिव्यमस्तीति चेन्न तस्य प्रत्यक्षत्वं इंद्रियनिमित्ताभावात् अक्षमक्षं प्रतिवर्त
र्तते तत्प्रत्यक्षमित्यभ्युपगमात् किंच सर्वज्ञत्वाभावः प्रत्यज्ञाहानिर्वा अस्य योगिनो यत् ज्ञानं तत्स्वस्वार्थ
वशवर्त्तित्वास्यात् अनेकार्थग्राहि वा यदि प्रत्यर्थवशवर्त्ति सर्वज्ञत्वमस्य नास्ति योगिनः ज्ञेयस्यानंत्या
दऽथानेकार्थग्राहि या प्रतिज्ञा विजानातीति न विज्ञानमेकमर्थद्वयं यथा एकमर्थं विजानातीति न विज्ञानद्व
यं तथेति सा हीयते अथवा क्षणिकाः सर्वसंस्काराः इति प्रतिज्ञा हीयते अनेकक्षणवर्त्त्येकविज्ञाना
भ्युपगमात् अनेकार्थग्रहणं क्रमेणेति युगपद्वेति चेत् योस्य जन्मक्षणः स आत्मलाभार्थ एव लब्धा
त्मलाभे किंचित्स्वकार्यं प्रति व्याप्रियते प्रदीपवदिति चेत् न तस्याप्यनेकक्षणविषयतायां सत्यामेव
प्रकाश्यप्रकाशाज्ञानाभ्युपगमात् विकल्पातीतत्वात् तस्यावस्तुता प्रसंगश्च अभिहितो नयप्रकारस्य प्र
माणस्य आदिप्रकारविशेषप्रतिपत्त्यर्थमाह मतिः स्मृतिः संज्ञा चिंताभिनिबोध इत्यनर्थांतरं १३

ग ३८

आदावुद्दिष्टं यत् ज्ञानं तस्य पर्यायशब्दाः एते वेदितव्याः मतिज्ञानावरणक्षयोपशमांतरंगनिमित्तजनितोप
योगविषयत्वात् एतेषां श्रुतादिष्वप्रवृत्तेश्च मननं मतिः स्मरणं स्मृतिः संज्ञानं संज्ञा चिंतनं चिंता अभिनि आभिनिबोधनं २
बोध इति यथासंभवं विग्रहांतरं विज्ञेयं सत्यपि प्रकृतिभेदे पि रूढिबललाभात् पर्यायशब्दत्वं यथेंद्रः श
क्रः पुरंदर इति इंदनादिक्रियाभेदे पि सर्वा पतेरेकस्यैव संज्ञाः समभिरूढनयापेक्षया तेषामर्थांतरकल
नायां मत्यादिष्वपि स क्रमो विद्यत एव किंतु मतिज्ञानावरणक्षयोपशमनिमित्तोपयोगं नातिवर्त्तंत इति
अयमत्रार्थो विवक्षित इति शब्दः प्रकारार्थ एवं प्रकारा अस्य पर्यायशब्दा इति अभिधेयार्थो वा मतिः स्मृ
तिः संज्ञा चिंताभिनिबोध इत्येतैर्योऽर्थोऽभिधीयते स एक इति अथास्यात्मलाभे किंनिमित्तं इत्यत आह
तदिंद्रियानिंद्रियनिमित्तं १४ इंदतीति इंद्रः आत्मा तस्य ज्ञस्वभावस्य तदावरणक्षयोपशमे सति
स्वयमर्थान् ग्रहीतुमसमर्थस्य यदर्थोपलब्धिनिमित्तं लिंगं तदिंद्रस्य लिंगमिंद्रियमित्युच्यते अथ

३९ वालीनमर्थं गमयतीति लिंगं आत्मनः सूक्ष्मस्यास्तित्वाधिगमे लिंगमिंद्रियं यथेह धूमोऽग्नेः एवमिदं स्पर्श
नादिकरणं नासति कर्त्तर्यात्मनि भवितुमर्हतीति ज्ञातुरस्तित्वं गम्यते अथवा इंद्र इति नामकर्मोच्यते
तेन सृष्टमिंद्रियमिति तत्स्पर्शनादि उत्तरत्र वक्ष्यते अनिंद्रियं मनोंतःकरणमित्यनर्थांतरं कथं पुनरिं
द्रियमितियथानुदराकन्येतिकथमीषदर्थ प्रतिषेधेन इंद्रलिंगे एव मनसि अनिंद्रियशब्दस्य प्रवृत्तिः
ईषदर्थस्य नञःप्रयोगात् ईषदिंद्रियमनिंद्रियमिति यथानुदराकन्येति कथमीषदर्थः इमानींद्रिया
णि प्रतिनियतदेशविषयाणि कालांतरावस्थायीनि च तदंतःकरणमिति चोच्यते गुणदोषविचार
स्मरणादिव्यापारेषु इंद्रियानपेक्षत्वात् चक्षुरादिवत् बाह्यैरनुपलब्धेश्च अंतर्गतं करणमंतःकरण
मित्युच्यते तदिति किमर्थं मतिज्ञाननिर्देशार्थं ननु च तदनंतरं अनंतरस्य विधिर्वा भवति प्रतिषेधो
वेति तस्यैवग्रहणं भवति इहार्थं तु उत्तरार्थं च तदित्युच्यते यन्मत्यादिपर्यायशब्दवाच्यं ज्ञानं तदिंद्रिया ३९

४ न तथा मनः इंद्रस्य लिंगमपि सत्प्रतिनियतदेशविषयं कालांतरावस्थायि च ×

निंद्रियनिमित्तं तदेवावग्रहेहावायधारणा इति इतरथा हि प्रथमं मत्यादिशब्दवाच्यं ज्ञानमित्युक्त्वा इंद्रि
यानिंद्रियनिमित्तं श्रुतं तदेवावग्रहेहावायधारणाः इत्यनिष्टमभिसंबध्येत एवं निर्ज्ञातोत्पत्तिनिमित्त
मनिर्नीतभेदमिति तद्भेदप्रतिपत्त्यर्थमाह अवग्रहेहावायधारणाः ॥१५॥ विषयविषयिसन्निपातस
मयानंतरमाद्यं ग्रहणमवग्रहः विषयविषयिसन्निहिते सति दर्शनं भवति तदनंतरमर्थस्य ग्रहणमव
ग्रहः यथा चक्षुषा शुक्लं रूपमिति ग्रहणमवग्रहः अवग्रहगृहीतेर्थे तद्विशेषाकांक्षणमीहा यथा शु
क्लं रूपं किं बलाका पताका वेति विशेषनिर्ज्ञानाद्याथात्म्यावगमनमवायः उत्पतनपक्षविक्षेपादिभिर्बला निपतन४
कैवेयं न पताकेति अवेतस्य कालांतरे अविस्मरणकारणं धारणा यथा सैवेयं बलाका पूर्वाह्ने यामहमद्रा
क्षमिति एषामवग्रहादीनामुपन्यासक्रमः उत्पत्तिक्रमकृतः उक्तानामवग्रहादीनां प्रभेदप्रतिपत्त्यर्थमा
हः बहुबहुविधक्षिप्रानिःसृतानुक्तध्रुवाणां सेतराणां ॥ अवग्रहादयः क्रियाविशेषाः प्रकृतास्तदपे

५० क्षोयं कर्म्मेति निर्देशः बह्वादीनां सेतराणामिति बहुशब्दस्य संख्यावैपुल्यवाचिनो ग्रहणम् अविशेषात् संख्यावा
चीयथा एकः द्वौ बहव इति वैपुल्यवाची यथा बहुरोदनो बहुसूप इति विधशब्दः प्रकारवाची क्षिप्रग्रह
णम चिरप्रतिपक्षार्थं अ निसृतग्रहणं असकलपुद्गलोद्गमार्थं उक्तनाम अनुक्तमभिप्रायेण ग्रहणं
ध्रुवं निरंतरं यथार्थग्रहणं सेतरग्रहणं प्रतिपक्षसंग्रहार्थं बहूनामवग्रहः अल्पस्यावग्रहणः बहुविध
स्यावग्रह एकविधस्यावग्रहः क्षिप्रमवग्रहः चिरेणावग्रहः अनिसृतस्यावग्रहः निसृतस्यावग्रहः अ
नुक्तस्यावग्रहः उक्तस्यावग्रहः ध्रुवस्यावग्रहः अध्रुवस्यावग्रह इत्यवग्रहो द्वादशविकल्पः एवमी
हादयोपि तएते पंचभिरिंद्रियद्वारैर्मनसा च प्रत्येकं प्रादुर्भाव्यंते तत्र बह्ववग्रहादयः मतिज्ञानावरणक्ष
योपशमप्रकर्षात् प्रभवंति नेतरा इति तेषामभ्यर्हितत्वात् आदौ ग्रहणं क्रियते बहुबहुविधयोः कः प्र
तिविशेषः यावता बहुष्वपि बहुविधेष्वपि बहुत्वमस्ति एकप्रकारनानाप्रकारकृतो विशेषः उक्तनिःसृत ५०

योः कः प्रतिविशेषः यावता सकलनिःसरणान्निःसृतं उक्तमप्येवंविधमेव अयमस्ति विशेषः अन्योपदेशपू
र्वकं ग्रहणमुक्तं स्वत एव ग्रहणं निःसृतं अपरेषां क्षिप्रनिःसृत इति पाठस्त एवं वर्णयंति श्रोत्रेंद्रियेण शब्दमव
गृह्यमाणं मयूरस्य वा कुररस्य वेति कश्चित्प्रतिपद्यते अपरः स्वरूपमेवानिःसृत इति ध्रुवग्रहस्य धारणाया निःसृतेर
श्च कः प्रतिविशेष उच्यते क्षयोपशमप्राप्तिकाले विशुद्धिपरिणामसंतत्याप्रात् क्षयोपशमात् प्रथमसम
ततो ये यथावग्रहस्तथैव द्वितीयादिष्वपि समयेषु नोनो नाभ्यधिक इति ध्रुवावग्रह इत्युच्यते यदा पुनर्विशुद्ध
परिणामस्य संक्लेशपरिणामस्य च मिश्रणात् क्षयोपशमो भवति ततः उत्पद्यमानो वग्रहः कदाचिद्बहूनां
कदाचिदल्पस्य कदाचिद्बहुविधस्य कदाचिदेकविधस्य वेति न्यूनाधिकभावादध्रुवोऽवग्रहः इत्युच्यते
धारणा पुनर्गृहीतार्थाविस्मरणकारणमिति महदनयोरंतरं यद्यवग्रहादयो बह्वादीनां कर्म्मणामाक्षेप्ता
रः बह्वादीनि पुनर्विशेषणानि कस्येत्यत्राह अर्थस्य १७ चक्षुरादिविषयोर्थः तस्य बह्वादिविशेषणा

=मिदमुच्यते यावता रूक्षादिरर्थ एव सत्यमेव किंतु प्रबादिकल्पेनो[illegible]ः१४

एकावर

४१ विशिष्टस्य अवग्रहादयो भवंतीत्यभिसंबंधः क्रियते किमर्थं मर्थस्येत्युच्यते केचित्स्ववादिनो मन्यंते द्रूपादयो
गुणा एवं इंद्रियैः सन्निकृष्यंते तेषामेव ग्रहणमिति तदयुक्तं न हि ते रूपादयो गुणा अमूर्त्ता इंद्रियसन्निकर्षमापद्यं
मयाउ ते न तर्हि इदानीमिदं भवति रूपं मया दृष्टं गंधो वा घ्रात इति भवति च कथं इयर्त्ति पर्यायांस्ते चार्यते इत्यर्थो
ऽर्थ्यंतस्मिन्निंद्रियैः सन्निकृष्यमाणे तदव्यतिरेकात् रूपादिष्वपि संव्यवहारो युज्यते किमिमे ऽवग्रहादयः
सर्वेष्विंद्रियानिंद्रियेषु भवंति च उत कश्चिद्विषयविशेषोस्तीत्यत आह व्यंजनस्यावग्रहः॥ व्यंजन
मव्यक्तं शब्दादिजातं तस्यावग्रहो भवति किमर्थमिदं नियमार्थं अवग्रह एव नेहादय इति स तर्हि एवकारः
कर्त्तव्यो न कर्त्तव्यः सिद्धे विधिरारभ्यमाणो नियमार्थ इति अंतरेणैवकारं नियमार्थो भविष्यति नु अवग्रहणमु न२
भयत्र तुल्यं तत्र किं कृतो विशेषः अर्थावग्रहव्यंजनावग्रहयोर्व्यक्ताव्यक्तकृतो विशेषः कथम् अभिनवसरावा
दीकरणवत् यथा जलकणद्वित्रासिक्तः सरावोभिनवो नार्द्रीभवति स एव पुनः पुनः सिच्यमानः शनैस्तिम्यति ४१

ग्रहे३

न भवति कुतः अप्राप्यकारित्वात् यतो प्राप्तमर्थमविदिक्ष्वयुक्तं सन्निकर्षविषये वास्थितं बाह्यप्र
कारणाभिव्यक्तमुपलभते चक्षुर्मनश्चाप्राप्तमित्यनयोर्व्यंजनावग्रहो ध

एवं श्रोत्रादिष्विंद्रियेषु शब्दादिपरिणताः पुद्गला द्वित्रादिषु समयेषु गृह्यमाणाः व्यक्ता भवंति पुनः पुनर
वग्रहे सति व्यक्ती भवंति अतो व्यक्तग्रहणात् प्राक् व्यंजनावग्रहः व्यक्तग्रहणं अर्थावग्रहः ततो व्यक्तग्रहणात्
ईहादयो न भवंति सर्वेंद्रियाणामविशेषेण व्यंजनावग्रहप्रसंगे यत्रासंभवस्तदर्थं प्रतिषेधमाह न चक्षु
रनिंद्रियाभ्यां चक्षुषा अनिंद्रियेण च व्यंजनावग्रहो नास्ति चक्षुषो अप्राप्यकारित्वं कथमध्यवसीयते आगम
तो युक्तितश्च आगमस्तावत् गाथा पुट्ठं सुणेदि सद्दं अपुट्ठं पुण पस्सदे रूवं गंधं रसं च फासं बद्धं पुट्ठं वियाणा
दि युक्तितश्च अप्राप्यकारि चक्षुः स्पृष्टानवग्रहात् यदि प्राप्यकारि स्यात् त्वगिंद्रियवत् स्पृष्टमंजनं गृह्णी
यात् न तु गृह्णात्यतो मनोवत् अप्राप्यकारीत्यवसेयं ततश्चक्षुर्मनसी वर्जयित्वा शेषाणामिंद्रियाणां व्यं
जनावग्रहः सर्वेषामिंद्रियानिंद्रियाणामर्थावग्रह इति सिद्धं आह निर्दिष्टं मतिज्ञानं लक्षणतो विकल्प
तश्च वक्तव्यमस्ति तदाह श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदं॥२०॥ श्रुतशब्दोयं श्रवणमुपादाय व्युत्पादि
तदनंतरं उद्दिष्टं यत् श्रुतं तस्येदानीं लक्षणं विकल्पश्चा२

MEMORIAL

कौशल्स्ये २ प्रमाणत्वं पूरयतीति पूर्व्वं निमित्तं कारणमित्यनर्थांतरं मतिर्निर्द्दिष्टा मतिः पूर्व्वमस्य २

४२ तोपिरूढिवशात् कस्मिंश्चित्ज्ञानविशेषे वर्त्तते यथा कुशलवनकर्म्मप्रतीत्य व्युत्पादितोपि कुशलशब्दः
रूढिवशात्सर्व्वत्र दक्षे वर्त्तते कः पुनरसौ ज्ञानविशेष इति अत आह श्रुतंमतिपूर्व्वमिति श्रुतस्य मतिपूर्व्वं
मतिकारणमित्यर्थः यदि मतिपूर्व्वं श्रुतं ततदपि मत्यात्मकं प्राप्नोति कारणसदृशं हि लोके कार्यं दृष्टमिति
नैतदैकांतिकं दंडादिकारणोयं घटः न दंडाद्यात्मकः अपिच मतितस्मिंस्तदभावात् सत्यपि मतिज्ञाने वा
स्य श्रुतज्ञाननिमित्तसन्निधानेपि प्रवल श्रुतावरणोदयश्रुताभावः श्रुतावरणक्षयोपशमप्रकर्षे तु स
ति श्रुतज्ञानमुत्पद्यत इति मतिज्ञाननिमित्तमात्रं ज्ञेयं स्यादेतत् श्रुतमनादिनिधनमिष्यते तस्य मतिपूर्व्व
कत्वे तदभावः आदिमतोऽन्तवत्वात् ततः पुरुषकृतित्वात् अप्रामाण्यमिति नैष दोषः द्रव्यादिसा
मान्यापेक्षणात् श्रुतमनादिनिधनमिष्यते न हि केनचित्पुरुषेण क्वचित् कदाचित्कथंचित् उत्प्रेक्षितमि
ति तेषामेव विशेषापेक्षया आदिरंतश्च संभवतीति मतिपूर्व्वमित्युच्यते यथांकुरो बीजपूर्व्वकः सच संता ४२

नापेक्षया अनादिनिधन इति न चापौरुषेयत्वं प्रामाण्यकारणं चौर्योपदेशस्य अस्मर्यमाणकर्तृकस्य प्रामा
ण्यप्रसंगात् अनित्यस्य च प्रत्यक्षादेः प्रामाण्ये को विरोधः आह प्रथमसम्यक्त्वोत्पत्तौ युगपत् ज्ञानपरिणामा
त् मतिपूर्व्वकत्वं श्रुतस्य नोपपद्यत इति तदयुक्तं सम्यक्त्वस्य तदपेक्षत्वात् आत्मलाभस्तु क्रमवानिति पूर्व्वकत्व मति ३
बाक्या ५ व्याघाताभावः आह मतिपूर्व्वं श्रुतमित्येतल्लक्षणमव्यापि श्रुतपूर्व्वमपि श्रुतमिष्यते तद्यथा शब्दपरिणतपु
द्गलस्कंधादाहितवर्णपद[redacted]दिभावात् चक्षुरादिविषयाच्च आद्यश्रुतविषयभावमापन्नात् अव्यभिचा
रिणः कृतसंगीतिर्जनो घटात् जलधारणादिकार्यं संबंधांतरं प्रतिपद्यते धूमादेर्व्वा अग्न्यादि द्रव्यं तथा श्रुता ६४
त् श्रुतप्रतिपत्तिरिति नैष दोषः तस्यापि मतिपूर्व्वकत्वमुपचारतः श्रुतमपि क्वचिन्मतिरित्युपचर्यते मति
पूर्व्वकत्वात् इति भेदशब्दः प्रत्येकं परिसमाप्यते द्विभेदमनेकभेदं द्वादशभेदमिति द्विभेदं तावत् अंगबा
ह्यमंगप्रविष्टमिति अंगबाह्यमनेकविधं दशवैकालिकोत्तराध्ययनादि अंगप्रविष्टं द्वादशविधं तद्यथा

४३ आचारः सूत्रकृतं स्थानं समवायः व्याख्याप्रज्ञप्तिः ज्ञातृधर्म्मकथा उपासकाध्ययनं अंतकृद्दशं अनुत्तरौप
पादिकदशं प्रश्नव्याकरणं विपाकसूत्रं दृष्टिवाद इति दृष्टिवादः पंचविधः परिकर्म्म सूत्रं प्रथमानुयोगः पूर्व
कृतं चूलिका चेति तत्र पूर्वकृतं चतुर्दशविधं उत्पादपूर्वं अग्रायणीयं वीर्यप्रवादं अस्तिनास्तिप्रवादं ज्ञानप्र
सत्यप्रवादं ४ वादं आत्मप्रवादं कर्म्मप्रवादं प्रत्याख्याननामधेयं विद्यानुप्रवादं कल्याणनामधेयं प्राणावायं क्रियावि
शालं लोकबिंदुसारमिति तदेतत् श्रुतं द्विभेदमनेकभेदं द्वादशभेदं इति किंकृतोयं विशेषः त्रयो वक्ता ब[illegible] विशे[illegible]
रः सर्वज्ञः तीर्थकरः इतरो वा श्रुतकेवली आरातीयाश्चेति तत्र सर्वज्ञेन परमर्षिणा परमाचिंत्यकेवलज्ञा [illegible]
नविभूतिविशेषेण अर्थतः आगम उद्दिष्टः तस्य प्रत्यक्षदर्शित्वात् प्रक्षीणदोषत्वाच्च प्रामाण्यं तस्य साक्षा [illegible]
च्छिष्यैर्बुद्ध्यतिशयर्द्धियुक्तैर्गणधरैः श्रुतकेवलिभिः अनुस्मृतग्रंथरचनो ऽगपूर्वलक्षणः तत्प्रमाणं ४३
तत्प्रमाण्यात् आरातीयैः पुनराचार्यैः कालदोषात् संक्षिप्तायुर्मतिबलशिष्यानुग्रहार्थं दशवैकालिका

द्युपनिबद्धं तत्प्रमाणमर्थतस्तदेवेदमिति क्षीरार्णवजलं घटगृहीतमिव व्याख्यातं परोक्षं प्रत्यक्षमिदानीं वक्त
व्यं तत् द्वेधा देशप्रत्यक्षं सर्वप्रत्यक्षं च देशप्रत्यक्षमवधिमनःपर्ययज्ञाने सर्वप्रत्यक्षं केवलं यद्येवं इदमेव
तावदवधिज्ञानं त्रिप्रकारस्य प्रत्यक्षस्याद्यं व्याक्रियतामित्यत्रोच्यते द्विविधोऽवधिः भवप्रत्ययः क्षयोपशम
निमित्तश्चेति तत्र भवप्रत्यय उच्यते भवप्रत्ययोवधिर्देवनारकाणां २१ भव इत्युच्यते को भवः आयुर्नाम
कर्म्मोदयनिमित्त आत्मनः पर्यायो भवः प्रत्ययः कारणं निमित्तमित्यनर्थांतरं भवप्रत्ययोऽवधिर्देवना भवः प्रत्ययो ऽस्येति ५
रकाणां वेदितव्यः यद्येवं तत्र क्षयोपशमनिमित्तत्वं न प्राप्नोति नैष दोषः तदाश्रयात्तत्सिद्धेः भवं प्रतीत्य
३य क्षयोपशमः संजात इति कृत्वा भवः प्रधानकारणमित्युपदिश्यते यथा पतत्रिणो गमनमाकाशे भवनि
मित्तं न शिक्षागुणविशेषः तथा देवनारकाणां व्रतनियमाद्यभावेपि जायते इति भवप्रत्यय इष्यते इतर
था हि भवः साधारण इति कृत्वा सर्वेषामविशेषः स्यात् इष्यते च तत्रावधेः प्रकर्षा वृत्तिर्देवनारकाणामित्य
प्रकर्ष२

विशेषाभिधानेपिसम्यग्दृष्टीनामेवग्रहणंकुतः अवधिग्रहणात्मिथ्यादृष्टीनांचविभंगइत्युच्यते प्रकर्षाप्रक
र्षवृत्तिश्चागमतोज्ञेया यदिभवप्रत्ययोवधिर्देवनारकाणांअथक्षयोपशमहेतुःकेषामित्यतआह क्षयो द
पशमनिमित्तः षड्विकल्पः शेषाणां अवधिज्ञानावरणस्यदेशघातिस्पर्द्धकानामुदयेसतिसर्वघातिस्पर्द्धकानां
मुदयाभावः क्षयः तेषामेवानुदयप्राप्तानांसदवस्था उपशमः तौनिमित्तमस्येतिक्षयोपशमनिमित्तः शे
षाणांवेदितव्यः केपुनः शेषामनुष्यास्तिर्यंचश्चतेष्वपियत्रसामर्थ्यमस्तित त्रैववेदितव्यः नह्यसंज्ञिना
मपर्याप्तकानांचतत्सामर्थ्यमस्तिसंज्ञिनांपर्याप्तकानांचनसर्वेषांकेषांतर्हियथोक्तसम्यग्दर्शनादिनिमि
अप३ त्तसन्निधानेसतिशांतक्षीणकर्मणांतस्योपलब्धिर्भवति सर्वस्यक्षयोपशमनिमित्तत्वेक्षयोपशमग्रहणं
य नियमार्थंक्षयोपशमएवनिमित्तंनभवइति सएषोऽवधिः षड्विकल्पः कुतः अनुगाम्यननुगामिवर्द्धमान
हीमाना वस्थितानवस्थितभेदात् कश्चिदवधिः भास्करप्रकाशवत् गच्छंतमनुगच्छति कश्चिन्नानुगच्छतितत्रैवा ४४

नवांतरंप्राप्नुवंत २

तिपततिउन्मुखप्रश्नादेशिपुरुषवचनवत् अपरोवधिः अरणिनिर्मथनोत्पन्नः शुष्कपत्रोपचीयमानेंध
ननिचयसमिद्धपावकवत् सम्यग्दर्शनादिगुणविशुद्धिपरिणामसन्निधानात् यत्परिमाणउत्पन्नस्ततोव
र्द्धते आअसंख्येयलोकेभ्यः अपरोवधिः परिछिन्नोपादानसंतत्यग्निशिखावत् सम्यग्दर्शनादिगुणहा
निसंक्लेशपरिणामवृद्धियोगात्यत्परिमाणउत्पन्नस्ततोहीयते आअंगुल्यसंख्येयभागात् इतरोवधिः
सम्यग्दर्शनादिगुणावस्थानात् यत्परिमाणउत्पन्नस्तत्परिमाणएवावतिष्ठते नहीयतेनापिवर्द्धतेलिंग
वत् आभवक्षयात् आकेवलज्ञानोत्पत्तेर्वा अन्योवधिः सम्यग्दर्शनादिगुणवृद्धिहानियोगात् यत्परि
माणउत्पन्नस्ततोवर्द्धते यावदनेनवर्धितव्यंहीयतेचयावदनेनहातव्यंवायुवेगप्रेरितजलोर्मिवत् एवं
षड्विकल्पोवधिर्भवति एवंव्याख्यातमवधिज्ञानंतदनंतरमिदानींमनःपर्ययज्ञानंवक्तव्यंतस्यभेदपुरस्स
रंलक्षणंव्याचिख्यासुरिदमाह ऋजुविपुलमतीमनःपर्ययः ऋज्वीनिर्वर्त्तिताप्रगुणाच कस्मान्निर्व२

४५ र्त्तिता वा कायमानस्कृतार्थस्य परमनोगतस्य विज्ञानात् ऋज्वी मतिर्यस्य सोयं ऋजुमति अनिर्वर्त्तिता कुटि
लाव विपुला कस्मादनिवर्त्तिता वाक्कायमनःकृतार्थस्य परकीयमनोगतस्य विज्ञानात् विपुला मतिर्यस्य सो
यं विपुलमतिः ऋजुमतिश्च विपुलमतिश्च ऋजुविपुलमती एकस्य मतिशब्दस्य गतार्थत्वात् अप्रयोगः अ
थवा ऋजुश्च विपुला च ऋजुविपुले । ऋजुविपुले च मती ययोः तौ ऋजुविपुलमती इति स एष मनःपर्ययो द्वि
विधः ऋजुमतिर्विपुलमतिरिति आह उक्तो भेदः लक्षणमिदानीं वक्तव्यमित्यत्रोच्यते वीर्यान्तरायमनःपर्य
यज्ञानावरणक्षयोपशमांगोपांगनामलाभावष्टंभादात्मनः परकीयमनःसंबंधेन लब्धवृत्तिरुपयोगो म प्र ४
नःपर्ययः मतिज्ञानप्रसंग इति चेदुक्तोत्तरं पुरस्तात् अपेक्षाकारणं मन इति परकीयमनसि व्यवस्थितोर्थः
अनेन ज्ञायते इत्येतावदत्रापेक्ष्यते तत्र ऋजुमतिर्मनःपर्ययः कालतो जघन्येन जीवानामात्मनश्च द्वित्राणि
भवग्रहणानि उत्कर्षेण सप्ताष्टानि गत्यादिभिः प्ररूपयति क्षेत्रतो जघन्येन गव्यूतिपृथक्त्वं उत्कर्षेणयो ४५

गत्या २ दा ४

× संयमात्प्रच्यवनं प्रतिपतनं प्रतिपातः न प्रतिपातः अप्रतिपातः उपशांतकषायस्य चारित्रमो
हो द्रेकात् प्रच्युतसंयमशिखरस्य ४
स्पर
जनपृथक्त्वस्याभ्यंतरं न बहिः द्वितीयः कालतो जघन्येन सप्ताष्टानि भवग्रहणानि उत्कर्षेणासंख्येयानि गत्याग
त्यादिभिः प्ररूपयति क्षेत्रतो जघन्येन योजनपृथक्त्वं उत्कर्षेण मानुषोत्तरशैलस्याभ्यंतरं न बहिः उक्तयोरनयोः स्पर
पुनरपि विशेषप्रतिपत्त्यर्थमाह विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः २८ तदावरणकर्मक्षयोपशमे सति
आत्मनः प्रसादो विशुद्धिः [redacted] प्रतिपातो भवति क्षीणकषायस्य प्रतिपातकारणाभावा
द् प्रतिपातः विशुद्धिश्च अप्रतिपातश्च विशुद्ध्यप्रतिपातौ ताभ्यां विशुद्ध्यप्रतिपाताभ्यां तयोर्विशेषस्तत्र तद्विशेषः ४
विशुद्ध्या तावत् ऋजुमतेर्विपुलमतिर्द्रव्यक्षेत्रकालभावैः विशुद्धतरः कथमिह यः कार्म्मणद्रव्यानंतभा
गोंत्यः सर्वावधिना ज्ञातः तस्य पुनरनंतभागीकृतस्यांत्यो भागः ऋजुमतेर्विषयः तस्य ऋजुमतिविषयस्या
नंतभागीकृतस्यांत्यो भागः विपुलमतेर्विषयः अनंतस्यानंतभेदत्वात् द्रव्यक्षेत्रकालविशुद्धिरुक्ता भा
वतो विशुद्धिः सूक्ष्मतरद्रव्यविषयत्वादेव वेदितव्या प्रकृष्टक्षयोपशमविशुद्धियोगात् ऋजुमतिः पुनः प्र
अप्रतिपातेनापि विपुलमतिर्विशिष्टः स्वामिनां प्रवर्द्धमानचारित्रोदयत्वात् २

४६ तिपातीस्वामिनोकषायोद्रेकात् हीयमानचारित्रोदयत्वात् यद्यप्यमनःपर्ययस्यप्रत्यात्मनमयंविशेषः अथा
नयोरवधिमनःपर्यययोः कुतोविशेषइत्यतआह विशुद्धिक्षेत्रस्वामिविषयेभ्योवधिमनःपर्यययोः २५ वि
शुद्धिःप्रसादः क्षेत्रंयत्रस्थानभावान्प्रतिपद्यते स्वामीप्रयोक्ता विषयोज्ञेयः तत्रावधिर्मनःपर्ययोविशुद्धतरः वस्त्र×३
कुतःसूक्ष्मविषयत्वात् क्षेत्रमुक्तंविषयोवक्ष्यते स्वामित्वंप्रत्युच्यते प्रकृष्टचारित्रगुणोपेतेषुप्रवर्त्तते प्र
मत्तादिषुक्षीणकषायांतेषु तत्रचोत्पद्यमानः वर्द्धमानचारित्रेषुनहीयमानचारित्रेषुवर्द्धमानचारित्रेषुचो
त्पद्यमानः सप्तविधान्यतमर्द्धिप्राप्तेष्वपजायते नेतरेषु ऋद्धिप्राप्तेषु [redacted] केषुचिन्नसर्वेष्विति
अस्यायंस्वामिविशेषः विशिष्टसंयमग्रहणंवाक्ये कृतं अवधिःपुनश्चातुर्गतिकेष्विति स्वामिभेदादप्यन।
योर्विशेषः इदानींकेवलज्ञानलक्षणाभिधानंप्राप्तकालं तदुल्लंघ्यज्ञानानांविषयनिबंधःपरीक्ष्यते कुत ४६
स्तस्यमोहक्षयात्ज्ञानदर्शनावरणांतरायक्षयाच्चकेवलमित्यत्रवक्ष्यमाणत्वात् यद्येवमाद्ययोरेवतावन्म

कये३ नसूत्रे ३

तिश्रुतयोर्विषयनिबंधः उच्यतामित्यतआह मतिश्रुतयोर्निबंधोद्रव्येष्वसर्वपर्यायेषु २६ निबंधनं
निबंधः कस्यविषयस्य तद्विषयग्रहणंकर्त्तव्यं नकर्त्तव्यं प्रकृतंविषयग्रहणं कं प्रकृतं विशुद्धिक्षेत्रस्वामि
विषयेभ्यः इत्यतः तस्यार्थवशाद्विभक्तिपरिणामोभवति विषयस्येत्यभिसंबध्यते द्रव्येष्विति बहुवच
ननिर्देशः सर्वेषांजीवधर्माधर्मकालाकाशपुद्गलानांसंग्रहार्थः तद्विशेषणार्थमसर्वपर्यायग्रहणं
५५ तानिद्रव्याणिमतिश्रुतयोर्विषयभावमापद्यमानानि कतिपयैरेवपर्यायैःविषयभावमास्कंदंतिनसर्व
पर्यायैरनंतैरपीति अत्राह धर्मास्तिकायादीन्यतीन्द्रियाणि तेषुमतिज्ञानंनप्रवर्त्तते अतः सर्वद्रव्येषु
व मतिज्ञानंप्रवर्त्ततइत्ययुक्तं नैषदोषः अनिंद्रियाख्यंकरणमस्ति तदालंबनः नोइंद्रियावरणक्षयोपशम
लब्धिरूपकउपयोगः अवग्रहादिरूपः प्रागेवोपजायते ततस्तत्पूर्वंश्रुतज्ञानं तद्विषयेषुस्वयोग्येषुव्या
प्रियते अथमतिश्रुतयोरनंतरनिर्देशार्हस्यावधेः कोविषयनिबंधइत्यतआह रूपिष्ववधेः २७ वि

Dr. BHAU DAJI MEMORIAL

हेत्र निर ×पुद्गला?

४७ षयनिबंधइत्यनुवर्त्तते रूपिष्वित्यनेनपुद्गलद्रव्यसंबंधाश्चजीवाःपरिगृह्यंते रूपिष्वेवावधेर्विषय
निबंधोनारूपिष्विति नियमःक्रियतेरूपिष्वपिनवतः सर्वपर्यायेष्विति योग्येष्वेवेत्यवधारणार्थमसर्वपर्
यायेष्विति अभिसंबध्यते अथतदनंतरनिर्दिष्टस्यजो मनःपर्ययस्यकोविषयनिबंधइत्यत्राह त
दनंतभागेमनःपर्ययस्य [redacted]
[redacted] प्रवर्त्तते अथांतेयन्निर्दिष्टंकेवल
ज्ञानंतस्यकोविषयनिबंधइत्यत्राह सर्वद्रव्यपर्यायेषुकेवलस्य २९ द्रव्याणिचपर्यायाश्चद्र
व्यपर्याया इति इतरेतरयोगलक्षणोद्वंद्वः तद्विशेषणंसर्वग्रहणंप्रत्येकमभिसंबध्यते सर्वेषुद्र
व्येषुसर्वेषुपर्यायेष्विति जीवद्रव्याणितावदनंतानंतानिपुद्गलद्रव्याणिचततोप्यनंतानंतानिअ
णुस्कंधभेदेनभिन्नानिधर्माधर्माकाशानि त्रीणिकालश्चासंख्येयाःतेषांपर्यायाश्चत्रिकालनुवः
य रूपिद्रव्येसर्वावधिज्ञानविषयत्वेनसमर्थितं तस्यानंतभागीकृतस्यैकस्मिन्भागेमनःप
र्ययः५ ४७

प्रत्येकमनंतानंतास्तेषुद्रव्यपर्यायजातंवानकिंचित्केवलज्ञानस्यविषयभावमतिक्रांतमस्ति अपरिमितमा
हात्म्यंहितदितिज्ञापनार्थंसर्वद्रव्यपर्यायेष्वित्युच्यते आह विषयनिबंधाविष्कृतोमत्यादीनांइदंतुनं [redacted] नि
[redacted] र्वंतएकस्मिन्नात्मनिस्वनिमित्तसन्निधानोपजनितवृत्तीनिज्ञानानियौगपद्येनकतिभवंतीत्यु
च्यते एकादीनिभाज्यानि [redacted] युगपदेकस्मिन्नाचतुर्भ्यः ३० एकशब्दःसंख्यावाची आदिशब्दोवय
ववचनः [illegible] आदिर्येषांतानिएकादीनि [illegible] भाज्यानियौगपद्येनैकस्मिन्नात्मनिआ
कुतः आचतुर्भ्यः तद्यथा एकंतावत्के [illegible] नतेनसहान्यानिक्षायोपशमिकानियुगपदवतिष्ठंते द्वे
मतिश्रुते त्रीणिमतिश्रुतावधिज्ञानानिमतिश्रुतमनःपर्ययज्ञानानिवाचत्वारिमतिश्रुतावधिमनः न
पर्ययज्ञानानिपंचनसंति केवलस्यासहायत्वात् यथोक्तानिमत्यादीनिज्ञानव्यपदेशमेवलभंतेउ
तान्यथापीत्यत्राह मतिश्रुतावधयोविपर्ययश्च ३१ विपर्ययोमिथ्येत्यर्थः कुतःसम्यगधिका

४८ रात् चशब्दः समुच्चयार्थः विपर्ययसम्पन्नेति कुतः पुनरेषां विपर्ययमिथ्यादर्शनेन सहैकार्थ्यसमवा
यात् सरजस्ककटुकालाबुकगतदुग्धवत् ननु चतत्राधारदोषात् दुग्धस्य रसविपर्ययो भवति न च त
था मत्यज्ञानादीनां विषयग्रहणे विपर्ययः तथाहि सम्यग्दृष्टिर्यथा चक्षुरादिभिः रूपादीनुपलभते त
था मिथ्यादृष्टिरपि यथा च सम्यग्दृष्टिः श्रुतेन रूपादीन् जानाति निरूपयति च तथा मिथ्यादृष्टिरपि श्रुताज्ञा
नेन यथा चावधिज्ञानेन सम्यग्दृष्टिः रूपिणोऽर्थानवगच्छति तथा मिथ्यादृष्टिः विभङ्गज्ञानेनेति न
त्रोच्यते सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवत् सद्विद्यमानमसदविद्यमानमित्यर्थः त
योरविशेषेण यदृच्छयोपलब्धेः विपर्ययो भवति कदाचिद्रूपादि सदप्यसदिति प्रतिपद्यते असद
पि सदिति कदाचित्सत्सदेव असदप्यसदेवेति मिथ्यादर्शनोदयाद्व्यवस्यति यथा पित्तोदयाकुलितबु
द्धिः मातरं भार्येति भार्यामपि मातेति मन्यते यदृच्छया कदाचिन्मातरं मातैवेति भार्यामपि भार्यैवेति च ४८

केनचिदुपन्यासेकृते तन्मतनिरासार्थं नवाक्यसूत्रमिदमुच्यते ४

तदपि न तत्सम्यग्ज्ञानमेवं मत्यादीनामपि रूपादिषु विपर्ययो वेदितव्यः तथाहि कश्चित् मिथ्यादर्शन
परिणाम आत्मन्यवस्थितः रूपाद्युपलब्धौ सत्यामपि कारणविपर्यासं भेदाभेदविपर्यासं स्वरूपविप
र्यासं च जनयति कारणविपर्यासं तावत् रूपादीनामेकं कारणममूर्तं नित्यमिति केचित् कल्पयन्ति अ
परे पृथिव्यादिजातिभिन्नाः परमाणवश्चतुस्त्रिद्व्येकगुणाः तुल्यजातीयानां कार्याणामारम्भका इति
अन्ये वर्णयन्ति पृथिव्यादीनि चत्वारि भूतानि भौतिकधर्माः वर्णगंधरसस्पर्शा एतेषां समुदायो रूप
परमाणुरष्टकः इत्यादि इतरे कल्पयन्ति पृथिव्यप्तेजोवायवः काठिन्यादिद्रवत्वाद्युष्णत्वादि[redacted]दि इत्येता
गुणाः जातिभिन्नाः परमाणवः कार्यस्यारम्भकाः भेदाभेदविपर्यासः कारणात्कार्यमर्थान्तरभूतमे
न२ वशतिर्ध्यर्थान्तरभूतमेवेति च परिकल्पना स्वरूपविपर्यासः रूपादयो निर्विकल्पाः संति न संत्येव वा
तदाकारपरिणतं विज्ञानमेव न तदालम्बनं वस्तु बाह्यमिति एवमन्यानपि परिकल्पनाभेदान् दृष्टे

४८ ष्टविसत्त्वात्मिथ्यादर्शनोदयाकल्पयंति तत्र च श्रद्धानमुत्पादयंति ततस्तत्मतिज्ञानं श्रुतज्ञानं [redacted] वि
विभंगज्ञानं च भवति सम्यग्दर्शनं पुनः तत्त्वार्थाधिगमे श्रद्धानं जनयति ततस्तन्मतिज्ञानं श्रुतज्ञानं
अवधिज्ञानं भवति आह प्रमाणं द्विप्रकारं वर्णितं प्रमाणैकदेशाश्च नयास्तदनंतरोद्देशभाजो निर्दि
४ग्र+ ष्टव्या इत्यत आह नैगमसंग्रहव्यवहारऋजुसूत्रशब्दसमभिरूढैवंभूता नयाः एतेषां सामान्यविशेषल
क्षणं वक्तव्यं सामान्यलक्षणं तावत् वस्तुन्यनेकांतात्मन्यविरोधेन हेत्वर्पणात्साध्यविशेषयाथा
त्म्यप्रापणप्रवणः प्रयोगो नयः स द्वेधा द्रव्यार्थिकः पर्यायार्थिकश्चेति द्रव्यं सामान्यमुत्सर्गोऽनुवृत्तिरित्य
र्थः तद्विषयो द्रव्यार्थिकः पर्यायो विशेषोऽपवादो व्यावृत्तिरित्यर्थः तद्विषयः पर्यायार्थिकः तयोर्भेदाः
नैगमादयः तेषां विशेषलक्षणमुच्यते अनभिनिर्वृत्तार्थसंकल्पमात्रग्राही नैगमः कंचित्पुरुषं प
रिगृहीतपरशुं गच्छंतमवलोक्य कश्चित्पृच्छति किमर्थं भवान्गच्छतीति स आह प्र[illegible]मानेतुमिति ना ४८

सौ तदा प्रस्थपर्यायः सन्निहितः तदभिनिर्वृत्तये संकल्पमात्रे प्रस्थव्यवहारः तथा एधोदका[illegible]रणे व्याप्रियमा
किंचित णं कंचित्पृच्छति किं करोति भवानिति स आह ओदनं प[illegible]चामीति न तदौदनपर्यायः सन्निहितः तदर्थे
व्यापारे स प्रयुज्यते एवंप्रकारो लोकसंव्यवहारः अनभिनिर्वृत्तार्थसंकल्पमात्रविषयो नैगमस्य गोचरः नय३
प स्वजात्यविरोधेनैकध्यमुपनीय पर्यायानाक्रांतभेदानविशेषेण समस्तग्रहणात्संग्रहः सद्द्रव्यं घट
इत्यादि सदित्युक्ते सदिति वाग्विज्ञानानुप्रवृत्तिलिंगानुमितसत्ताधारभूतानामविशेषेण सर्वेषां संग्र
हः तथा द्रव्यमित्युक्तेऽपि द्रवति गच्छति तांस्तान्पर्यायानित्युपलक्षितानां जीवाजीवतद्भेदप्रभेदानां सं
ग्रहः तथा घट इत्युक्तेऽपि घटबुद्ध्यभिधानानुगमलिंगानुमितसकलार्थसंग्रहः एवंप्रकारोन्योपि सं
ग्रहनयस्य विषयः संग्रहनयाक्षिप्तानामर्थानां विधिपूर्वकमवहरणं व्यवहारः को विधिः यः संग्रह
गृहीतोर्थः तदानुपूर्व्येणैव व्यवहारः प्रवर्त्तत इत्ययं विधिः तद्यथा सर्वसंग्रहेण यत्सत् गृहीतं तच्चानपे

५० स्थितविशेषं नालं संव्यवहारायेति व्यवहारनयः आश्रीयते यत्सत्तद्द्रव्यं गुणो वेति द्रव्येणापि संग्रहाक्षि
प्तेन जीवाजीवविशेषानपेक्षेण न शक्यः संव्यवहार इति जीवद्रव्यमजीवद्रव्यमिति वा व्यवहार आश्री
व यते जीवाजीवावपि संग्रहाक्षिप्तौ नालं व्यवहारायेति प्रत्येकं देवनारकादिर्घटादिश्च व्यवहारेणाश्रीय
ते एवमयं नयस्तावद्वर्तते यावत्पुनर्नास्ति विभागः ऋजुं प्रगुणं सूत्रयति तंत्रयतीति वा ऋजुसूत्रः
पूर्वापरांस्त्रिकालविषयानतिशय्य वर्तमानकालविषयमादत्ते अतीतानागतयोर्विनष्टानुत्पन्नत्वे त्वाप
न व्यवहाराभावात् तच्च वर्तमानं समयमात्रं तद्विषयपर्यायमात्रग्राह्ययमृजुसूत्रः ननु संव्यवहार
लोपप्रसंग इति चेत् नास्य नयस्य विषयमात्रप्रदर्शनं क्रियते सर्वनयसमूहसाध्यो हि लोकसंव्यवहारः
लिंगसंख्यासाधनादिव्यभिचारनिवृत्तिपरः शब्दनयः तत्र लिंगव्यभिचारः पुष्यस्तारका नक्षत्रमिति
संख्याव्यभिचारः जलमापो वर्षाः ऋतुराम्रा वनमिति साधनव्यभिचारः सेना पर्वतमधिवसति पुरुषव्यभि ५०

बेरणानगरं २ कारकव्यभिचारो यथा २

ए१
चारः एहि मन्ये रथेन यास्यसि नहि [redacted] यातस्ते पितेति कालव्यभिचारः विश्वदृश्वास्य पुत्रो जनिता भाविकृ
त्यमासीदिति उपसर्गव्यभिचारः संतिष्ठते प्रतिष्ठते विरमत्युपरमतीति एवं प्रकारं व्यवहारनयमन्याय्यं
मन्यते अन्यार्थस्यान्यार्थेन संबंधाभावात् लोकसमयविरोध इति चेद्विरुध्यतां तत्त्वं मीमांस्यते ननु भै
छा७ षज्यमातुरे [redacted] नुवर्त्ति नानार्थसमभिरो [redacted] हणात्समभिरूढः यतो नानार्थान्
समभिरूढः समतीत्यैकमर्थमाभिमुख्येन रूढः [redacted] गौरित्ययं शब्दो वागादिष्वर्थेषु वर्तमानः पशावभिरूढः
अथवा अर्थगत्यर्थः शब्दप्रयोगस्तत्रैकस्यार्थस्यैकेन गतार्थत्वात् पर्यायशब्दप्रयोगोऽनर्थकः शब्दभे
दश्चेदस्त्यर्थभेदेनाप्यवश्यं भवितव्यमिति नानार्थसमभिरोहणात्समभिरूढः इंदनादिंद्रः शकनाच्छ
क्रः पूर्दारणात्पुरंदर इति एवं सर्वत्र अथवा यो यत्राभिरूढः स तत्र समेत्याभिमुख्येनारोहणात्समभि
रूढः यथा क्व भवानास्ते आत्मनीति कुतः वस्त्वंतरे वृत्त्यभावात् यद्यन्यस्यान्यत्र वृत्तिः स्यात् ज्ञानादीनां

५१ पा[?]दीनां चाकाशो वृत्तिः स्यात् येनात्मना भूतस्तेनैवाध्यवस्यतीति एवंभूतः स्वाभिधेयक्रियाप
रिणतिक्षण एवाशौ युक्तो नाम्स्यादिति यदेंदंतीतिंद्रो नाभिषेचक नपूजक इति यदैवगच्छतित
दैवगौः नाश्वितो न शायित इति अथवा येनात्मना येनज्ञानेन भूतः परिणतः तेनैवाध्यवसाययतिपथें
द्रोग्निज्ञानपरिणत आत्मैवेंद्रोग्निश्चेति उक्ता नैगमादयो नयाः उत्तरोत्तरसूक्ष्मविषयत्वादेषां क्रमः
पूर्वपूर्वहेतुकत्वाच्च एवमेते नयाः पूर्वपूर्वविरुद्धमहाविषया उत्तरोत्तरानुकूलाल्पविषयाः द्रव्यस्या
नंतशक्तेः प्रतिशक्ति विभिद्यमानाः बहुविकल्पा जायंते त एते गुणप्रधानतया परस्परतंत्राः सम्य
ग्दर्शनहेतवः पुरुषार्थक्रियासाधनसामर्थ्यात् तंत्वादय इव यथोपायं विनिवेश्यमानाः पटादिसंज्ञाः
स्वतंत्राश्चासमर्थाः तंत्वादिवदेवा विषम उपन्यासः तंत्वादयो निरपेक्षाः अपि कांचिदर्थमात्रां जनय
तिभवति हि कश्चित्स्वप्रत्येकं तंतुः [?]त्वक्त्राणे समर्थः एकश्च वल्कजः बंधने समर्थः इमे पुनर्नया निरपेक्षाः ५१

संतः न कांचिदपि सम्यग्दर्शनमात्रां प्रादुर्भावयंतीति नैष दोषः अभिहितानवबोधात् अभिहितमर्थ
मनवबुध्य परेणेदमुपालभ्यते एतदुक्तं निरपेक्षेषु तंत्वादिषु पटादिकार्यं नास्तीति य[?]त्तेनोपदर्शितं
न तत्पटादिकार्यं किं तर्हि केवलतंत्वादिकार्यं तंत्वादिकार्यमपि तंत्वाद्यवयवेषु निरपेक्षेषु नास्त्येवेत्य
स्मत्पक्षसिद्धिरेव अथ तंत्वादिषु पटादिकार्यं शक्त्यपेक्षया अस्तीत्युच्यते नयेष्वपि निरपेक्षेषु बुद्ध्यभि
धानरूपेषु कारणवशात् सम्यग्दर्शनहेतुत्वविपरिणतिसद्भावात् शक्त्यात्मनास्तित्वमिति साम्यमेवोप
न्यासस्य ज्ञानदर्शनयोस्तत्त्वं नयानां चैव लक्षणं ज्ञानस्य च प्रमाणत्वमध्यायेऽस्मिन्निरूपितं इति
तत्त्वार्थवृत्तौ सर्वार्थसिद्धिसंज्ञायां प्रथमोऽध्यायः समाप्तः १ आह सम्यग्दर्शनस्य विषयभावेनो
पदिष्टेषु जीवादिषु आदावुपन्यस्तस्य जीवस्य किं स्वतत्त्वमित्यत्रोच्यते औपशमिकक्षायिकौ भावौ मिश्रश्च जीव
स्य स्वतत्त्वमौदयिकपारिणामिकौ च आत्मनि कर्मणः स्वशक्तेः कारणवशादनुद्भूतिरुपशमः यथा क

५२ तकादिद्रव्यसंबंधादंभसि पंकस्योपशमः क्षयः आत्यंतिकी निवृत्तिः यथा तस्मिन्नेवांभसि शुचिभाजनांत
रसंक्रांते पंकस्यात्यंताभावः उभयात्मको मिश्रः यथा तस्मिन्नेवांभसि कतकादिद्रव्यसंबंधात् पंकक्षीणा स्य
क्षीणवृत्तिः द्रव्यादिनिमित्तवसात् कर्मणां फलप्राप्तिरुदयः द्रव्यात्मलाभमात्रहेतुकः उपशमप्रयोज परीणम २
नमस्येत्यौपशमिकः एवं क्षायिकः क्षायोपशमिकः औदयिकः पारिणामिकश्च त एते पंच भावा अ
साधारणा जीवस्य स्वतत्त्वमित्युच्यते सम्यग्दर्शनस्य प्रकृतत्वात्तस्य त्रिषु विकल्पेषु उ पशमिकमादौ
लभ्यत इति तस्यादौ ग्रहणं क्रियते तदनंतरं क्षायिकग्रहणं तस्य प्रतियोगित्वात् संसार्यपेक्षया द्रव्यतः
ततोऽसंख्येयगुणत्वाच्च ततः उत्तरं मिश्रग्रहणं तदुभयात्मकत्वात् ततोऽसंख्येयगुणत्वाच्च तेषां अनंत मवेष्ठाअ
गुणत्वादौदयिकपारिणामिकग्रहणं अंते क्रियते अत्र द्वंद्वनिर्देशः कर्तव्यः औपशमिकक्षायिकमिश्रौदयि
कपारिणामिके तथी सति द्विश्चशब्दो न कर्तव्यो भवति नैवं शंक्यं अन्यगुणापेक्षया मिश्र इति प्रतीयेत ५२
रिणाम

वाक्ये पुनः सति चशब्देन प्रकृतोभयानुकर्षः कृतो भवति तर्हि क्षायोपशमिकग्रहणमेव कर्तव्यमिति चे
न्न गौरवात् मिश्रग्रहणं मध्ये क्रियते उभयापेक्षार्थं भव्यस्य औपशमिकक्षायिकौ भावौ मिश्रः पुनरभव्यस्या
पि भवति औदयिकपारिणामिकाभ्यां सह भव्यस्यापि भावापेक्षया तल्लिंगसंख्याप्रसंगः स्वतत्त्वस्येति चे
सतत्वं४ न्नोपात्तलिंगसंख्यत्वात् तद्भाव[illegible]तत्त्वं स्वतत्त्वमिति अत्राह तस्यैकस्यात्मनो ये भावा औपशमिकादय स्वतत्त्व ४
स्ते किं भेदवंतः उताभेदा इति अत्रोच्यते भेदवंतो यद्येवं भेदा उच्यतामित्यत आह द्विनवाष्टादशैक
विंशतित्रिभेदा यथाक्रमं द्व्यादीनां संख्याशब्दानां कृतद्वंद्वानां भेदशब्देन सह स्वपदार्थे अन्यपदा
र्थे वा वृत्तिर्वेदितव्या द्वौ च नव च अष्टादश च एकविंशतिश्च त्रयश्च द्विनवाष्टादशैकविंशतित्रयः त ए
व भेदा ते भेदाः येषामिति वा वृत्तिः द्विनवाष्टादशैकविंशतित्रिभेदा इति यदा स्वपदार्थे वृत्तिस्तदा औप
शमिकादीनां भावानां द्विनवाष्टादशैकविंशतित्रि भेदा इति अ संबंधः क्रियते अर्थवशात् द्विभक्तिय
भि

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

५३ रिणामश्चेति यदान्यपदार्थवृत्तिः तदानिर्दिष्टविभक्त्यंता एवाभिसंबध्यते औपशमिकादयो भावाः द्विनवा
ष्टादशैकविंशति त्रिभेदाश्चेति यथाक्रमवचनं यथासंख्यप्रतिपत्त्यर्थं औपशमिको द्विभेदः क्षायिको न
वभेदः मिश्रोष्टादशभेदः औदयिकः एकविंशतिभेदः पारिणामिकस्त्रिभेद इति यद्येवमौपशमिकस्य कौ मि३
द्वौ भेदौ इत्यत आह सम्यक्त्वचारित्रे व्याख्यातलक्षणे सम्यक्त्वचारित्रे औपशमिके कथं कथमिति चेत्
उच्यते चारित्रमोहो द्विविधः कषायवेदनीयो नोकषायवेदनीयश्चेति तत्र कषायवेदनीयस्य भेदा अ
नंतानुबंधिनः क्रोधमानमायालोभाश्चत्वारः दर्शनमोहस्य त्रयो भेदाः सम्यक्त्वं मिथ्यात्वं सम्यग्मिथ्या
त्वमिति आसां सप्तानां प्रकृतीनां उपशमादौपशमिकं सम्यक्त्वं अनादिमिथ्यादृष्टेर्भव्यस्य कर्मोदयाप
ादितकालुष्ये सति कुतः तदुपशमः काललब्ध्यादिनिमित्तत्वात् तत्र काललब्धिस्तावत् कर्माविष्ट आ
त्मा [illegible]काले अर्धपुद्गलपरिवर्त्तनाख्येऽवशिष्टे प्रथमसम्यक्त्वग्रहणस्य योग्यो भवति नाधिके इति ५३

काल१ का

इयमेका काललब्धिः अपरा लब्धिः कर्मस्थितिकाललब्धिः उत्कृष्टस्थितिकेषु कर्मसु जघन्यस्थितिकेषु
च प्रथमसम्यक्त्वलाभो न भवति क्व तर्हि भवति अंतःकोटाकोटीसागरोपमस्थितिकेषु कर्मसु बंधमाप
द्यमानेषु विशुद्धपरिणामवशात् सत्कर्मसु च ततः संख्येयसागरोपमसहस्रोनायामंतःकोटाकोटीसा
गरोपमस्थितौ स्थापितेषु प्रथमसम्यक्त्वयोग्यो भवति अपरा काललब्धिर्भवापेक्षया भव्यः पंचेंद्रियः संज्ञी
पर्याप्तकः सर्वविशुद्धः प्रथमसम्यक्त्वमुत्पादयति आदिशब्देन जातिस्मरणादिपरिगृह्यते कृत्स्नस्य मो
हनीयस्योपशमादौपशमिकं चारित्रं तत्र सम्यक्त्वस्यादौ वचनं तत्पूर्वकत्वाच्चारित्रस्य यः क्षायिको भावो न
वविध उद्दिष्टस्तस्य भेदस्वरूपप्रतिपादनार्थमाह ज्ञानदर्शनदानलाभभोगोपभोगवीर्याणि च ४ च
शब्दः सम्यक्त्वचारित्रानुकर्षणार्थः ज्ञानावरणस्यात्यंतक्षयात् केवलज्ञानं क्षायिकं यथा केवलज्ञानं क्षा
यिकं तथा केवलदर्शनं दानांतरायस्यात्यंतक्षयादनंतप्राणिगणानुग्रहकरं क्षायिकमभयदानं
पूर्वं हि सम्यक्त्वपर्यायेणाविर्भावः आत्मनः क्रमाच्चारित्रपर्याय आविर्भवति

प्राडुर्भवंति निरवशेषस्योपभोगांतरायस्य प्रलयात् प्रादुर्भूतो नंत उपभोगः क्षायिकः ४
५४ [illegible] लाभांतरायस्याशेषस्य निरासात् परित्यक्तकवलाहारक्रियाणां केवलिनां यतः शरीरबलाधानहेतवः
अन्यमनुजासाधारणाः परमशुभाः सूक्ष्माः अनंताः प्रतिसमयं पुद्गलाः संबंध मुपयांति स क्षायिको लाभः
जै४ कृत्स्नस्य भोगांतरायस्य तिरोभावात् आविर्भूतो तिशयवानऽनंतो भोगः क्षायिकं यतः कुसुमवृष्ट्यादयो
विशेषाः यतः सिंहासनचामरछत्रत्रयादयो विभूतयः वीर्यांतरायस्य कर्म्मणोऽत्यंतक्षयात् आविर्भूतमनंतवी
र्यं क्षायिकं सर्वोक्तानां सप्तानां प्रकृतीनामात्यंतक्षयात् क्षायिकं सम्यक्त्वं चारित्रमपि तथा यदि क्षायिक
दानादिभावकृतमभयदानादि सिद्धेष्वपि तत्प्रसंगः नैष दोषः शरीरनामतीर्थकरनामकर्म्मोदया
द्यपेक्षत्वात् तस्य तदभावे तदप्रसंगः कथं तर्हि तेषां सिद्धेषु वृत्तिः परमानंताव्याबाधसुखरूपेणैव तेषां
तत्र वृत्तिः केवलज्ञानरूपेणानंतवीर्यवृत्तिवत् यः उक्तः क्षायोपशमिको भावोऽष्टादशविकल्पः तद्भेदनि २
रूपणार्थमाह ज्ञानाज्ञानदर्शनलब्धयश्चतुस्त्रित्रिपंचभेदाः सम्यक्त्वचारित्रसंयमासंयमाश्च ५ च ५४

त्रयश्च तै१ श्च१ तै
त्वारश्च त्रयश्च पंच च चतुस्त्रित्रिपंच भेदाः येषां ते चतुस्त्रित्रिपंचभेदाः यथाक्रममभिसंबध्यंते नाभिसंबंधाच्चतु
रादिभिः ज्ञानादीनि भिसंबंध्यंते चत्वारि ज्ञानानि त्रीण्यज्ञानानि त्रीणि दर्शनानि पंच लब्धय इति सर्वघातिस्प घा२
जै२ र्द्धकानां उदयक्षयात् तेषामेव सदुपशमात् देशघातिस्पर्द्धकानां उदये क्षायोपशमिको भावो भवति तत्र
ज्ञानादीनां वृत्तिः स्वावरणांतरायक्षयोपशमात् व्याख्यातव्या सम्यक्त्वग्रहणेन वेदकसम्यक्त्वं गृह्यते अनंता
नुबंधिकषायचतुष्टयस्य मिथ्यात्वसम्यग्मिथ्यात्वयोश्चोदयक्षयात् सदुपशमाच्च सम्यक्त्वस्य देशघातिस्प
र्द्धकस्य उदये सति तत्त्वार्थश्रद्धानं क्षायोपशमिकं सम्यक्त्वं अनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानद्वादशक
षायोदयक्षयात् सदुपशमाच्च संज्वलनकषायचतुष्टयान्यतमदेशघातिस्पर्द्धकोदये नोकषायस्य यथासंभ पनवकस्य ५४
वोदये च निवृत्तिपरिणाम आत्मनः क्षायोपशमिकं चारित्रं अनंतानुबंध्यप्रत्याख्यानकषायाष्टकोदय
क्षयात् सदुपशमाच्च प्रत्याख्यानकषायोदये संज्वलनकषायस्य देशघातिस्पर्द्धकोदये नोकषायनवकस्य
यथासंभवोदये च विरताविरतपरिणामः क्षायोपशमिकः संयमासंयम इत्याख्यायते एकविंशतिविकल्प
य

५५

औदयिको भाव उद्दिष्टस्तस्य भेदसंज्ञाकीर्त्तनार्थमिदमुच्यते ॥ गतिकषायलिंगमिथ्यादर्शनाज्ञानासंयतासि
द्धलेश्याः चतुश्चतुस्त्र्येकैकैकैकषड्भेदाः यथाक्रममित्यनुवर्त्तते तेनाभिसंबंधात् गतिश्चतुर्भेदा नरकगतिः
तिर्यग्गतिर्मनुष्यगतिर्देवगतिरिति तत्र नरकगतिनामकर्म्मोदयान्नारको भावो भवतीति नरकगतिरौद[यि]
की एवमितरत्रापि कषायश्चतुर्भेदः क्रोधो मानो माया लोभ इति तत्र क्रोधनिर्वर्त्तकस्य कर्म्मण उदयात्[क्रो] क्रो
ध औदयिकः एवमितरत्रापि लिंगं त्रिभेदं स्त्रीवेदः पुंवेदः नपुंसकवेद इति स्त्रीवेदकर्म्मण उदयात् स्त्रीवे
द औदयिक एवमितरत्रापि मिथ्यादर्शनमेकभेदं मिथ्यादर्शनकर्म्मण उदयात्तत्वार्थाश्रद्धानपरिणामो र्थी
मिथ्यादर्शनमौदयिकं ज्ञानावरणकर्म्मण उदयात्पदार्थानवबोधो भवति तदज्ञानमौदयिकं चारित्र चारित्रमोहमेकं
मोहस्य सर्व्वघातिस्पर्द्धकस्योदयात् असंयत औदयिकः कर्म्मोदयसामान्यापेक्षोऽसिद्ध औदयिकः लेश्या
द्विविधा द्रव्यलेश्या भावलेश्या चेति जीवभावाधिकाराद् द्रव्यलेश्या नाधिकृता भावलेश्या कषायोदयरंजिता ५५

भा

योगप्रवृत्तिरिति कृत्वा औदयिकीत्युच्यते सा लेश्या षड्विधा कृष्णलेश्या नीललेश्या कापोतलेश्या तेजोलेश्या प
द्मलेश्या शुक्ललेश्या चेति ननु च उपशांतकषाये क्षीणकषाये सयोगकेवलिनि च शुक्ललेश्यास्तीत्यागमः
तत्र कषायानुरंजनाभावादौदयिकत्वं नोपपद्यते नैष दोषः पूर्वभावप्रज्ञापन[illegible]यासौ योगप्रवृत्तिः क नयापेक्ष
षायानुरंजिता सैवेत्युपचारादौदयिकीत्युच्यते तदभावादयोगकेवलिन्यलेश्य इति निश्चीयते यः पारिणा
मिको भावस्त्रिभेद उक्तः तद्भेदस्वरूपप्रतिपादनार्थमाह ॥ जीवभव्याभव्यत्वानि च ॥ जीवत्वं भव्यत्वमभ
व्यत्वमिति त्रयो भावाः पारिणामिकाः अन्यद्रव्यासाधारणा आत्मनो वेदितव्याः कुतः पुनरेषां पारिणा
मिकत्वं कर्म्मोदयोपशमक्षयक्षयोपशमानपेक्षित्वात् जीवत्वं चैतन्यमित्यर्थः सम्यग्दर्शनादिभावेन भवि
ष्यतीति भव्यः तद्विपरीतोऽभव्यः एते त्रयो भावा जीवस्य पारिणामिकाः ननु चास्तित्वनित्यत्वप्रदेशवत्त्वा
दयोऽपि भावाः पारिणामिकाः संति तेषामिह ग्रहणं कर्त्तव्यं न कर्त्तव्यं कृतमेव कथं चेत्त्वशब्देन समुच्चित

५६

विरुध्यते न

नत्वात् यद्येवं त्रय इति संख्या विरुध्यते असाधारणा जीवस्य भावाः पारिणामिकास्त्रय एव अस्तित्वादयः पुनः
जीवाजीवविषयत्वात्साधारणा इति चशब्देन पृथग्गृह्यंते आह औपशमिकादिभावानुपपत्तिरमू
र्त्तित्वादात्मनः कर्म्मबंधापेक्षा हि ते न चामूर्त्तेः कर्म्मणां बंधो युज्यत इति नानेकांतात् नायमेकांतः अमू
र्त्तिरेवात्मेति कर्म्मबंधनपर्यायापेक्षया तदावेशात्स्यान्मूर्त्तिः शुद्धस्वरूपापेक्षया स्यादमूर्त्तः यद्येवं
कर्म्मबंधावेशादस्यैकत्वे सत्यविवेकः प्राप्नोति नैष दोषः बंधं प्रत्येकत्वे सत्यपि लक्षणभेदादस्य ना
नात्वमवसीयते उक्तं बंधं पडि एयत्तं लक्खणदो हवदि तस्स णाणत्तं तम्हा अमुत्तिभावो णेयंतो होइ
जीवस्स १ यद्येवं तदेव लक्षणमुच्यतां येन नानात्वमवसीयत इत्यत आह उपयोगो लक्षणं उ
भयनिमित्तवशादुत्पद्यमानश्चैतन्यानुविधायी परिणाम उपयोगः तेन बंधं प्रत्येकत्वे सत्यप्यात्मा लक्ष्यते
सुवर्णरजतयोर्बंधं प्रत्येकत्वे सत्यपि वर्णादिभेदवत् तद्भेददर्शनार्थमाह स द्विविधोऽष्टचतुर्भेदः उ ५६

पयोगो द्विविधः ज्ञानोपयोगः दर्शनोपयोगश्चेति ज्ञानोपयोगोऽष्टभेदः मतिज्ञानं श्रुतज्ञानं अवधिज्ञानं
मनःपर्ययज्ञानं केवलज्ञानं मत्यज्ञानं श्रुताज्ञानं विभंगज्ञानं चेति दर्शनोपयोगश्चतुर्विधः चक्षुर्दर्शनं
अचक्षुर्दर्शनं अवधिदर्शनं केवलदर्शनं चेति तयोः कथं भेदः साकारानाकारभेदात् साकारं ज्ञानं अनाका
रं दर्शनमिति तच्छद्मस्थेषु क्रमेण वर्त्तते निरावरणेषु युगपत् सर्व्वकालभाविनोऽपि दर्शनात् ज्ञानस्य प्रा
गुपन्यासः अभ्यर्हितत्वात् सम्यग्ज्ञानप्रकरणात् सर्व्वं पंचविधो ज्ञानोपयोगो व्याख्यातः इह पुनरुपयोग
ग्रहणाद्विपर्ययोऽपि गृह्यते इत्यष्टविध इत्युच्यते यथोक्तेनानेनाभिहितपरिणामेन सर्व्वात्मसाधारणेनो
पयोगेन ये उपलक्षिता उपयोगिनः ते द्विविधाः संसारिणो मुक्ताश्च संसरणं संसारः परिवर्त्तनमित्य
र्थः स येषामस्ति ते संसारिणः तत्परि[illegible]वर्त्तनं पंचविधं द्रव्यपरिवर्त्तनं क्षेत्रपरिवर्त्तनं कालपरिवर्त्तनं भ
वपरिवर्त्तनं भावपरिवर्त्तनं तत्र द्रव्यपरिवर्त्तनं द्विविधं नोकर्म्मद्रव्यपरिवर्त्तनं कर्म्मद्रव्यपरिवर्त्तनं चेति त

५७ त्रनोकर्म्मद्रव्यपरिवर्त्तनंनाम त्रयाणांशरीराणांषस्णांपर्याप्तीनांयोग्यायेपुद्गलाएकेनजीवेनएकस्मिन्समये
गृहीताःस्निग्धरूक्षवर्णगंधादिभिस्तीव्रमंदमध्यमभावेनचयथावस्थिताद्वितीयादिसमयेषुनिर्ज्जीर्णाःअगृ
२ श्रग्र हीतांनंतवारानतीत्यमिश्रकांश्चानंतवारानतीत्यमध्ये गृहीतांश्चानंतवारानतीत्यतएवतेनैवप्रकारेणत
स्यैवजीवस्यनोकर्म्मभावमापद्यंतेयावत्तावत्समुदितंनोकर्म्मद्रव्यपरिवर्त्तनंकर्म्मद्रव्यपरिवर्त्तनमुच्यते
एकस्मिन्समयेएकेनजीवेनअष्टविधकर्म्मभावेनयेगृहीताःपुद्गलाःसमयाधिकामावलिमतीत्यद्वितीया
दिषुसमयेषुनिर्ज्जीर्णाःपूर्वोक्तेनैवक्रमेणतेएवतेनैवप्रकारेणतस्यजीवस्यकर्म्मभावमापद्यंते यावत्ता
वत्कर्म्मद्रव्यपरिवर्त्तनं उक्तंच गाथा सव्वेविपुग्गलाखलुकमसोभुत्तुझियायजीवेण असइंअणंतखुत्तो
पोग्गलपरियट्टसंसारे क्षेत्रपरिवर्त्तनमुच्यते सूक्ष्मनिगोतजीवोत्पन्नःक्षुद्रभवग्रहणंजीवित्वामृतः ५७
सएवपुनस्तेनैवावगाहेनद्विरुत्पन्नः तथात्रिःतथाचतुरितिएवंयावदंगुलस्यासंख्येयभागप्रमिताकाशप्रदे
ऽपर्याप्तकःसर्वजघन्यप्रदेशशरीरो लोकस्याष्टमध्यप्रदेशान्स्वशरीरमध्यप्रदेशान्कृत्वोत्प

चतुर्थोत्सर्पिणीकालसमये चतुर्थसमये जत्पन्नः ×५

शास्तावत्कृत्वः तत्रैवजनित्वापुनरेकैकप्रदेशाधिकभावेनसर्वोलोकःआत्मनोजन्मक्षेत्रभावमुपनीतोभव
ति यावत्तावत्क्षेत्रपरिवर्त्तनं उक्तंच सव्वह्मिलोयखेत्तेकमसोतंनत्थिजंनउप्पन्नंओगाहणाएबहुसो
परिभमिदोखेत्तसंसारे कालपरिवर्त्तनमुच्यते उत्सर्पिण्याःप्रथमसमयेजातःकश्चिज्जीवःस्वायु
षःपरिसमाप्तौमृतःसएवपुनःद्वितीयायाःउत्सर्प्पिण्याःद्वितीयसमयेजातःस्वायुषःक्षयान्मृतःसएवतृ
तीयायाःउत्सर्प्पिण्यास्तृतीयसमयेजातः एवमनेनक्रमेणोत्सर्प्पिणीपरिसमाप्ता तथावसर्प्पिणीच एवं
जन्मनैरंतर्य्यमुक्तंमरणस्यापिनैरंतर्यंतथैवग्राह्यं एतावत्कालपरिवर्त्तनं उक्तंच उस्सप्पिणिअवसप्पिणि
समयावलियासुणिरवसेसासु जातोमदोयबहुसोभमणेणदुकालसंसारे भवपरिवर्त्तनमुच्यते
नरकगतोसर्व्वजघन्यमायुःदशवर्षसहस्राणितेनायुषातत्रोत्पन्नःपुनःपरिभ्रम्यतेनैवायुषातत्रैवजातः
एवंदशवर्षसहस्राणांयावंतःसमयाःतावत्कृत्वःतत्रैवजातःमृतःपुनरेकैकसमयाधिकभावेनत्रयस्त्रिं

DR. BHAU DAJI MEMORIAL
डाक्टरभाऊदाजीइत्यस्यस्मारकम्

५८ शत्सागरोपमाणि परिसमापितानि ततः प्रच्युत्य तिर्यग्गतावंतर्मुहूर्त्तायुः समुत्पन्नः सर्वोक्तेनैव क्रमेण त्रीणि
पल्योपमानि तेन परिसमापितानि एवं मनुष्यगतौ च देवगतौ नारकवत् अयं तु विशेषः एकत्रिंशत्सागरो
पमाणि परिसमापितानि यावत्तावद्भवपरिवर्त्तनं उक्तं च णिरयादिजहन्नादिसु जावदु उवरिल्लिया दु गेव
ज्जा मिच्छत्तसंसिदेण दु बहुसो वि भवट्ठिदी भमिदो ॥ भावपरिवर्त्तनमुच्यते पंचेंद्रियः संज्ञी पर्याप्त
को मिथ्यादृष्टिः कश्चिज्जीवः स सर्वजघन्यां स्वयोग्यां ज्ञानावरणप्रकृतेः स्थितिं अंतःकोटीकोटीसंज्ञिकामा
पद्यते तस्य कषायाध्यवसायस्थानानि असंख्येयलोकप्रमितानि षट्स्थानपतितानि तत्स्थितियोग्यानि
भवंति तत्र सर्वजघन्यकषायाध्यवसायस्थाननिमित्तान्यनुभवाध्यवसायस्थानान्यसंख्येयलोकप्रमिता
नि भवंति एवं सर्वजघन्यां स्थितिं सर्वजघन्यं च कषायाध्यवसायस्थानं सर्वजघन्यमेव चानुभागबंधस्थान
मास्कंदतः तद्योग्यं सर्वजघन्यं योगस्थानं भवति तेषामेव स्थितिकषायानुभवस्थानानां द्वितीयमसंख्येय ५८
१०कं

ग
भागवृद्धिसंयुक्तं योगस्थानं भवति एवं च तृतीयादिषु चतुःस्थानपतितानि श्रेण्यसंख्येयभागप्रमितानि योगस्था
नानि भवंति तथा तामेव स्थितिं तदेव कषायाध्यवसायस्थानं च प्रतिपद्यमानस्य द्वितीयमनुभवाध्यवसाय
स्थानं भवति तस्य च योगस्थानानि पूर्ववद्वेदितव्यानि एवं तृतीयादिष्वपि अनुभवाध्यवसायस्थानेषु आ अ
असंख्येयलोकपरिसमाप्तेः एवं तामेव स्थितिमापद्यमानस्य द्वितीयकषायाध्यवसायस्थानं भवति तस्या
प्यनुभवाध्यवसायस्थानानि योगस्थानानि च पूर्ववद्वेदितव्यानि एवं तृतीयादिष्वपि कषायाध्यवसायस्था
स× नेषु आ असंख्येयलोकपरिसमाप्तेः वृद्धिक्रमो वेदितव्यः उक्ताया जघन्यायाः स्थितेः समयाधिकायाः कषा
यादिस्थानानि योगस्थानानि पूर्ववदेवं समयाधिकक्रमेण आ उत्कृष्टस्थितेस्त्रिंशत्सागरोपमकोटीकोटी
रसर्ववत परिमितायाः कषायादिस्थानानि वेदितव्यानि अनंतभागवृद्धिः असंख्येयभागवृद्धिः संख्येयभागवृद्धिः सं
ख्येयगुणवृद्धिः असंख्येयगुणवृद्धिः अनंतगुणवृद्धिः इमानि षट्स्थानानि वृद्धिहानिनिरूपितानि तथैव

अनंतभागवृद्धि अनंतगुणवृद्धिरहितानिचयानिस्थानानानिएवंसर्वेषांकर्म्मणांमूलप्रकृतीनांउत्तरप्रकृ
तीनांच परिवर्त्तनक्रमोवेदितव्यः तदेतत्सर्वंसमुदितंभावपरिवर्त्तनं उक्तंच सव्वापयडि ठिदीउअणुभा
गपदेसबंधठाणाणि मिछत्तसंसिदेणयभमिदोपुणभावसंसारे उक्तात्पंचविधात्संसारान्निवृत्तायेते
मुक्ताः संसारिणांप्रागुपादानंतत्पूर्वकत्वान्मुक्तव्यपदेशस्य येएतेसंसारिणस्तेद्विविधाः समनस्काअमनस्काः
११ मनोद्विविधंद्रव्यमनोभावमनश्चेति तत्रपुद्गलविपाकिकर्म्मोदयापेक्षं द्रव्यमनः वीर्यांतरायनोइं
द्रियावरणक्षयोपशमापेक्षात्मनोविशुद्धिर्भावमनः तेनमनसासहवर्त्तंतइतिसमनस्काःनविद्यतेमनो
येषांतइमेऽमनस्काः एवंमनसोभावाभावाभ्यां संसारिणोद्विविधाविभज्यंते समनस्काश्चामनस्काश्च
समनस्कामनस्काइति अभ्यर्हितत्वात्समनस्कशब्दस्यपूर्वनिपातः कथमभ्यर्हितत्वंगुणदोषविचार
कत्वात् पुनरपिसंसारिणांभेदप्रतिपत्त्यर्थमाह संसारिणस्त्रसस्थावराः १२ संसारिग्रहणमनर्थ

कं प्रकृतत्वात् क्वप्रकृतंसंसारिणो मुक्ताश्चेति नानर्थकं पूर्वापेक्षार्थंयेउक्ताः समनस्काः अमनस्कास्ते संसारि
णइतियदिहिपूर्वस्यविशेषणंनस्यात् समनस्कामनस्कग्रहणंसंसारिणोमुक्ताश्चेत्यनेनयथासंख्यमभि
संबध्येत एवंचकृत्वासंसारिग्रहणमादौक्रियमाणमुपपन्नंभवति तत्पूर्वापेक्षं[redacted]मत उत्तरार्थमपिभवति
तेसंसारिणोद्विविधाः त्रसाः स्थावराः इतितत्रत्रसनामकर्म्मोदयवशीकृतास्त्रसाः स्थावरनामकर्म्मोदयव
शवर्त्तिनः स्थावराः त्रस्यंतीतित्रसाः स्थानशीलाः स्थावराइतिचेन्नागमविरोधात् आगमेहिकायानुवादेन
त्रसनामद्वींद्रियादारभ्याअयोगकेवलिनइति तस्माच्चलनाचलनापेक्षंत्रसस्थावरत्वंकर्म्मोदयापेक्ष
मेव त्रसग्रहणमादौक्रियते अल्पाच्तरत्वादभ्यर्हितत्वाच्च[redacted]पयोगसंभवादभ्यर्हितत्वं एकेंद्रियाणामति
बहुवक्तव्याभावादुल्लंघ्यानुपूर्वींस्थावरभेदप्रतिपत्त्यर्थमाह पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः स्था
वरनामकर्म्मभेदाः पृथिवीकायादयःसंति तदुदयनिमित्ताःजीवेषुपृथिव्यादयःसंज्ञावेदितव्याः पृथना

६०

दिप्रकृतिनिष्पन्नत्वात्प्रसिद्धत्वग्रात् पृथगाद्यनपेक्षा वर्त्तते एषां पृथिव्यादीनां मार्षे चतुर्विधत्वमुक्तं प्रत्येकं त
त्कथमितिचेदुच्यते पृथिवी पृथिवीकायः पृथिवीकायिकः पृथिवीजीव इत्यादि तत्र अचेतना वैश्रसि
कपरिणामनिर्वृत्ता काठिन्यगुणात्मिका पृथिवी अचेतनत्वादसत्यपि पृथिवीकायनामकर्मोदये प्रथ
नक्रियोपलक्षितैवेयं अथवा पृथिवीसामान्यं उत्तरत्रयेपि सद्भावात् कायः शरीरं पृथिवीकायिकजी
वपरित्यक्तः पृथिवीकायः मृतमनुष्यादिकायवत् पृथिवीकायः अस्यास्तीति पृथिवीकायिकः तत्का
यसंबंधवशीकृत आत्मा समवाप्तपृथिवीकायनामकर्मोदयः कार्मणकाययोगस्थः यो न तावत्पृथि
वीकायत्वेन गृह्णाति स पृथिवीजीवः एवमवादिष्वपि योज्यं एते पंचविधाः प्राणिनः स्थावराः कतिपुन
रेषां प्राणाः चत्वारः स्पर्शनेंद्रियप्राणः कायबलप्राणः उच्छ्वासनिश्वासप्राणः आयुःप्राणश्चेति अथत्र
साः के ते इत्युच्यते द्वींद्रियादयस्त्रसाः १४ द्वे इंद्रिये यस्य सोयं द्वींद्रियः द्वींद्रिय आदिर्येषां ते द्वींद्रियाद ६०

यः आदिशब्दो व्यवस्थावाची क्व व्यवस्थिता आगमे कथं द्वींद्रियः त्रींद्रियश्चतुरिंद्रियः पंचेंद्रियश्चेति त
द्गुणसंविज्ञानवृत्तिग्रहणात् द्वींद्रियस्याप्यंतर्भावः कतिपुनरेषां प्राणाः द्वींद्रियस्य तावत् षट्प्राणाः पूर्वो
क्ताः एव रसनवाक्प्राणाधिकाः त्रींद्रियस्य सप्त त एव घ्राणप्राणाधिकाः चतुरिंद्रियस्याष्टौ त एव चक्षुःप्रा
णाधिकाः पंचेंद्रियस्य तिरश्चो ऽसंज्ञिनः नव त एव श्रोत्रप्राणाधिकाः संज्ञिनो दश त एव मनोबलप्रा
धिकाः आदिशब्देन निर्दिष्टानामनिर्ज्ञातसंख्यानां इयत्तावधारणं कर्त्तव्यमित्याह पंचेंद्रियाणि १५
इंद्रियशब्दो व्याख्यातार्थः पंचग्रहणमवधारणार्थं पंचैव नाधिकसंख्यानीति कर्मेंद्रियाणां वागादीनां
इह ग्रहणं कर्त्तव्यं न कर्त्तव्यं उपयोगप्रकरणात् उपयोगसाधनानां इह ग्रहणं न क्रियासाधनानां अनवस्था
नाच्च क्रियासाधनानां अंगोपांगनामकर्मनिर्वर्तितानां सर्वेषामपि क्रियासाधनत्वमस्तीति न पंचैव कर्मे
द्रियाणि तेषामंतरभेदप्रदर्शनार्थमाह द्विविधानि १६ विधशब्दः प्रकारवाची द्वौ विधौ येषां ता

६१ निद्विविधानींद्रियप्रकाराणीत्यर्थः कौ पुनस्तौ द्वौ प्रकारौ द्रव्येंद्रियं भावेंद्रियमिति तत्र द्रव्येंद्रियस्वरूपनि
रूपणार्थमाह ॥ सू: निर्वृत्त्युपकरणे द्रव्येंद्रियं ॥१७॥ निर्वर्त्यत इति निर्वृत्तिः केन निर्वर्त्यते कर्मणा सा द्वि
विधा बाह्याभ्यंतरभेदात् उत्सेधांगुलासंख्येयभागप्रमितानां शुद्धानामात्मप्रदेशानां प्रतिनियतचक्षु
रादीन्द्रियसंस्थानेनावस्थितानां वृत्तिरभ्यंतरा निर्वृत्तिः तेष्वात्मप्रदेशेष्विंद्रियव्यपदेशभाक्षु यः प्रतिनिय
तसंस्थानो नामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयः सा बाह्या निर्वृत्तिः येन निर्वृत्तेरुपकारः
क्रियते तदुपकरणं यद्वत् तदपि द्विविधं तत्राभ्यंतरं कृष्णशुक्लमंडलं बाह्यमक्षिपत्रपक्ष्मद्वयादि एवं
शेषेष्वपींद्रियेषु ज्ञेयं भावेंद्रियमुच्यते लब्ध्युपयोगौ भावेंद्रियं ॥१८॥ लंभनं लब्धिः का पुनरसौ ज्ञानावर
णकर्मक्षयोपशमविशेषः यत्सन्निधानादात्मा द्रव्येंद्रियनिर्वृत्तिं प्रति व्याप्रियते तन्निमित्त आत्मनः प
रिणाम उपयोगस्तदुभयं भावेंद्रियं इंद्रियफलमुपयोगः तस्य कथमिंद्रियत्वं कारणधर्मस्य कार्ये दर्शना ६१

निष्पाद्यते कर्मणा यस्मा २

त् यथा घटाकारपरिणतं विज्ञानं घट इति स्वार्थस्य तत्र मुख्यत्वाच्चेंद्रस्य लिंगमिंद्रियमिति यः स्वार्थः स उपयो
गो मुख्य उपयोगलक्षणो जीव इति वचनात् अत उपयोगस्येंद्रियत्वं न्याय्यं उक्तानामिंद्रियाणां संज्ञानुपूर्वीप्रति
पादनार्थमाह ॥ स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि ॥१९॥ लोके इंद्रियाणां पारतंत्र्यविवक्षा दृश्यते अनेना
क्ष्णा सुष्ठु पश्यामि अनेन कर्णेन सुष्ठु शृणोमीति ततः पारतंत्र्यात्स्पर्शनादीनां करणत्वं वीर्यांतरायमतिज्ञाना भावृध
वरणक्षयोपशमांगोपांगनामलाभावष्टंभात् आत्मना स्पृश्यतेऽनेनेति स्पर्शनं रस्यतेऽनेनेति रसनं घ्रायतेऽने
नेति घ्राणं चक्षेरनेकार्थत्वाद्दर्शनार्थविवक्षायां चष्टे अर्थान् पश्यत्यनेनेति चक्षुः श्रूयतेऽनेनेति श्रोत्रं स्वात
न्त्र्यविवक्षा च दृश्यते इदं मे अक्षि सुष्ठु पश्यति अयं मे कर्णः सुष्ठु शृणोति ततः स्पर्शनादीनां कर्तरि निष्पत्तिः
स्पृशतीति स्पर्शनं रसतीति रसनं जिघ्रतीति घ्राणं चष्टे इति चक्षुः शृणोतीति श्रोत्रं एषां निर्देशक्रमः एकै
कवृद्धिक्रमप्रज्ञापनार्थः तेषामिंद्रियाणां विषयप्रदर्शनार्थमाह ॥ स्पर्शरसगंधवर्णशब्दास्तदर्था द्रव्यपर्यायौः प्रा

जीवसाधनत्वं स्पर्शादि शब्दानां वेदितव्यं द्रव्यप्राधान्यविवक्षायां कर्म १

६२ धान्यविवक्षायां कर्म्मनिर्देशः स्पृश्यत इति स्पर्शः रस्यत इति रसः गंध्यत इति गंधः वर्ण्यत इति वर्णः शब्द्यत इति
शब्दः पर्यायप्रधान्यविवक्षायां भावनिर्देशः स्पर्शनं स्पर्शः रसनं रसः गंधनं गंधः वर्णनं वर्णः शब्दनं शब्दः
[illegible] तेषां क्रम इंद्रियक्रमेणैव व्याख्यातः आह यत्वन्मनोऽनवस्थानादिंद्रियं न भवतीति प्रत्याख्या ती ३
तं तत्किमुपयोगस्योपकारि उत नेति तदप्युपकारि च तेन विनेंद्रियाणां [illegible]
मा ७ किमस्यैषां सहकारित्वमेव प्रयोजनं उतान्यदपीत्यत आह॥ श्रुतमनिंद्रियस्य॥२१ श्रुतज्ञानविषयोऽर्थः
५ श्रुतं स विषयोऽनिंद्रियस्य परिप्राप्तश्रुतज्ञानावरणक्षयोपशमस्यात्मनः श्रुतार्थेऽनिंद्रियालंबन
ज्ञानप्रवृत्तेः अथवा श्रुतज्ञानं श्रुतं तदनिंद्रियस्यार्थः प्रयोजनमिति तावत् स्वातंत्र्यसाध्यमिदं प्रयो
जनमनिंद्रियस्य उक्तानामिंद्रियाणां प्रतिनियतविषयाणां स्वामित्वनिर्देशः कर्तव्य इत्यत्र प्रथमं गृही
तस्पर्शनं तस्य तावत्स्वामित्वावधारणार्थमाह॥ वनस्पत्यंतानामेकं॥२२ एकं प्रथममित्यर्थः किं ६२

सर्व २

तत्स्पर्शनं तत्केषां पृथिव्यादीनां वनस्पत्यंतानां वेदितव्यं तस्योत्पत्तिकारणमुच्यते वीर्यांतरायस्पर्शनेंद्रिय
वरणक्षयोपशमे सति शेषेंद्रियघातिस्पर्द्धकोदये च शरीरनामलाभावष्टंभे एकेंद्रियजातिनामोदय
वशवर्तितायां च सत्यां स्पर्शनमेकमिंद्रियमाविर्भवति इतरेषामिंद्रियाणां स्वामित्वप्रदर्शनार्थमाह॥
कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि॥२३ एकैकमिति वीप्सायां द्वित्वं एकैकेन वृद्धानि
एकैकवृद्धानि कृम्यादिं कृत्वा स्पर्शनाधिकारात् स्पर्शनमादिं कृत्वा एकैकवृद्धानीत्यभिसंबंधः क्रिय
ते आदिशब्दः प्रत्येकं परिसमाप्यते कृम्यादीनां स्पर्शनं रसनाधिकं [illegible]
[illegible] पिपीलिकादीनां स्पर्शनरसने घ्राणाधिके भ्रमरादीनां स्पर्शनरसनघ्राणानि चक्षुरधिकानि मनु
ष्यादीनां तान्येव श्रोत्राधिकानीति यथासंख्येनाभिसंबंधो व्याख्यात् तेषां निष्पत्तिः स्पर्शनोत्पत्त्या व्या
ख्याता उत्तरोत्तरसर्वघातिस्पर्द्धकोदयेन च वाच्या तेषु संसारिषु द्वित्रेषु इंद्रियभेदात् पंचविधेषु ये पं

श्री २

DR. BHAU DAJI MEMORIAL

६३ चेंद्रियाः तद्भेदस्यानुक्तस्य प्रतिपादनार्थमाह ॥ संज्ञिनः समनस्काः ॥२४॥ मनो व्याख्यातं सह तेन ये वर्त्तंते ते समन
स्काः संज्ञिन इत्युच्यंते पारिशेष्यादितरे संसारिणः प्राणिनः असंज्ञिन इति सिद्धं ननु च संज्ञिन इत्यनेनैव
गतार्थत्वात्समनस्का इति विशेषणमनर्थकं यतो मनोव्यापारो हिताहितप्राप्तिपरिहारपरीक्षा संज्ञा
पि सैवेति नैतद्युक्तं संज्ञाशब्दार्थव्यभिचारात् संज्ञा नामेत्युच्यते तद्वंतः संज्ञिन इति सर्वेषामतिप्रसंग
संज्ञानं संज्ञा संज्ञानमिति चेत् सर्व्वेषां प्राणिनां ज्ञानात्मकत्वादतिप्रसंगः आहारादिविषयाभिलाषः
संज्ञेति चेत्तुल्यं तस्मात्समनस्का इत्युच्यते एवं च कृत्वा गर्भांडजमूर्छितसुप्ताद्यवस्थासु हिताहितपरी
क्षाभावेपि मनःसंनिधानात् संज्ञित्वमुपपन्नं भवति यदि हिताहितादिविषयपरिस्पंदः प्राणिनां मनः
प्रणिधानपूर्वकः अथाभिनवशरीरग्रहणं प्रत्यागूर्णस्य विशीर्णपूर्वमूर्त्तेः निर्मनस्कस्य यत्कर्म्म तत्कु ६३
तः इत्युच्यते ॥ विग्रहगतौ कर्म्मयोगः ॥२५॥ विग्रहो देहः विग्रहार्थं गतिर्विग्रहगतिः अथवा विरुद्धो ग्रहो

विग्रहः व्या० घातः कर्म्मादानेपि नोकर्म्मपुद्गलादाननिरोध इत्यर्थः विग्रहेण गतिः सर्व्वशरीरप्ररोहण
बीजभूतं कार्म्मणं शरीरं कर्म्मेत्युच्यते योगो वाङ्मनःकायवर्गणानिमित्तः आत्मप्रदेशपरिस्पंदः कर्म्म
णा कृतो योगः कर्म्मयोगः विग्रहगतौ भवतीत्यर्थः तेन कर्म्मादानं देशांतरसंक्रमश्च भवति आह जीवपु
द्गलानां गतिमास्कंदतां देशांतरसंक्रमः किमाकाशप्रदेशक्रमवृत्त्या भवति उताविशेषेणेत्यत आह ॥ अ
नुश्रेणि गतिः ॥२६॥ लोकमध्यादारभ्य ऊर्ध्वमधस्तिर्यक् च आकाशप्रदेशानां क्रमसंनिविष्टानां पंक्तिः श्रेणि
रित्युच्यते अनुशब्दस्यानुपूर्व्येण वृत्तिः श्रेणेरानुपूर्व्येणानुश्रेणीति जीवानां पुद्गलानां च गतिर्भवती
त्यर्थः अनधिकृतानां पुद्गलानां कथं ग्रहणमिति चेत् गतिग्रहणात् [illegible] जीवानामेव गतिरिष्टा स्यात् गति
ग्रहणमनर्थकमधिकारात्तत्सिद्धेः उत्तरत्र जीवग्रहणाच्च पुद्गलसंप्रत्ययः ननु च चंद्रादीनां ज्योतिषां मेरु
प्रदक्षिणकाले विद्याधरादीनां च विश्रेणिगतिरपि दृश्यते तत्र किमुच्यते अनुश्रेणि गतिरिति कालदेश

दारि 3

६४ नियमोत्रवेदितव्यः तत्रकालनियमात्तावज्जीवानांमरणकालेभवांतरसंक्रमेमुक्तानांचोर्ध्वगमनकालेऽनु
श्रेण्येवगतिः देशनियमोपिऊर्ध्वलोकादधोगतिः अधोलोकादूर्ध्वगतिः तिर्यग्लोकादधोगतिः ऊर्ध्वं
वा तत्रानुश्रेण्येवपुद्गलानांचयालोकांतप्रापणीसानियमादनुश्रेण्येव। इतरागतिर्भजनीया पुनरपिग
तिविशेषप्रतिपत्त्यर्थमाह अविग्रहाजीवस्य २७ विग्रहोव्याघातः कौटिल्यमित्यर्थः सयस्यांनविद्यते
असावविग्रहागतिः कस्यजीवस्यकीदृशस्यमुक्तस्य कथंगम्यतेमुक्तस्येति उत्तरसूत्रेसंसारिग्रहणादिह
मुक्तस्येतिविज्ञायते ननुचअनुश्रेणिगतिरित्यनेनैवश्रेण्यंतरसंक्रमाभावोव्याख्यातः नार्थोनेनसूत्रेण
त्रविश्रेणिगतिरपिक्वचिदस्तीतिज्ञापनार्थमिदंवचनं ननुतत्रैवदेशकालनियमःउक्तः नातस्तस्सिद्धेः
यद्यसंगस्यात्मनोऽप्रतिबंधेनगतिरालोकांतादवधृतकालाप्रतिज्ञायते सदेहस्यपुनर्गतिःकिंप्रतिबंधिनीउ
तमुक्तात्मवदित्यतआह विग्रहवतीचसंसारिणःप्राक्चतुर्भ्यः कालावधारणार्थंप्राक्चतुर्भ्यइत्युच्यते प्राग्

ति२

तिवचनंमर्यादार्थंचतुर्थात्समयात्प्राग्विग्रहवतीगतिर्नचतुर्थइति कुतइतिचेत् सर्वोत्कृष्टविग्रहनिमित्तनि
ष्कुटक्षेत्रेउत्पत्सुःप्राणीनिष्कुटक्षेत्रानुपूर्व्यनुश्रेण्यभावात् इषुगत्यभावेनिष्कुटक्षेत्रप्रापणनिमित्तं त्रिविग्र
हांगतिमारभते नोर्ध्वंतथाविधोपपादक्षेत्राभावात् चशब्दःसमुच्चयार्थः विग्रहवतीचाविग्रहाचेति विग्रह
वत्यागतेःकालोवधृतः अविग्रहायाःकियान्कालइत्युच्यते एकसमयाविग्रहा २९ एकःसमयोस्याःए
सु५सा५ कसमया नविद्यतेविग्रहोस्याःअविग्रहागतिमतांहिजीवपुद्गलानांअव्याघातेनैकसमयिकीगतिरालो
कांतादपीति अनादिकर्मबंधसंततोमिथ्यादर्शनादिप्रत्ययवशात्कर्माण्याददानोविग्रहगतावप्याहारकः
प्रसक्तस्ततोनियमार्थमिदमुच्यते एकंद्वौत्रीन्वानाहारकः ३० अधिकारात्समयानिसंबध्यतेवाशब्दोविकल्पा
र्थोविकल्पश्चयथेच्छातिसर्गःएकंवाद्वौवात्रीन्वासमयानऽनाहारकोभवतीत्यर्थः त्रयाणांशरीराणांषण्णांप
र्याप्तीनांयोग्यपुद्गलग्रहणमाहारः तदभावादनाहारकः कर्मादानंहिनिरंतरं कार्मणशरीरसद्भावे उप

६५

यावदुत्तरं प्रतिविग्रहागतोऽनाहारक इतरेषु त्रिषु समयेष्वनाहारकः एवं गच्छतो नवमूर्त्यंतरनिर्वृत्तिप्रकार
प्रतिपादनार्थमाह सम्मूर्छनगर्भोपपादा जन्म ३१ त्रिषु लोकेषु ऊर्ध्वमधस्तिर्यक् च देहस्य समंततो मू
र्छनं सम्मूर्छनमवयवप्रकल्पना स्त्रिया उदरे शुक्रशोणितयोर्गरणं मिश्रणं गर्भः मातुरुपभुक्ताहार
गरणाद्वा गर्भः उपेत्य पद्यतेऽस्मिन्निति उपपादः देवनारकोत्पत्तिस्थानविशेषसंज्ञा एते त्रयः संसारिणां जीवानां
जन्मप्रकाराः शुभाशुभपरिणामनिमित्तकर्मभेदविपाककृताः अथाधिकृतस्य संसारविषयोपभोगोप
लब्ध्यधिष्ठानप्रवणस्य जन्मनो योनिविकल्पो वक्तव्य इत्यत आह सचित्तशीतसंवृताः सेतरा मिश्राश्चै
कशस्तद्योनयः आत्मनश्चैतन्यविशेषपरिणामः चित्तं सह चित्तेन वर्तत इति सचित्तः शीत इति स्पर्शवि
शेषः शुक्लादिवदुभयवचनत्वात् तद्युक्तं द्रव्यमप्याह सम्यग्वृतः संवृत इति दुरुपलक्ष्यः प्रदेश उच्य
ते सह इतरैर्वर्तंत इति सेतराः सप्रतिपक्षाः इत्यर्थः के पुनरितरे अचित्तोष्णविवृताः उभयात्मको मिश्रः स ६५

चित्ताचित्तः शीतोष्णः संवृतविवृत इति चशब्दः समुच्चयार्थः मिश्राश्च योनयो भवंतीति इतरथा हि पूर्वोक्ता
नामेव विशेषणं स्यात् एकश इति वीप्सार्थः तस्य ग्रहणं क्रममिश्रप्रतिपत्त्यर्थं यथैवं विज्ञायेत सचित्तश्चा
चित्तश्च शीतश्चोष्णश्च संवृतश्च विवृतश्चेति मैवं विज्ञायि सचित्तश्च शीतश्चेत्यादि तद्ग्रहणं जन्मप्रकारप्र
तिनिर्देशार्थं तेषां सम्मूर्छनादीनां जन्मनां योनय इति त एते नव योनयो वेदितव्याः योनिजन्मनोरविशेष इ
ति चेत् न आधाराधेयभेदात् तद्भेदः एते सचित्तादयो योनयः आधाराः आधेया जन्मप्रकाराः यतः सचित्तादियो
न्यधिष्ठाने आत्मा सम्मूर्छनादिना जन्मना शरीराहारेन्द्रियादियोग्यान् पुद्गलानुपादत्ते देवनारकाणामचित्तयो
नयः तेषां हि योनिरुपपाददेशपुद्गलप्रचयोऽचित्तः गर्भजानां मिश्रयोनयः तेषां हि मातुरुदरे शुक्रशोणि
तमचित्तं तदात्मना चित्तवता मिश्रमिति मिश्रयोनिः सम्मूर्छनजास्त्रिविकल्पयोनयः केचित्सचित्तयोनयः अन्ये
अचित्तयोनयः अपरे मिश्रयोनयः साधारणशरीराः कुतः परस्पराश्रयत्वात् इतरे अचित्तयोनयो मिश्रयो

सचित्तयोनयः

४ नित्य निगोद इतर निगोद पृथ्व्यप्तेजोवायुकायिकाः प्रत्येकं सप्तलक्षाः वनस्पतयः दशलक्षाः विकलेंद्रियाः प्रत्येकं द्विलक्षाः
सुरनारकतिर्यंचः प्रत्येकं चतुर्लक्षाः मनुष्याः चतुर्दशलक्षाः योनयः

६६ नयश्च। शीतोष्णयोनयो देवनारकाः तेषां हि उपपादस्थानानि कानिचित् शीतानि कानिचिदुष्णानीति उ
ष्णयोनयः तेजस्कायिका इतरे त्रिविकल्पयोनयः केचित् शीतयोनयः केचिदुष्णयोनयः अपरे मिश्रयोनय
इति देवनारकैकेंद्रियाः संवृतयोनयः विकलेंद्रिया विवृतयोनयः गर्भजा मिश्रयोनयः तद्भेदाश्चतुरशीति
शतसहस्रसंख्या आगमतो वेदितव्याः उक्तं च णिच्चिदरधादुसत्तय तरुदस वियलिंदियेसु छच्चेव सुर
नरयतिरियचउरो चोद्दस मणुए सदसहस्सा एवमेतस्मिन्नवयोनिभेदसंकटे त्रिविधजन्मनि सर्वप्राणभृ
तामनियमेन प्रसक्ते अवधारणार्थमाह जरायुजांडजपोतानां गर्भः ३३ यज्जालवत्प्राणिपरिवरणं वित
तमांसशोणितं तज्जरायुः यन्नखत्वक्सदृशं उपात्तकाठिन्यं शुक्रशोणितपरिवरणं परिमंडलं तदंडं यत्
किंचित्परिवरणमंतरेण परिपूर्णावयवः योनिनिर्गतमात्र एव परिस्पंदादिसामर्थ्योपेतः पोतः जरायौ जाताः
जरायुजाः अंडे जाताः अंडजाः जरायुजाश्च अंडजाश्च पोताश्च जरायुजांडजपोताः गर्भयोनयः यद्यमीषां ज ६६

पोते जाता पोतजा १

रा[^*]युजांडजपोतानां गर्भो विधीयते अथोपपादः केषां भवतीत्यत आह देवनारकाणामुपपादः ३४ देवा
नां नारकाणां च उपपादो जन्म वेदितव्यं अथान्येषां किं जन्मेत्यत आह शेषाणां सम्मूर्छनं ३५ गर्भजेभ्यः औ
पपादिकेभ्यश्चान्ये शेषाः तेषां सम्मूर्छनं जन्मेति एते त्रयोऽपि योगा नियमार्था उभयतो नियमश्च द्रष्टव्यः
जरायुजांडजपोतानामेव गर्भः गर्भ एव च जरायुजांडजपोतानां देवनारकाणामेवोपपादः उपपाद एव च दे
५ वनारकाणां शेषाणामेव सम्मूर्छनं सम्मूर्छनमेव शेषाणां पुनः संसारिणां त्रिविधजन्मनामाहितबहुविकल्प
नवयोनिभेदानां शुभाशुभनामकर्म्मविपाकनिर्वर्तितानि बंधफलानुभवनाधिष्ठानानि शरीराणि कानी
त्यत आह औदारिकवैक्रियकाहारकतैजसकार्मणानि शरीराणि ३६ विशिष्टनामकर्म्मोदयापादित
वृत्तीनि शीर्यंत इति शरीराणि औदारिकादिप्रकृतिविशेषोदयप्राप्तवृत्तीनि औदारिकादीनि उदारं स्थूलं
उदारे भवं उदारं प्रयोजनमस्येति वा औदारिकं अष्टगुणैश्वर्ययोगात् एकानेकाणुमहच्छरीरविविधकरणं विक्रि

१ यो

६७ यासाश्रयोजनमस्येतिवैक्रियकं सूक्ष्मपदार्थनिर्ज्ञापनार्थंअसंजमपरिजिहीर्षया वा प्रमत्तसंयतेन क्रियते
निर्वर्त्यते तदित्याहारकं यत्तेजो निमित्तं तेजसि वा भवं तत्तैजसं कर्मणां कार्यं कार्मणं सर्वेषां कर्मनिमित्त
त्वेपिरूढवशात् विशिष्टविषये इत्ति(?)रवसेयायथौदारिकस्येन्द्रियैरुपलब्धिः न चेतरेषां कस्मात्तन्न वतीसा
ह परंपरं सूक्ष्मं ३७ परशब्दस्यानेकार्थवृत्तित्वेपि विवक्षातो व्यवस्थार्थगतिः पृथग्भूतानां शरीराणां सू
क्ष्मगुणेन वीप्सानिर्देशः क्रियते परंपरमिति औदारिकं स्थूलं ततः सूक्ष्मं वैक्रियकं ततः सूक्ष्ममाहारकं
ततः सूक्ष्मं तैजसं तैजसात्कार्मणं सूक्ष्ममिति परं परं सूक्ष्मं प्रदेशतोपि न्यूनं परं हीनमिति विपरीतप्रति ६७
पत्तिनिवृत्त्यर्थमाह प्रदेशतोसंख्येयगुणं प्राक्तैजसात् प्रदिश्यंत इति प्रदेशाः परमाणवः संख्याम
तीतः असंख्येयः असंख्येयो गुणो ऽस्य तदिदमसंख्येयगुणं कुतः प्रदेशतः नावगाहतः परं परमित्यनुवृत्ते
रा कार्मणात्प्रसंगेन निवृत्त्यर्थमाह प्राक्तैजसात् इति औदारिकादसंख्येयगुणप्रदेशं वैक्रियकं वै

क्रियकादप्यसंख्येयगुणप्रदेशमाहारकमिति को गुणकारः पल्योपमासंख्येयभागः यद्येवं परं परं महाप
रिमाणं प्राप्नोति बंधविशेषात्परिमाणभेदाभावः तूलनिचयायःपिंडवत् अथोत्तरयोः किं समप्रदेशत्वं
उतास्ति कश्चिद्विशेष इत्यत आह अनंतगुणे परे ३८ प्रदेशत इत्यनुवर्त्तते तेनैवमभिसंबंधः क्रियते
आहारकात्तैजसं प्रदेशतोनंतगुणं तैजसात्कार्मणं प्रदेशतोनंतगुणमिति को गुणकारः अभव्यानामनं
५ तदल्पकाव ते तगुणः सिद्धानामनंतभागः तत्रैतत्स्यान्मूर्तिमद्द्रव्योपचितत्वात्संसारिणो जीवस्याभिप्रेतगतिनिरोधप्रसं
गइति तन्न किं कारणं यस्मादुभेप्यते अप्रतीघाते ३९ मूर्तिमतो मूर्त्यंतरेणाव्याघातः प्रतीघातः स ना
स्त्यनयोरित्यप्रतीघाते सूक्ष्मपरिणामादयस्पिंडे तेजोनुप्रवेशवत् तैजसकार्मणयोर्नास्ति वज्रपटला
दिषुव्याघातः ननु वैक्रियकाहारकयोरपि नास्ति प्रतीघातः सर्वत्राप्रतीघातोऽत्र विवक्षितः यथा तैजसका
र्मणयोरालोकांतात् सर्वत्रानास्ति प्रतीघातः न तथा वैक्रियकाहारकयो आह किमेतावानेव विशेष उत

६८ कश्चिदन्योप्यस्तीत्याह ‖ अनादिसंबंधे च ‖४२‖ चशब्दो विकल्पार्थः अनादिसंबंधे सादिसंबंधे चेति कार्यकारण
भावसंतत्या अनादिसंबंधे विशेषापेक्षया सादिसंबंधे च बीजांकुरवत् यथौदारिकवैक्रियकाहारकाणि
जीवस्य कदाचित्कानि न तु तथा तैजसकार्म्मणे नित्यसंबंधिनी हि ते आसंसारक्षयात् तेएते तैजसकार्म्मणे
ते किं कस्यचिदेव भवतः उताविशेषेणेत्यत आह ‖ सर्वस्य ‖४३‖ सर्वशब्दो निरवशेषवाची निरविशेषस्य
संसारि[...] जीवस्यैते द्वे अपि शरीरे भवतः ‖ अस्यार्थः अविशेषाभिधानात् औदारिकादिभिः सर्वस्य सं
सारिणो योगपद्येन संबंधप्रसंगे सति विशरीरप्रदर्शनार्थमिदमुच्यते ‖ तदादीनि भाज्यानि युगपदेकस्या
चतुर्भ्यः ‖४४‖ तच्छब्दः प्रकृते तैजसकार्म्मणे प्रतिनिर्देशार्थः ते तैजसकार्म्मणे आदिर्येषां तानि तदादीनि भा
ज्यानि विकल्प्यानि आ कुतः आ चतुर्भ्यः युगपदेकस्यात्मनः कस्यचित् द्वे तैजसकार्म्मणे अपरस्य त्रीणि
औदारिकतैजसकार्म्मणानि वैक्रियकतैजसकार्म्मणानि अन्यस्य चत्वारि औदारिकाहारकतैजसका ६८

र्म्मणानीति विभागः क्रियते पुनरपि तेषां विशेषप्रतिपत्त्यर्थमाह ‖ निरुपभोगमंत्यं ‖४५‖ अंत्ये भवमंत्यं
किं तत् कार्म्मणं इंद्रियप्रणालिकया शब्दादीनामुपलब्धिरुपभोगः तदभावान्निरुपभोगं विग्रहगतौ स
त्यामपि लब्धीन्द्रिये द्रव्येन्द्रियनिर्वृत्त्यभावात् शब्दाद्युपभोगाभाव इति ननु तैजसमपि निरुपभोगं तत्र
म किमुच्यते निरुपभोगमंत्यमिति तैजसं शरीरं योगनिमित्तमपि न भवति ततोस्य उपभोगविचारे अन
धिकारः एवं तत्रोक्तलक्षणेषु जन्मसु अमूनि शरीराणि प्रादुर्भवमापद्यमानानि किमविशेषेण भवं
ति उत कश्चिदस्ति विशेष इत्यत्राह ‖ गर्भसंमूर्छनजमाद्यं ‖४६‖ सूत्रक्रमापेक्षया आदौ भवमाद्यं
औदारिकमित्यर्थः यद्गर्भजं यच्च संमूर्छनजं तत्सर्वमौदारिकं द्रष्टव्यं तदनंतरं यन्निर्दिष्टं तत्कस्मिन् ज
औपपादिकं वै न्मनीत्यत आह ‖ लब्धिप्रत्ययं च ‖४७‖ चशब्देन वैक्रियकमभिसंबध्यते तपोविशेषादृद्धिप्राप्तिर्लब्धिः
क्रियकं - २७ लब्धिः प्रत्ययः कारणमस्य लब्धिप्रत्ययं वैक्रियकं लब्धिप्रत्ययं च भवतीत्यभिसंबध्यते किमेतदेव लब्ध्यपे
पपातेनवं औ क्षं वैक्रियकं वोत सर्वं यद्यौपपादिकं वैक्रियकं अनौपपादिकस्य वैक्रियकत्वाभाव इत्यत
पपादिकं तत् आह

DR. BHAU DAJI MEMORIAL

समुत्पाद्यत्वात्तदप्यस्तीत्याह   तैजसमपि ४८ अपिशब्देन लब्धिप्रत्ययमभिसंबध्यते तैजसमपि लब्धिप्रत्ययं भ
वतीति वैक्रियकानंतरं यदुपदिष्टं तस्य स्वरूपनिर्धारणार्थं स्वामिनिर्देशार्थं चाह   शुभं विशुद्धमव्याघाति
चाहारकं प्रमत्तसंयतस्यैव ४९ शुभकारणत्वात् शुभव्यपदेशः शुभकर्मणः आहारककाययोगस्य कारण
त्वात् शुभमित्युच्यते अन्नस्य प्राणव्यपदेशवत् विशुद्धकार्यत्वाद्विशुद्धव्यपदेशः विशुद्धस्य पुण्यकर्म
णः असबलस्य निरवद्यस्य कार्यत्वात् विशुद्धमित्युच्यते तंतूनां कर्पासव्यपदेशवत् उभयतो व्याघाता
भावाद् व्याघाति न ह्याहारकशरीरेणान्यस्य व्याघातः नाप्यन्येनाहारकस्येति तस्य प्रयोजनसमुच्चयार्थः
चशब्दः क्रियते तद्यथा कदाचिल्लब्धिविशेषसद्भावज्ञापनार्थं कदाचित्सूक्ष्मपदार्थनिर्धारणार्थं सं
यमपरिपालनार्थं च आहारकशरीरं निर्वर्तयितुमाहारकमिति वाग्युक्तस्य प्रत्याम्नायः यदारभते त
दा प्रमत्तो भवतीति प्रमत्तसंयतस्येत्युच्यते इष्टतोऽवधारणार्थमेवकारोपादानं यथैवं विज्ञायेत प्रम ६९

त्तसंयतस्यैव आहारकं नान्यस्येति मैवं विज्ञायि प्रमत्तसंयतस्याहारकमेवेति मा भूदौदारिकादिनिवृत्तिरिति
एवं विभक्तानि शरीराणि बिभ्रतां संसारिणां प्रतिगतिं किं त्रिलिंगसन्निधानमुत लिंगनियमः कश्चिदस्तीत्या
ह   नारकसंमूर्छिनो नपुंसकानि ५० नारकाणि वक्ष्यंते नरकेषु भवा नारकाः संमूर्छनं संमूर्छः स एषाम
स्तीति संमूर्छिनः नारकाश्च संमूर्छिनश्च नारकसंमूर्छिनः चारित्रमोहविकल्पनोकषायभेदस्य नपुंसक
वेदस्याशुभनाम्नश्चोदयात् न स्त्रियो न पुमांस इति नपुंसकानि भवंति नारकसंमूर्छिनो नज्ञशब्दगंधरू पुंसकान्येवेति
परसस्पर्शसंबंधनिमित्ता स्वल्पापि सुखमात्रा नास्ति एवमवधार्यते अर्थादापन्नमेतत् उक्तेभ्योऽन्ये संसा नियमः तत्राहि
रिणः त्रिलिंगा इति यत्रात्यंतं नपुंसकलिंगस्याभावस्तत्प्रतिपादनार्थमाह   न देवाः ५१ स्त्रैणं पौंस्नं च य स्त्रीपुंसविषय
न्निरतिशयसुखं शुभगतिनामोदयापेक्षं तद्देवा अनुभवंति न तेषु नपुंसकानि संति अथेतरे कियल्लिंगा मनो ५
इत्यत आह   शेषास्त्रिवेदाः ५२ त्रयो वेदा येषां ते त्रिवेदाः के पुनस्ते वेदाः स्त्रीत्वं पुंस्त्वं नपुंसकत्वमिति कथं

७० तेषांसिद्धिः वेद्यतइतिवेदः लिंगमित्यर्थः तत्द्विविधंद्रव्यलिंगंभावलिंगंच द्रव्यलिंगंयोनिमेहनादिनामक
र्म्मोदयनिर्वर्तितं नोकषायोदयापादितवृत्तिभावलिंगंस्त्रीवेदोदयात्स्त्यायत्यस्यांगर्भः इतिस्त्री पुंवेदोदया
त्सूतेजनयत्यप[illegible]नपुंसकवेदोदया[illegible]लंनपुंसकंरूढिशब्दा[illegible]रूढिषु[illegible]त्पत्त्यर्थैव
यथागछतीतिगौरितिइतरथाहिगर्भधारणादिक्रियाप्राधान्येबालवृद्धानांतिर्यग्मनुष्याणांदेवानांकार्म्मण
काययोगस्थानांचतदभावात्स्त्रीत्वादिव्यपदेशोनस्यात् तएतेत्रयोवेदाः शेषाणांगर्भजानांभवंति येइमेज
न्मयोनिशरीरलिंगसंबंधाहितविशेषाःप्राणिनोनिर्दिश्यंते देवादयोविचित्रधर्म्माधर्म्मवशीकृताः चतसृ पि ६
षुगतिषुशरीराणिधारयंतस्तेकिंयथाकालमुपभुक्तायुषोमूर्त्यंतरमास्कंदंतिउतायथाकालमपीत्य
तम्राह औपपादिकचरमोत्तमदेहासंख्येयवर्षायुषोनपवर्त्यायुषः औपपादिकाव्याख्याताःदेवनारका
इतिचरमशब्दोंत्यवाचीउत्तमउत्कृष्टःचरमउत्तमोदेहोयेषांतेचरमोत्तमदेहापरीतसंसाराः तज्जन्मनिनिर्वा ७०

णाहाइत्यर्थः असंख्येयमतीतसंख्यानमुपमाप्रमाणेनपल्यादिनागम्यमायुर्येषांतइमेअसंख्येयवर्षायुष
स्तिर्यग्मनुष्याःउत्तरकुर्वादिषुप्रसूताःऔपपादिकाश्चचरमोत्तमदेहाश्चअसंख्येयवर्षायुषश्चऔपपादिक
चरमोत्तमदेहासंख्येयवर्षायुषःबाह्यस्योपघातनिमित्तस्यविषशस्त्रादेःसतिसन्निधानेह्रस्वंभवतीत्यपव
र्त्यमायुर्येषांतइमेअपवर्त्यायुषःनअपवर्त्यायुषःअनपवर्त्यायुषोनह्येषांऔपपादिकादीनांबाह्यनिमित्त
वशादायुरपवर्त्यतेइत्ययंनियमइतरेषाम्‌अनियमः चरमस्यदेहस्योत्कृष्टत्वप्रदर्शनार्थमुत्तमग्रहणंना
र्थांतरविशेषोस्ति चरमदेहाइतिवापाठः इतितत्त्वार्थवृत्तौसर्वार्थसिद्धिसंज्ञिकायांद्वितीयोधिकारः
[illegible]नरक[illegible]नीसदे[illegible]गतेमः अमा[illegible]प्रहातमः[illegible]
[illegible]ःभवप्रत्ययोवधिर्देवनारकाणामित्येवमादिषुनारकाः श्रुताः ततःपृच्छतिकेतेनारकाइ कार
तितत्प्रतिपादनार्थंतदधिकरणनिर्देशःक्रियते रत्नशर्कराबालुकापंकधूमतमोमहातमःप्रभाभूम
जीवस्वभावलक्षणसाधनविषयस्वरूपभेदाश्चगतिजन्मयोनिदेहानपवर्त्यायुष
भेदाश्चनवति २ २४

७१ योघनांबुवाताकाशप्रतिष्ठाः सप्ताधोधः रत्नं च शर्करा च वालुका च पंकश्च धूमश्च तमश्च महातमश्च रत्नश
र्करावालुकापंकधूमतमोमहातमांसि प्रभाशब्दः प्रत्येकं परिसमाप्यते साहचर्यात्ता नामानि चित्रादिरत्नप्रभा
सहचरिता भूमिः रत्नप्रभा शर्कराप्रभासहचरिता भूमिः शर्कराप्रभा वालुकाप्रभासहचरिता भूमिर्वालुका
प्रभा पंकप्रभासहचरिता भूमिः पंकप्रभा धूमप्रभासहचरिता भूमिः धूमप्रभा तमःप्रभासहचरिता भूमिः
४ ध महातमःप्रभासहचरिता भूमिः तमःप्रभा महातमःप्रभा इति एवाः संज्ञाः अनेनोपायेन व्यक्तसाध्यंते भूमिग्रहणमधिकरणविशेषप्रति
पत्त्यर्थं यथा स्वर्गे पटलानि न भूमिमनासु व्यवस्थितानि न तथा नारकावासा किं तर्हि भूमिमास्वेता इति
[redacted]सां भूमिनामालंबननिर्ज्ञानार्थं घनांबुवातादिग्रहणं क्रियते घनांबु च वातश्च आकाशं च घनांबुवा
ताकाशानि तानि प्रतिष्ठा आश्रयो यासां ता घनांबुवाताकाशप्रतिष्ठाः सर्वा एता भूमयः घनोदधिवलय
प्रतिष्ठाः घनोदधिवलयं घनवातवलयप्रतिष्ठं घनवातवलयं तनुवातवलयप्रतिष्ठं तनुवातवलयमाका ७१

एतेषां पूर्वेषां नारलोकावा —

ति ५

शप्रतिष्ठं आकाशं त्वात्मप्रतिष्ठं तस्यैवाधाराधेयत्वात् त्रीण्यप्येतानि वलयानि प्रत्येकं विंशतियोजनसहस्र
बाहल्यानि सप्तग्रहणं संख्यातरनियमार्थं सप्त भूमयो नाष्टौ न नवेति अधोऽधोवचनं तिर्यक्प्रचयनिषेधा
र्थं किं ता भूमयो नारकाणां सर्वत्रावासाः आहोस्वित् क्वचित् क्वचिदिति तन्निर्धारणार्थमाह ॰ तासु त्रिं
४ दशा शत्पंचविंशतिपंचदशदशत्रिपंचोनैकनरकशतसहस्राणि पंच चैव यथाक्रमं तासु रत्नप्रभादिषु भूमिषु न
रकाणामनेन संख्यातं यथाक्रमं रत्नप्रभायां त्रिंशन्नरकशतसहस्राणि शर्कराप्रभायां पंचविंशतिनर
कशतसहस्राणि वालुकाप्रभायां पंचदश नरकशतसहस्राणि पंकप्रभायां दश नरकशतसहस्राणि
धूमप्रभायां त्रीणि नरकशतसहस्राणि तमःप्रभायां पंचोनमेकं शतसहस्रं महातमःप्रभायां पंच नरका
णि रत्नप्रभायां नरकप्रस्तारास्त्रयोदश ततोऽधः आसप्तम्याः द्वौ द्वौ नरकप्रस्तारौ हीनाः इत्येवं विशेषः लोका
नियोगतो वेदितव्यः अथ तासु भूमिषु नारकाणां कः प्रतिविशेष इति   नारका नित्याशुभतरलेश्याप

कापोती अधो नीला चतुर्थ्यां नीला पंचम्यां उपरि नीला अधः कृष्णा षष्ठ

वि

७२ रिणामदेहवेदनाविक्रियाः लेश्यादयो व्याख्याता अर्थाः अशुभतरा इति प्रकर्षनिर्देशः तिर्यग्गतिविषयाशुभलेश्या
द्यपेक्षया अधोधः स्वगत्यपेक्षया च वेदितव्याः नित्यशब्दः आभीक्ष्ण्यवचनः नित्यमशुभतराः लेश्यादयो येषां
ते नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः नारकाः प्रथमाद्वितीययोः कापोतलेश्या तृतीयाया
मुपरिष्टात् ष्ठ्यां कृष्णा सप्तम्यां परमकृष्णा स्वायुःप्रमाणावधृताः द्रव्यलेश्याः उक्ताः भावलेश्यास्तु अंतर्मु
हूर्तपरिवर्तिन्यः परिणामाः स्पर्शरसगंधवर्णशब्दाः क्षेत्रविशेषनिमित्तवशादतिदुःखहेतवोऽशुभत
राः देहाश्च तेषामशुभनामोदयात् अशुभतराः विकृताकृतयः हुंडसंस्थानाः तेषामुत्सेधः प्रथमा
२५ यां सप्त धनूंषि त्रयो हस्ताः षडंगुलयः अधोधो द्विगुणो द्विगुणः उत्सेधः अभ्यंतरासद्वेद्योदये सति अनादि
पारिणामिकशीतोष्णबाह्यनिमित्तजनिताः सुतीव्राः वेदना भवंति नारकाणां प्रथमाद्वितीयातृतीयासु चतुर्थी ७२
षु उष्णवेदनास्त्वेव नारकाः पंचम्या उपरि उष्णवेदने द्वे नरकशतसहस्रे अधः शीतवेदनानामेकं शत

सहस्रं षष्ठीसप्तम्योः शीतवेदना एव अशुभं करिष्याम इति अशुभतरमेव विकुर्वंति सुखहेतुमुत्पादयाम इ
ति दुःखहेतूनेवोत्पादयंति त एते भावाः अधोधोऽशुभतरा वेदितव्याः किमेतेषां नारकाणां शीतोष्णजनि
तमेव दुःखं उतान्यदपि भवतीत्यत आह परस्परोदीरितदुःखाः ४ कथं परस्परोदीरितदुःखा नार
काः भवप्रत्ययेनावधिना मिथ्यादर्शनोदयात् विभंगव्यपदेशभाजा च दूरादेव दुःखहेतून् अवगम्योत्पन्नदुः
खाः प्रत्यासन्नाः परस्परालोकनाच्च प्रज्वलितकोपाग्नयः सर्वे भवानुस्मरणाच्चातितीव्रानुबद्धवैराः श्वशृगा
लादिवत् स्वाभिघाते प्रवर्तमानाः स्वविक्रियाकृतासिवासीपरशुभिंडिमालशक्तितोमरकुंतायोघनादि
भिः आयुधैः स्वकरचरणदशनैश्च छेदनभेदनतक्षणदंशनादिभिः परस्परस्यातितीव्रं दुःखमुत्पादयंति
किमेतावानेव दुःखोत्पत्तिकारणप्रकार उतान्योऽपि कश्चिदस्तीत्यत आह संक्लिष्टासुरोदीरितदुःखा
श्च प्राक्चतुर्थ्याः ५ देवगतिनामकर्मविकल्पस्यासुरत्वसंवर्तनस्य कर्मण उदयादस्यंति परानिति असुराः

प्रा

७३ पूर्वजन्मनिसंभाविते नातितीव्रेण संक्लेशपरिणामेन यदुपार्जितं पापकर्म्म तस्योदयात् सततं क्लिष्टाः संक्लि
ष्टाः संक्लिष्टाः असुराः संक्लिष्टासुराः संक्लिष्टा इति विशेषणान्न सर्वे असुराः नारकाणां दुःखमुत्पादयं
ति किं तर्हि अंबावरीषादयः एव केचनेति अवधिप्रदर्शनार्थे प्राक् चतुर्थ्या इति विशेषणं उपरि तिसृ
षु पृथिवीषु संक्लिष्टासुराः बाधाहेतवः नातः परमिति प्रदर्शनार्थश्च शब्दः पूर्वोक्तदुःखहेतुसमुच्चयपा
र्थः सुतप्तायोरसपायनानि तप्तायसंभालिंगनकूटशाल्मलीरोहणावतरणायोघनाभिघातवासीक्षु
रतक्षणक्षारतप्ततैलावसेचनायस्कुंभपाकांबरीषभर्जनवैतरणीमज्जनयंत्रनिष्पीडनादिभिः नार
काणां दुःखमुत्पादयंति एवं छेदनभेदनादिभिः सकलीकृतमूर्त्तीनामपि तेषां न मरणमकाले भवति कु
तः अनपवर्त्यायुष्कत्वात् यद्येवं तदेव तावदुक्तं नारकाणामायुःपरिमाणमित्यत आह तेष्वेकत्रि
सप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमाः सत्त्वानां परा स्थितिः यथाक्रममिति अनुवर्त्तते तेषु ७३

नरकेषु भूमिक्रमेण यथासंख्यमेकादयः स्थितयोऽभिसंबध्यंते रत्नप्रभायामुत्कृष्टा स्थितिरेकसागरो
पमा शर्कराप्रभायां त्रिसागरोपमा वालुकाप्रभायां सप्तसागरोपमा पंकप्रभायां दशसागरोपमा धूमप्र
भायां सप्तदशसागरोपमा तमःप्रभायां द्वाविंशतिसागरोपमा महातमःप्रभायां त्रयस्त्रिंशत्सागरोपमा
इति परा उत्कृष्टा इत्यर्थः सत्त्वानामिति वचनं भूमिनिवृत्त्यर्थं भूमिषु सत्त्वानामियं स्थितिः न भूमीना
मिति उक्तः सप्तभूमिविस्तीर्णोऽधोलोकः इदानीं तिर्यग्लोको वक्तव्यः कथं पुनस्तिर्यग्लोकः लोकयतो
ऽसंख्येयाः स्वयंभूरमणपर्यंताः तिर्यक्प्रचयविशेषेणावस्थिताः द्वीपसमुद्राः ततस्तिर्यग्लोक इति
के पुनस्तिर्यगवस्थिता इत्यत आह   जंबूद्वीपलवणोदादयः शुभनामानो द्वीपसमुद्राः ७ जंबू
द्वीपादयो द्वीपाः लवणोदादयः समुद्राः यानि लोके शुभानि नामानि तन्नामानस्ते तद्यथा जंबूद्वीपो द्वी
पः लवणोदः समुद्रः धातकीखंडो द्वीपः कालोदः समुद्रः पुष्करवरो द्वीपः पुष्करवरः समुद्रः वारुणीव

BHAU DAJI MEMORIAL

७४ रोद्वीपः वारुणीवरः समुद्रः क्षीरवरोद्वीपः क्षीरवरसमुद्रः घृतवरोद्वीपः घृतवरोसमुद्रः इक्षुवरोद्वीपः इ
क्षुवरः समुद्रः नंदीश्वरोद्वीपः नंदीश्वरवरः समुद्रः अरुणवरोद्वीपः अरुणवरः समुद्रः इत्येवमसंख्येयाः
द्वीपसमुद्राः स्वयंभूरमणपर्यंताः वेदितव्याः अमीषां विष्कंभसन्निवेशसंस्थानविशेषप्रतिपत्त्यर्थमा
ह   द्विर्द्विर्विष्कंभाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः द्विर्द्विरितिवीप्सार्थं वचनं विष्कंभाः पू
र्वपूर्वपरिक्षेपिणो वलयाकृतयाः द्विर्द्विरितिवीप्सार्थं वचनं विष्कंभद्विगुणत्वं यथा स्यात् आद्यस्य द्वी
पस्य यो विष्कंभः तद्द्विगुणविष्कंभो लवणजलधिस्तद्द्विगुणविष्कंभो द्वितीयो द्वीपः तद्द्विगुणविष्कंभो
द्वितीयो जलधिरिति द्विर्द्विर्विष्कंभो येषां ते द्विर्द्विर्विष्कंभाः पूर्वपूर्वपरिक्षेपिवचनं ग्रामनगरादिवत्
विनिवेशो मा विज्ञायीति वलयाकृतिवचनं चतुरस्रादिसंस्थानांतरनिवृत्त्यर्थं अत्राह जंबूद्वीपस्य प्रदे
शसंस्थानविष्कंभा वक्तव्यास्तन्मूलत्वादितरविष्कंभादिविज्ञानस्येत्युच्यते   तन्मध्ये मेरुनाभिर्वृत्तो ७४

योजनशतसहस्रविष्कंभो जंबूद्वीपः तेषां मध्ये तन्मध्ये केषां सर्वेषां द्वीपसमुद्राणां नाभिरिव नाभिः म
ध्ये मेरुनाभिर्यस्य मेरुनाभिः वृत्तः आदित्यमंडलोपमानशतानां सहस्रं शतसहस्रं योजनानां शतसह
स्रं योजनशतसहस्रं योजनशतसहस्रं विष्कंभो यस्य सोयं योजनशतसहस्रविष्कंभः कोसौ जंबूद्वीपः
कथं जंबूद्वीपः जंबूवृक्षोपलक्षितत्वात् उत्तरकुरूणां मध्ये जंबूवृक्षः अनादिनिधनः पृथिवीपरिणामो
अकृत्रिमः सपरिवारः तदुपलक्षितोयं द्वीपः तत्र जंबूद्वीपे षड्भिः कुलपर्वतैर्विभक्तानि सप्त क्षेत्राणि का
नि तानीत्यत आह   भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावतवर्षाः क्षेत्राणि भर
तादयः अनादिकालप्रवृत्ताः तत्र भरतवर्षः कस्त्रिविष्टोदक्षिणदिग्भागे हिमवतोद्रेः त्रयाणां समुद्रा
णां मध्ये आरोपितचापाकारो भरतवर्षः विजयार्द्धनगंगासिंधुभ्यां च विभक्तः षट्खंडः क्षुद्रहिमवंत ८२
मुत्तरेण दक्षिणेन महाहिमवंतः पूर्वापरसमुद्रयोर्मध्ये हैमवतवर्षो निषधस्य दक्षिणतः महाहिमवतः उ

७५ त्तरतः पूर्वापरसमुद्रयोरंतराले हरिवर्षः निषधस्योत्तरान्नीलवतो दक्षिणात्पूर्वापरसमुद्रयोरंतरे विदेह
स्य सन्निवेशो द्रष्टव्यः नीलवतः उत्तराद्रुक्मिणो दक्षिणात्पूर्वापरसमुद्रयोर्मध्ये रम्यवर्षः रुक्मिणः उत्तरा १२
च्छिखरिणो दक्षिणात्पूर्वापरसमुद्रयोर्मध्ये सन्निवेशो हैरण्यवतवर्षः शिखरिण उत्तरतस्त्रयाणां समुद्राणां
मध्ये ऐरावतवर्षः स विजयार्द्धेन रक्तारक्तोदाभ्यां च विभक्तः षट्खंडः षट्कुलपर्वता इत्युक्तं के पुनस्ते कथं
वा व्यवस्थिता इत्यत आह तद्विभाजिनः पूर्वापरायता हिमवन्महाहिमवन्निषधनीलरुक्मिशिखरिणो व ३५
३५ र्षधरपर्वताः ॥११॥ तानि क्षेत्राणि विभजंतीत्येवंशीलास्तद्विभाजिनः पूर्वपरायता इति पूर्वापरकोटिभ्यां ल
वणजलधिस्पर्शिन इत्यर्थः हिमवदादयः अनादिकालप्रवृत्ताः अनिमित्तसंज्ञाः वर्षविभागहेतुत्वात्
वर्षधरपर्वता इत्युच्यते तत्र क्व हिमवान् भरतस्य हैमवतस्य च सीमन्यवस्थितः क्षुद्रहिमवान् योजनशतो
च्छ्रायः हैमवतस्य हरिवंशस्य च विभागकरो महाहिमवान् द्वियोजनशतोच्छ्रायः महाविदेहस्य दक्षिणतः ७५

हरिवंशस्योत्तरतः निषधो नाम पर्वतः चतुर्योजनशतोच्छ्रायः उत्तरेत्र योपि पर्वताः स्ववर्षविभाजिनो व्या
ख्याताः उच्छ्रायश्च तेषां चत्वारि द्वे एकं च योजनशतं वेदितव्यं सर्वेषां पर्वतानामुच्छ्रायस्य चतुर्भागो अवगा
हः तेषां वर्णविशेषप्रतिपत्त्यर्थमाह हेमार्जुनतपनीयवैडूर्यरजतहेममयाः तएते हिमवदादयः पर्वता
हेमादिमया वेदितव्याः यथाक्रमं हेममयो हिमवान् चीनपट्टवर्णः अर्जुनमयो महाहिमवान् शुक्लः तप
नीयमयो निषधः तरुणादित्यवर्णः वैडूर्यमयो नीलः मयूरग्रीवाभः रजतमयो रुक्मी शुक्लः हेममयः
शिखरी चीनपट्टवर्णः पुनरपि तद्विशेषणार्थमाह मणिविचित्रपार्श्वा उपरि मूले च तुल्यविस्ताराः ॥ ना
नावर्णप्रभादिगुणोपेतैर्मणिभिर्विचित्राणि पार्श्वानि येषां ते मणिविचित्रपार्श्वाः अनिष्टसंस्थानस्य नि
वृत्त्यर्थमुपर्यादिवचनं क्रियते चशब्दो मध्यसमुच्चयार्थः य एषां मूले विस्तारः स उपरि मध्ये च तुल्यः तेषां
मध्ये लब्धास्पदा ह्रदा उच्यंते पद्ममहापद्मतिगिंछकेशरिमहापुंडरीकपुंडरीका ह्रदास्तेषामुपरि ॥

७६ पद्ममहापद्मः तिगिंछः केशरी महापुंडरीकपुंडरीकइति तेषां हिमवदादीनांउपरियथाक्रममेतेह्रदाः
वेदितव्याः तत्राद्यस्यसंस्थानविशेषप्रतिपत्यर्थमाह प्रथमोयोजनसहस्त्रायामस्तदर्द्ध विष्कंभोह्रदः १५
३ पूरव प्राक्प्रत्यक्योजनसहस्त्रायाम उदगपाक्पंचयोजनशतविस्तारः वज्रमयतटः विविधमणिकनकविचि क्रस्जत ३
त्रतटः पद्मनामोह्रदः तस्यावगाहप्रक्लृप्त्यर्थमिदमुच्यते दशयोजनावगाहः अवगाहोऽधः प्रवेशोनिम्न
ता दशयोजनान्यवगाहोऽस्यदशयोजनावगाह तन्मध्येयोजनंपुष्करं योजनप्रमाणंयोजनं क्रोशायाम
मपत्रत्वात् क्रोशद्वयविष्कंभकर्णिकत्वाच्च योजनायामविष्कंभ जलतलात् क्रोशद्वयोछ्रयनालंता
वद्बहलपत्रप्रचयंपुष्करमवगंतव्यं इतरेषांह्रदानांपुष्कराणांचआयामादिनिर्ज्ञापनार्थमाह तद्द्विगु
णद्विगुणाह्रदाः पुष्कराणिच सप्तचतत्र तेतयोर्द्विगुणास्तद्विगुणाः तद्द्विगुणद्विगुणाइतिद्वित्वंव्याप्तिज्ञा
पनार्थंकेनद्विगुणाः आयामादिना पद्मह्रदस्यद्विगुणायामविष्कंभावगाहोमहापद्मोह्रदः तस्यद्विगुणाया ७६

मविष्कंभावगाहस्तिगिंछोह्रदः पुष्कराणिचकिं[redacted]द्विगुणानीत्यभिसंबध्यते तन्निवासिनीनांदेवीनां
संज्ञाजीवितपरिवारप्रतिपादनार्थमाह तन्निवासिन्योदेव्यः श्रीह्रीधृतिकीर्त्तिबुद्धिलक्ष्म्यापल्योपमस्थित
यः ससामानिकपरिषत्का तेषुपुष्करेषुकर्णिकामध्यदेशनिवेसिनः शरद्विमलपूर्णचंद्रद्युतिहराः क्रो
शायामाः क्रोशार्द्धविष्कंभादेशोनक्रोशोत्सेधाः प्रासादास्तेषुनिवसंतीत्येवंशीलाः तन्निवासिन्योदेव्यः
श्रीह्रीधृतिकीर्त्तिबुद्धिलक्ष्मीसंज्ञिकाः तेषुपद्मादिषुयथाक्रमंवेदितव्याः पल्योपमस्थितयइत्यनेनआयु
षः प्रमाणमुक्तं समानेस्थानेभवाः सामान्यकाः सामानिकाश्चपरिषदश्चसामानिकपरिषदः सहसामा
निकपरिषद्भिर्वर्त्तंतइतिसमानिकपरिषत्काः तस्यपद्मस्यपरिवारपद्मेषुप्रसादानांउपरिसामानिकाः
परिषदश्चवसंति यकाभिः सरद्भिः तानिक्षेत्राणिप्रविभक्तानितांउच्यंते गंगासिंधूरोहिद्रोहितास्याहरि
द्धरिकांताशीताशीतोदानारीनरकांतासुवर्णरूप्यकूलारक्तारक्तोदास्सरितस्तन्मध्यगाः सरितोनवाप्यः ता

तन्मध्यंतन्मा

११ किमंतराउलसमीपाइत्यत्रआह तन्मध्यगाः तेषां क्षेत्राणां मध्यं मध्येन वा गछंतीति तन्मध्यगाः एक
त्रसर्वासांप्रसंगनिवृत्त्यर्थं दिग्विशेषप्रतिपत्त्यर्थमाह द्वयोर्द्वयोः पूर्वाः पूर्वगाः द्वयोर्द्वयोः सरितो
रेकैकक्षेत्रविषयइतिवाक्यशेषाभिसंबंधात् एकत्रसर्वासांप्रसंगनिवृत्तिः कृता पूर्वाः पूर्वगा वच
नं दिग्विशेषप्रतिपत्त्यर्थं तत्रपूर्वायाः सरितस्ताः पूर्वगाः पूर्वजलधिं गछंतीति पूर्वगाः किमपेक्षं
पूर्वत्वं सूत्रनिर्देशापेक्षं यद्येवं गंगासिंध्वादयः सप्त पूर्वगाः इति प्राप्त नैष दोषः द्वयोर्द्वयोरित्यभिसंबंधात्
द्वयोर्द्वयोः पूर्वाः पूर्वगा इति वेदितव्याः इतरासां दिग्विभागप्रतिपत्त्यर्थमाह शेषास्त्वपरगाः द्वयोर्द्वयो
र्याः अवशिष्टास्ता अपरगाः प्रत्येतव्याः अपरसमुद्रं गछंतीति अपरगाः तत्रपद्मह्रदप्रभवा पूर्वतोर
णद्वारनिर्गता गंगा अपरतोरणद्वारनिर्गता सिंधुः उदीच्यतोरणद्वारनिर्गता रोहितास्या महापद्म
ह्रदप्रभवा अपाच्यतोरणद्वारनिर्गता रोहित् उदीच्यतोरणद्वारनिर्गता हरिकांता तिगिंछह्रद ११

प्रभवा दक्षिणतोरणद्वारनिर्गता हरित् उदीच्यतोरणद्वारनिर्गता शीतोदा केसरिह्रदप्रभवा अपाच्यतोर
णद्वारनिर्गता शीता उदीच्यतोरणद्वारनिर्गता नरकांता महापुंडरीकह्रदप्रभवा दक्षिणतोरणद्वारनिर्ग
ता नारी उदीच्यतोरणद्वारनिर्गता रूप्यकूला पुंडरीकह्रदप्रभवा अपाच्यतोरणद्वारनिर्गता सुवर्णकूला
पूर्वतोरणद्वारनिर्गता रक्ता प्रतीच्यतोरणद्वारनिर्गता रक्तोदा तासां परिवारप्रतिपादनार्थमाह चतुर्द
शनदीसहस्रपरिवृता गंगासिंध्वादयो नद्यः किमर्थं गंगासिंध्वादिग्रहणं क्रियते नदीग्रहणार्थं
प्रकृतास्ता अभिसंबध्यंते नैवं शक्यं अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति अपरगाणामेव ग्रहणं स्या
त् गंगादिग्रहणमेवास्त्विति चेत् पूर्वगाणामेव ग्रहणं स्यात् अतस्तन्नदीनां ग्रहणार्थं गंगासिंध्वादिग्रह
णं क्रियते नदीग्रहणं द्विगुणा द्विगुणा इत्यभिसंबंधार्थं गंगा चतुर्दशनदीसहस्रपरिवृता सिंधुरपि ए
वमुत्तरा अपि नद्यः प्रतिक्षेत्रं तद्द्विगुणा द्विगुणा भवंति आविदेहात् तत उत्तरा अर्धार्धहीनाः उक्तानां क्षे

७८ त्राणां विष्कंभप्रतिपत्यर्थमाह ॥ भरतः षड्विंशतिपंचयोजनशतविस्तारः षट् चैकोनविंशतिभागा योजन
स्य ॥ षडधिका विंशतिः षड्विंशतिरधिका येषु तानि षड्विंशानि पंचयोजनशतानि विस्तारोस्य षड्विंश
पंचयोजनशतविस्तारो भरतः किमेतावानेवेत्याह षट् चैकोनविंशतिभागा योजनस्य विस्तारोस्येत्यभिसंबध्य
ते इतरेषां विष्कंभविशेषप्रतिपत्यर्थमाह तद्द्विगुणद्विगुणविस्तारा वर्षधरवर्षा विदेहांताः तेतो भ
रतात् द्विगुणो विस्तारो येषां ते इमे तद्द्विगुणविस्ताराः के ते वर्षधरवर्षाः [illegible] किं सर्वे नेत्याह विदेहांता इ
ति अथोत्तरेषां कथमित्यत आह उत्तरा दक्षिणतुल्याः उत्तरा ऐरावतादयो नीलांताः भरतादिभिः दक्षिणै
स्तुल्याः द्रष्टव्याः अतीतस्य सर्वस्यायं विशेषो वेदितव्यः तेन ह्रदपुष्करादीनां तुल्यता योज्या अत्राह उ
क्तेषु भरतादिषु क्षेत्रेषु मनुष्याणां किं तुल्योनुभवादिः आहोस्विदस्ति कश्चित्प्रतिविशेष इत्यत्रोच्यते
भरतैरावतयोर्वृद्धिह्रासौ षट्समयाभ्यामुत्सर्पिण्यवसर्पिणीभ्यां वृद्धिश्च ह्रासश्च वृद्धिह्रासौ कयोर्भ ७८
कालाभ्यां षट्समयाभ्यामुत्सर्पिण्यावसर्पिणीभ्यां २

७२

रतैरावतयोर्न तयोः क्षेत्रयोर्वृद्धिह्रासौ स्तः असंभवात् तत्स्थानां मनुष्याणां वृद्धिह्रासौ भवतः अथवा अधिक
रणनिर्देशः भरते ऐरावते मनुष्याणां वृद्धिह्रासाविति किं कृतौ वृद्धिह्रासौ अनुभवायुःप्रमाणादिकृतौ अनु
भवः उपभोगः आयुर्जीवितपरिमाणं प्रमाणं शरीरोत्सेध इत्येवमादिभिः वृद्धिह्रासौ मनुष्याणां भवतः
किं [illegible]हेतुकौ पुनस्तौ कालहेतुकौ स च कालो द्विविधः उत्सर्पिणी अवसर्पिणी चेति तद्भेदाः प्रत्येकं षट्
अन्वर्थसंज्ञे चेते अनुभवादिभिरुत्सर्पणशीला उत्सर्पिणी तैरेवावसर्पणशीला अवसर्पिणी तत्रा
वसर्पिणी षड्विधा सुषमसुषमा सुषमा सुषमदुःषमा दुःषमसुषमा दुःषमा अतिदुःषमा चेति उ
त्सर्पिण्यपि अतिदुःषमाद्या सुषमसुषमांता षड्विधैव भवति अवसर्पिण्याः परिमाणं दशसागरो
पमकोटीकोट्यः उत्सर्पिण्या अपि तावत्य एव सो भयी कल्प इत्याख्यायते तत्र सुषमसुषमा चतस्रः सागरो तत्र
पमकोटीकोट्यः तदादौ मनुष्या उत्तरकुरुमनुष्यतुल्याः ततः क्रमेण हानौ सत्यां सुषमा भवति तिस्रः सा

DR. BHAU DAJI MEMORIAL

७९ गरोपमकोटीकोट्यः तदादौ मानुष्याः हरिवर्षमनुष्यस्यतुल्या ततः क्रमेण हानौ सत्यां सुखमदुःखमा भवति
द्वे सागरोपमकोटीकोट्यौ तदादौ मनुष्या हैमवतकमनुष्यसमाः ततः क्रमेण हानौ सत्यां दुःखमसुखमा
भवति एकसागरोपमकोटीकोट्यः द्विचत्वारिंशद्वर्षसहस्रोना तदादौ मनुष्याः बिदेहजनतुल्या भवंति ततः
क्रमेण हानौ सत्यां दुःखमा भवति एकविंशतिवर्षसहस्राणि ततः क्रमेण हानौ सत्यां अतिदुःखमा भव
ति एकविंशतिवर्षसहस्राणि एवमुत्सर्पिण्यपि विपरीतक्रमो वेदितव्या अथेतरासु भूमिषु कावस्थे
त्यत आह ताभ्यामपरा भूमयो वस्थिताः ताभ्यां भरतैरावताभ्यां अपरा भूमयः अवस्थिता भवति नहि तत्रो
त्सर्पिण्यवसर्पिण्यौ स्तः किं तासु भूमिषु मनुष्यास्तुल्यायुषः आहोश्वित् कश्चिदस्ति प्रतिविशेष इत्यत
आह एकद्वित्रिपल्योपमस्थितयो हैमवतकहारिवर्षकदैवकुरवकाः हिमवते भवाः हैमवतका इ
त्येवं वुञ्जि सति मनुष्यप्रसंगस्य यो भवति एवमुत्तरयोरपि हैमवतकादयस्त्रयः तत्र यथासंख्यमभिसंबं ७९

हैमवतः १ एकादयस्त्रयः २

धः क्रियते एकपल्योपमस्थितयो हैमवतकाद्विपल्योपमस्थितयः हरिवर्षकाः त्रिपल्योपमस्थितयो दैव
कुरवका इति तत्र पंचसु हैमवतेषु सुषमदुःखमा सदावस्थिता तत्र मनुष्याः एकपल्योपमायुषः द्विधनुः
सहस्रोच्छ्रिताश्चतुर्थभक्ताहाराः नीलोत्पलवर्णाः पंचसु हरिवर्षेषु सुखमा सदावस्थिता तत्र मनुष्या द्वि
पल्योपमायुषः चतुश्चापसहस्रोत्सेधाः षष्ठभक्ताहाराः शंखवर्णाः पंचसु देवकुरुषु सुखमसुखमा
सदावस्थिता तत्र मनुष्याः त्रिपल्योपमायुषः षड्धनुःसहस्रोच्छ्रायाः अष्टमभक्ताहाराः कनकव
र्णाः अथोत्तरेषु कावस्थेत्यत आह तथोत्तरा यथा दक्षिणा व्याख्यातास्तथैवोत्तरा वेदितव्याः हैरण्य
वतकाः हैमवतकस्तुल्याः रम्यकाः हरिवर्षकैः सदृशाः दैवकुरुवकैरुत्तरकुरुवकाः व्याख्याताः छ
अथ विदेहेष्ववस्थितेषु का स्थितिरित्यत्रोच्यते बिदेहेषु संख्येयकालाः सर्वेषु विदेहेषु संख्येयकालाः
मनुष्या तत्र कालः सुखमदुःखमांतोपमः सदावस्थितः मनुष्याश्च पंचधनुःशतोत्सेधाः नित्याहाराः उत्कर्षे

८० णेकपूर्वकोटीस्थितिकाः जघन्येनांतर्मुहूर्त्तायुषः तस्मात्त्वसंबंधेगाथांपठंति ॥ उवसस्सउपरिमाणंसदरिं
खलुकोडिसुदसहस्साइं छप्पणंचसहस्सावोधव्वोवासकोडीणं ॥ उक्तोभरतस्यविष्कंभः पुनः प्रकारांतरे
णतत्प्रतिपत्त्यर्थमाह भरतस्यविष्कंभोजंबूद्वीपस्यनवतिशतभागः जंबूद्वीपविष्कंभस्ययोजनशत
सहस्रस्यनवतिशतभागीकृतस्यैकोभागः भरतस्यविष्कंभः समर्वोक्तएव उक्तंजंबूद्वीपंपरिवृत्यवेदि
कास्थितातत्तः परोलवणोदः समुद्रः द्वियोजनशतसहस्रवलयविष्कंभः ततः परोधातकीखंडोद्वीपः
चतुर्योजनशतसहस्रवलयविष्कंभः तत्रवर्षादीनांसंख्यादिविधिप्रतिपत्त्यर्थमाह द्विर्धातकीखंडे
भरतादीनांद्रव्याणांइहाभ्यावृत्तिर्द्विर्वद्धिता तत्रकथंसुच्यथाक्रियमाणक्रियाभ्यावृत्तिद्योतनार्थः सु
च्यथा द्विस्तावानयंप्रासादोमीयतइति एवंद्वि धातकीखंडेभरतादयोमीयंतइति तद्यथा द्वाभ्यामिष्वा
कारपर्वताभ्यांदक्षिणोत्तरायताभ्यांलवणोदकालोदवेदिकास्पृष्टकोटिभ्यांविभक्तोधातकीखंडः पूर्वा ८०

पर इति तत्रपूर्वस्यापरस्य[illegible]मध्येद्वौमंदरौतयोरभयतः भरतादीनिक्षेत्राणिहिमवदादयश्च वर्षधरपर्वताः
एवंद्वौभरतौद्वौहिमवंतौइत्येवमादिसंख्यानंद्विगुणंवेदितव्यं जंबूद्वीपेहिमवदादीनांवर्षधराणांयोविष्कंभः
तद्विगुणोधातकीखंडेहिमवदादीनां[illegible]वर्षधराश्चक्रावदवस्थिताः अरविवरसंस्थानानिक्षेत्राणि
जंबूद्वीपेयत्रजंबूवृक्षःस्थितिः तत्रधातकीखंडेधातकीवृक्षः सपरिवारः तद्योगाधातकीखंडइतिद्वीपस्य
धि नामप्रतीतांतत्परिक्षेपीकालोदस्समुद्रः टंकछिन्नतीर्थः अष्टयोजन शतसहस्रवलयविष्कंभः कालोद
परिक्षेपीपुष्करद्वीपः षोडशयोजनशतसहस्रवलयविष्कंभः तत्रद्वीपांभोनिधिविष्कंभद्विगुणपरिक्लृप्ति
वोत्धातकीखंडवर्षादिद्विगुणविधिप्रसंगेविशेषावधारणार्थमाह पुष्करार्द्धेच ॥ ३४ ॥ किंद्विरित्यनुवर्त्तते
किमपेक्षाद्विरावृत्तिः जंबूद्वीपभरतहिमवदाद्यपेक्षयेवजंबूद्वीपात्पुष्करार्द्धेद्वौहिमवंतौइत्यादिरुक्ताव्या भरतौ२
ख्यानः यथाधातकीखंडेहिमवदादीनांविष्कंभः तथापुष्करार्द्धेहिमवदादीनांद्विगुणइतिव्याख्यायतेना

ष्वा१ इति२

८२ मानितान्येव इष्वाकारौ मंदरौ च पूर्ववत् यत्र जंबूद्वीपे जंबूवृक्षः तत्र पुष्करं सपरिवारं तत एव तस्य द्वीपस्य ना
द्व२ मत्वं पुष्करद्वीप इति अथ कथं पुष्करार्द्धसंज्ञा मानुषोत्तरशैलेन विभक्तार्द्धत्वात् पुष्करार्द्धसंज्ञा अत्राह
किमर्थं जंबूद्वीपहिमवदादिसंख्याद्विरावृत्ता पुष्करार्द्धे कथ्यते न पुनः कृत्स्न एव पुष्करद्वीप इत्यत्रोच्यते प्रा
ङ्मानुषोत्तरान्मनुष्याः ॥ पुष्करद्वीपवहुमध्यदेशभागी वलयवृत्तो मानुषोत्तरो नाम शैलः तस्मात् प्रा
गेव मनुष्याः न बहिरिति ततो न बहिः पूर्वोक्तक्षेत्रविभागोस्ति नास्मादुत्तरं कदाचिदपि विद्याधरा ऋद्धिप्रा
नदीनां त्रसाध प्ता अपि मनुष्या गच्छंति अन्यत्रोपपादसमुद्घाताभ्यां ततोस्यान्वर्थसंज्ञा एवं जंबूद्वीपादिष्वर्द्धतृतीये
षु द्वीपेषु द्वयोश्च समुद्रयोः मनुष्या वेदितव्याः ते द्विविधाः आर्या म्लेच्छाश्च ॥ गुणैर्गुणवद्भिर्वा अर्यंत इ
प्रा त्यार्याः ते द्विविधाः ऋद्धिप्राप्तार्या अऋद्धिप्राप्तार्याश्चेति अऋद्धिप्राप्तार्याः पंचविधाः क्षेत्रार्या जात्यार्याः क
र्मार्याः चारित्रार्याः दर्शनार्याश्चेति ऋद्धिप्राप्तार्याः सप्तविधाः बुद्धिविक्रियातपोबलौषधरसाक्षीणभेदा ८२

त् म्लेच्छा द्विविधाः अंतरद्वीपजा कर्मभूमिजाश्चेति तत्रांतरद्वीपाः लवणोदेष्टासु दिक्षु अष्टौ तदंतरे
षु चाष्टौ हिमवच्छिखरिणोरुभयोश्च विजयार्द्धयोरंतेषष्टौ तत्र दिक्षु द्वीपाः वेदिकायाः तिर्यक् पंचयोज
नशतानि प्रविश्य भवंति विदिक्ष्वंतरेषु च द्वीपाः पंचाशत्पंचयोजनशतेषु भवंति शैलांतेषु द्वीपाः ष
ट्सु योजनशतेषु गतेषु भवंति दिक्षु द्वीपाः शतयोजनविस्ताराः विदिक्ष्वंतरेषु च द्वीपाः तदर्द्धविष्कं
भाः शैलांतेषु पंचविंशतियोजनविस्ताराः तत्र पूर्वस्यां दिशि एकोरुकाः अपरस्यां दिशि लांगूलिनः उ
त्तरस्याम भाषकाः दक्षिणस्यां विषाणिकाः शशकर्णशष्कुलीकर्ण[illegible]प्रावरणलंबकर्णाः विदिक्षु
अश्वसिंहश्वमहिषवराहव्याघ्रकाककपिमुखाः अंतरेषु मेघमुखविद्युन्मुख शिखरिणः उभयोरं
तयोर्मत्स्यमुखकालमुखाः हिमवतः उभयोरंतयोः हस्तिमुखादर्शमुखाः उत्तरविजयार्द्धस्योभ
योरंतयोर्गोमुखमेषमुखाः दक्षिणविजयार्द्धस्योभयोरंतयोः एकोरुका मृदाहाराः गुहावासिनः शो

८२ षायुष्यफलाहाराः वृक्षवासिनः सर्वे ते पल्योपमायुषः ते चतुर्विंशतिर्द्वीपाः जलतलादेकयोजनोत्सेधाः
तथा कालोदेपि वेदितव्याः त एते अंतरद्वीपजाः म्लेच्छाः कर्मभूमिजाश्च शकयवनसरवपुलिंदादयः
काः पुनः कर्मभूमय इत्यत्र आह भरतैरावतविदेहाः कर्मभूमयोन्यत्र देवकुरूत्तरकुरुभ्यः ३७ भर
पंच ५ ताः ऐरावताः विदेहाश्च पंच पंच एताः कर्मभूमयः इति व्यपदिश्यंते तत्र विदेहग्रहणात् देवकुरूत
रकुरुग्रहणे प्रसक्ते तत्प्रतिषेधार्थमाह अन्यत्र देवकुरूत्तरकुरुभ्य इति अन्यत्र शब्दो वर्जनार्थः दे
वकुरव उत्तरकुरवः हैमवतो हरिवंशाः रम्यकः हैरण्यवतः अंतरद्वीपाश्च भोगभूमयः इति व्यपदि
श्यंते अथ कथं कर्मभूमित्वं शुभाशुभलक्षणस्य कर्मणः अधिष्ठानत्वात् ननु सर्वो लोकत्रितयः
कर्मणोऽधिष्ठानमेव तत एव प्रकर्षगतिर्विज्ञास्यते प्रकर्षेण यत्कर्मणोऽधिष्ठानमिति तत्राशुभ
कर्मणस्तावत् सप्तमनरकप्रापणस्य भरतादिष्वेवार्जनं शुभस्य सर्वार्थसिध्यादिषु स्थानविशेषप्रा ८२

पणस्य पुण्यकर्मण उपार्जनं तत्रैव कृष्यादिलक्षणस्य षड्विधस्य कर्मणः पात्रदानादिसहितस्य तत्रैवारं
भात् कर्मभूमिर्व्यपदेशो वेदितव्यः इतरास्तु दशविधकल्पवृक्षकल्पितभोगानुभवनविषयत्वात् भो
गभूमय इति व्यपदिश्यंते उक्तासु भूमिषु मनुष्याणां स्थितिपरिच्छेदार्थमाह नृस्थिती परावरे त्रिपल्यो
पमांतर्मुहूर्ते ३८ त्रीणि पल्योपमानि यस्याः सा त्रिपल्योपमा अंतर्गतो मुहूर्तः यस्याः सा अंतर्मुहूर्ता यथासं
ख्येन संबंधः मनुष्याणां परा उत्कृष्टा स्थितिः त्रिपल्योपमा अपरा जघन्या अंतर्मुहूर्ता मध्ये विकल्पः
तत्र पल्यं त्रिविधं व्यवहारपल्यं उद्धारपल्यं अद्धापल्यमिति अन्वर्थसंज्ञा एताः आद्यं व्यवहारपल्यमि
त्युच्यते उत्तरपल्यद्वयस्य व्यवहारबीजत्वात् नानेन किंचित् परिच्छेद्यमस्तीति द्वितीयमुद्धारपल्यं ततः
उद्धृतैर्लोमच्छेदैः द्वीपसमुद्राः संख्यायंत इति तृतीयमद्धापल्यं अद्धाकालस्थितिरित्यर्थः तत्परिच्छेदा
र्थत्वात् तत्राद्यस्य प्रमाणं कथ्यते तद्यथा प्रमाणांगुलपरिमितयोजनविष्कंभायामावगाहानि त्रीणि प

घर

८३ ल्यानि कुशलाइत्यर्थः एकादिसप्तान्तांहोरात्रिजातानाविबालाग्राणि तावच्छिन्नानि यावद्द्वितीयं कर्त्तरीछे
दंनाप्नुवंति तादृशैर्लोमच्छेदैः परिपूर्णं घनीकृतंव्यवहारपल्यमित्युच्यते ततो वर्षशतेगते एकैकरोमाप
कर्षणविधिना यावता कालेन तद्रिक्तं भवेत् तावत्कालोव्यवहारपल्यो[redacted]पः तैरेवरोमच्छेदैः प्रत्ये मित्यु३
कमसंख्येयवर्षकोटीसमयमात्रछिन्नैः तत्पूर्णमुद्धारपल्यं ततः [redacted]समये एकैकस्मिन्रोमच्छेदे अ
पकृष्यमाणे यावता कालेन तद्रिक्तं भवति तावत्कालउद्धारपल्योपमाख्यः एषामुद्धारपल्यानां दशको
टीकोट्यः एकमुद्धारसागरोपमं अर्द्धतृतीयोद्धारसागरोपमयाणां यावंतो रोमच्छेदास्तावंतो दीपसमुद्राः
पुनरुद्धारपल्यरोमच्छेदैर्वर्षशतसमयमात्रछिन्नैः पूर्णमद्धापल्यं ततः समये समये एकैकस्मिन् रो
मच्छेदेऽपकृष्यमाणे यावता कालेन तद्रिक्तं भवति तावान्कालः अद्धापल्योपमाख्यः एषामद्धापल्यो पमा
नां दशकोटीकोट्यः एकमद्धासागरोपमं दशाद्धासागरोपमकोटीकोट्यः एकावसर्पिणी तावत्येवोत्स ८३

९१
र्पिणी अनेनाद्धापल्येन नारकतैर्यग्योनानां देवमनुष्याणां च कर्म्मस्थितिर्भवस्थितिरा[redacted]ः स्थितिकाय
स्थितिश्च परिच्छेत्तव्या उक्ता च संग्रहगाथा ववहारुद्धारद्धापल्लातिन्नेव होंतिवोधव्वा संखादीवस
मुद्दा कम्मठ्ठिदि वण्णिदा तदिए यथैवैते उत्कृष्टजघन्ये स्थिती नृणां तथैव तिर्यग्योनिजानां च उ ए
तिरश्चां योनिः तिर्यग्योनिः [redacted] तिर्यग्गतिनामकर्मोदयापादितं जन्मेत्यर्थः तिर्यग्योनौ जाताः तिर्य
ग्योनिजाः तेषां तिर्यग्योनिजानामुत्कृष्टा भवस्थितिस्त्रिपल्योपमा जघन्यांतर्मुहूर्त्ता मध्ये विकल्पाः
इतितत्वार्थवृत्तौ सर्वार्थसिद्धिसंज्ञिकायां तृतीयोध्यायः समाप्तः ॥ ३ ॥ भूबिललेश्यायुर्द्वी
पोदधिवासगिरिसरःसरितां मानं [redacted] नृणां भेदस्थितिस्तिरश्चामपि तृतीयेध्याये भवप्रत्ययोवधिर्देव
नारकाणामित्येवमादिष्वसकृद्देवशब्दः उक्तः तत्र न ज्ञायते के देवाः कतिविधा इति तन्निर्णयमाह छ
देवाश्चतुर्णिकायाः १ देवगतिनामकर्मोदये सत्यभ्यंतरे हेतौ बाह्यविभूतिविशेषैः द्वीपादिसमुद्रादिप

DR. BHAU DAJI MEMORIAL

८४ देशेषुयथेष्टंदीव्यंति क्रीडंतिदेवाः इहैकवचननिर्देशोयुक्तः देवश्चतुर्णिकायइति सजात्यभिधानात्ब
ह्वनांप्रतिपादकोभवति बहुत्वनिर्देशस्तदंतर्गतभेदप्रतिपत्त्यर्थः इंद्रसामानिकादयोबहवोभेदाः सं
तिस्थित्यादिकृताश्चसंतत्सूचनार्थः देवगतिनामकर्म्मोदयस्यस्वधर्मविशेषापादितभेदस्यसामर्थ्यात् ८३
निचीयंतइतिनिकायाःसंघाताः इत्यर्थः चत्वारोनिकायाः येषांतेचतुर्णिकायाः केपुनस्तेभवनवासि
नोव्यंतराज्योतिष्काःवैमानिकाश्चेति तेषांलेश्यावधारणार्थमुच्यते ७ आदितस्त्रिषुपीतांतलेश्याः
२ आदितइत्युच्यते अंतेमध्येअन्यथावाग्रहणंमाविज्ञायीति आदौआदितः द्वयोरेकस्यनिवृत्त्य
र्थंत्रिग्रहणंक्रियते अथचतुर्णांनिवृत्त्यर्थंकस्मान्नभवति आदितइतिवचनात् षट्लेश्या उक्तास्त
श्चतसृणांलेश्यानांग्रहणार्थंपीतांतग्रहणंक्रियतेपीतंतेजइत्यर्थः पीताअंतेयासांताःपीतांताःले
श्यायेषांतेपीतांतलेश्याः एतदुक्तंभवति आदितस्त्रिषुनिकायेषुभवनवासिव्यंतरज्योतिष्कानांदे ८४

वानांकृष्णानीलाकापोतापीतेतिचतस्रोलेश्याभवंतितेषांनिकायानामंतर्विकल्पप्रतिपादनार्थ
माह ७ दशाष्टपंचद्वादशविकल्पाःकल्पोपपन्नपर्यंता ३ चतुर्णांदेवनिकायानांदशादिभिःसं
ख्याशब्दैःयथासंख्यमभिसंबंधोवेदितव्यः दशविकल्पाःभवनवासिनः अष्टविकल्पाव्यंतराः पंच
विकल्पाज्योतिष्काः द्वादशविकल्पाःवैमानिकाः सर्व्ववैमानिकानांद्वादशविकल्पांतःपातित्वेप्र
शक्तेग्रैवेयकादिनिवृत्त्यर्थंविशेषणमुपादीयते कल्पोपपन्नपर्यंताइति अथवाकल्पसंज्ञाइंद्रा
दयःप्रकारादशतेषुकल्प्यंतेइतिकल्पाः भवनवासिषुतत्कल्पसंभवेपिरूढिवशात् वैमानिकेष्वे
ववर्ततेकल्पशब्दः कल्पेषूपपन्नाःकल्पोपपन्नाःकल्पोपपन्नापर्यंतायेषांतेकल्पोपपन्नपर्यंताः
पुनरपितद्विशेषप्रतिपत्त्यर्थमाह ७ इंद्रसामानिकत्रायस्त्रिंशपारिषदात्मरक्षलोकपालानीकप्र
कीर्णकाभियोग्यकिल्बिषकाश्चैकशः ॥४॥ अन्यदेवासाधारणाणिमादिगुणयोगादिंदंतीतींद्राः आ

१२

८५ द्रैश्वर्यवर्ज्जितैर्यत्स्थानायुर्वीर्यपरिवारभोगोपभोगादि तत्समानं तस्मिन्समाने भवाः सामानिकाः म
हत्तराः पितृगुरूपाध्यायतुल्याः मंत्रपुरोहितस्थानीयाः त्रयस्त्रिंशाः त्रयस्त्रिंशद्देवत्रायस्त्रिंशाः वयस्य
पीठमर्दसदृशाः पर्षदि भवाः पार्षदाः आत्मरक्षाः शिरोरक्षोपमानाः अर्थचराधिकसमाः लोकपा २३
लाः लोकं पालयंतीति लोकपालाः पदात्यादीनि समानीकानि दंडस्थानीयानि प्रकीर्णकाः पौर
जनपदकल्पाः आभियोग्याः दाससमानाः वाहनादिकर्मणि प्रवृत्ताः अंतेवासिस्थानीयाः किल्वि
षं पापमेषामस्तीति किल्विषिकाः एकैकस्य निकायस्य एकशः एते इंद्रादयो दश विकल्पाश्चतुर्षु नि
कायेषु उत्सर्गेण प्रसक्तास्तेषां अपवादार्थमाह ‖ त्रायस्त्रिंशलोकपालवर्ज्या व्यंतरज्योतिष्काः
५ व्यंतरेषु ज्योतिष्केषु च त्रायस्त्रिंशान् लोकपालांश्च वर्जयित्वा इतरेऽष्टौ विकल्पा द्रष्टव्याः अथ
तेषु निकायेषु किमेकैक इंद्र उतान्यः प्रतिनियमः कश्चिदस्तीत्यत आह ‖ पूर्वयोर्द्वींद्राः ६ ८५

पूर्वयोर्निकाययोः भवनवासिव्यंतरनिकाययोः कथं द्वितीयस्य पूर्वत्वं सामीप्यात् पूर्वत्वमुपचर्योक्तं द्वीं
द्रा इति अंतर्नीतवीप्सार्थः द्वौ द्वौ इंद्रौ येषां ते द्वींद्रा इति यथा सप्तपर्णोऽष्टापद इति तद्यथा भवन
वासिषु तावदसुरकुमाराणां द्वाविंद्रौ चमरो वैरोचनश्च नागकुमाराणां धरणो भूतानंदश्च विद्युत्कुमा
राणां हरिसिंहो हरिकांतश्च सुवर्णकुमाराणां वेणुदेवो वेणुदारी च अग्निकुमाराणां अग्निशिखोऽमान २४
वश्च वातकुमाराणां वेलंबः प्रभंजनश्च स्तनितकुमाराणां सुघोषो महाघोषश्च उदधिकुमाराणां जल
कांतो जलप्रभश्च द्वीपकुमाराणां पूर्णो वशिष्टश्च दिक्कुमाराणाममितगतिरमितवाहनश्चेति व्यंतरे
ष्वपि किन्नराणां द्वाविंद्रौ किंनरः किंपुरुषश्च किंपुरुषाणां सत्पुरुषो महापुरुषश्च महोरगाणां अ
तिकायो महाकायश्च गंधर्वाणां गीतरतिः गीतयशाश्च यक्षाणां पूर्णभद्रो माणिभद्रश्च राक्षसानां भी
म मो महाभीमश्च पिशाचानां कालो महाकालश्च भूतानां प्रतिरूपोऽप्रतिरूपश्च ‖ अथैषां देवानां सुखं

८६ कीदृशमित्यत्रोक्ते सुखावबोधनार्थमाह कायप्रवीचारा आ ऐशानात् ॥७॥ प्रवीचारो मैथुनोपसेवनं
कायेन प्रवीचारो येषां ते कायप्रवीचाराः आङ् अभिविध्यर्थः असंहितया निर्देशः असंदेहार्थः ए
ते भवनवास्यादयः ऐशानान्ताः संक्लिष्टकर्मत्वात् मनुष्यवत् स्त्रीविषयसुखमनुभवंतीत्यर्थः अ
वधिग्रहणादितरेषां सुखविभागे अनिज्ञाते तत्प्रतिपादनार्थमाह शेषाः स्पर्शरूपशब्दमनः प्र
वीचाराः ॥८॥ उक्तावशिष्टग्रहणार्थं शेषग्रहणं के पुनस्ते उक्तावशिष्टाः कल्पवासिनः स्पर्शश्च
रूपं च शब्दश्च मनश्च स्पर्शरूपशब्दमनांसि तेषु प्रवीचारो येषां ते स्पर्शरूपशब्दमनःप्रवीचाराः क
थमभिसंबंधः आर्षाविरोधेन कुतः पुनः प्रवीचारग्रहणमिष्टसंप्रत्ययार्थमिति कः पुनरिष्टोऽभिसं
बंधः आर्षाविरोधी सनत्कुमारमाहेंद्रयोर्देवा देवांगना[illegible]गस्पर्शमात्रादेव परां प्रीतिमुपल ८६
भंते तथा देव्योपि ब्रह्मब्रह्मोत्तरलांतवकापिष्टेषु देवा दिव्यांगनानां शृंगाराकारविलासचतुरमनो

ज्ञवेषरूपावलोकनमात्रादेव परमसुखमाप्नुवंति शुक्रमहाशुक्रसतारसहस्रारेषु देववनितानां मधु
रसंगीतमृदुहसितललितकथितभूषणरवश्रवणमात्रादेव परां प्रीतिमास्कंदंति आनतप्राणता
रणाच्युतकल्पेषु देवाः स्वांगनामनःसंकल्पमात्रादेव परं सुखमाप्नुवंति अथोत्तरेषां किंप्रकारं सु
खमित्यत्रोक्ते तन्निश्चयार्थमाह परेऽप्रवीचाराः ॥९॥ परग्रहणमितराशेषसंग्रहार्थं अप्रवीचारग्रहणं
परमसुखप्रतिपत्त्यर्थं प्रवीचारो हि वेदनाप्रतीकारः तदभावे तेषां परमसुखमनवरतं भवति उक्ता ये
आदिनिकायदेवाः दशविकल्पा इति तेषां सामान्यविशेषसंज्ञाविज्ञापनार्थमिदमुच्यते भवनवासि
नोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः ॥१०॥ भवनेषु वसंतीत्येवंशीलाः
भवनवासिनः आदिनिकायस्येयं सामान्यसंज्ञा विशिष्टनामकर्मोदयापादितवृत्तयः सर्वेषां देवा
नामवस्थितवयःस्वभावत्वेपि वेषभूषायुधयानवाहनक्रीडनादि कुमारवदेषामाभासत इति भव

असुरादयः विशेषसंज्ञा

नी२ य२

८१ नवासिषु कुमारव्यपदेशो रूढः सचात्येकं परिसमाप्यते असुरकुमारा इत्येवमादि क्व तेषां भवनानीति
चेदुच्यते रत्नप्रभायाः पंकबहुलभागे असुरकुमाराणां भवनानि खरपृथिवीभागे उपर्यधश्च एकैकयोज
नसहस्रं वर्जयित्वा शेषनवानां कुमाराणां आवासाः द्वितीयनिकायस्य सामान्यविशेषसंज्ञावधा
रणार्थमाह ॥ छ ॥ व्यंतराः किंनरकिंपुरुषमहोरगगंधर्वयक्षराक्षसभूतपिशाचा ११ विविधदेशां
तराणि येषां निवासाः ते व्यंतरा इति अन्वर्थसामान्यसंज्ञे [redacted] मपि विकल्पानां तेषां व्यंतरा यं५
णां अष्टौ विविकल्पाः किंनरादयो वेदितव्याः नामकर्म्मोदयविशेषापादिताः क्व पुनस्तेषामावासा इ
ति चेदुच्यते अस्माज्जंबूद्वीपादसंख्येयान् द्वीपसमुद्रानतीत्य उपरिष्टे खरपृथिवीभागे सप्तानां व्यंतरा
णामावासा राक्षसानां पंकबहुलभागे तृतीयस्य निकायस्य सामान्यविशेषसंज्ञासंकीर्त्तनार्थमा
ह ज्योतिष्काः सूर्याश्चंद्रमसो ग्रहनक्षत्रप्रकीर्णकतारकाश्च १२ ज्योतिःस्वभावत्वादेषां पंचानाम ८१

पि ज्योतिष्का इति सामान्यसंज्ञा अन्वर्था सूर्यादयस्तद्विशेषसंज्ञाः नामकर्म्मोदयप्रत्ययाः सूर्याश्चंद्र
मसाविति पृथक् ग्रहणं प्राधान्यख्यापनार्थं किंकृतं पुनः प्राधान्यं प्रभावादिकृतं क्व पुनस्तेषामावा
सा इत्युच्यते अस्मात्समानभूमिभागात् सप्तयोजनशतानि नवत्युत्तराणि उत्पत्य सर्वज्योति
षामधोभागविन्यस्तास्तारकाश्चरंति ततो दशयोजनान्युत्पत्य सूर्याश्चरंति ततो शीतियोजना
न्युत्पत्य चंद्रमसो भ्रमंति ततश्चत्वारियोजनान्युत्पत्य नक्षत्राणि ततश्चत्वारियोजनान्युत्पत्य बु
धाः ततः त्रीणियोजनान्युत्पत्य शुक्राः ततस्त्रीणियोजनान्युत्पत्य बृहस्पतयः ततस्त्रीणियोजना
न्युत्पत्य अंगारकाः ततस्त्रीणियोजनान्युत्पत्य शनैश्चराश्चरंति स एष ज्योतिर्गणगोचरो न
भोवकाशो दशाधिक योजनशतबहलस्तिर्यग् असंख्यातद्वीपसमुद्रप्रमाणो घनोदधिपर्यं
त उक्तं च णाउदुत्तरसतसया दससीदी चदुदुगे तियं च उक्कं तारारविससिरिक्खा बुहभग्गवअंगि

८८ गारसणी १२ ॥ ज्योतिष्काणां गतिविशेषप्रतिपत्त्यर्थमाह मेरुप्रदक्षिणा नित्यगतयो नृलोके १३
मेरोः प्रदक्षिणा मेरुप्रदक्षिणा मेरुप्रदक्षिणा इति वचनं गतिविशेषप्रत्यर्थं विपरीतगतिर्मा विज्ञायीति कर्म ३
नित्यगतय इति विशेषणमनुपरतक्रियाप्रतिपादनार्थं नृलोकग्रहणं विषयार्थं मर्द्धतृतीयेषु द्वीपेषु
द्वयोश्च समुद्रयोर्ज्योतिष्का नित्यगतयो नान्यत्र इति ज्योतिष्काविमानानां गतिहेत्वभावाद्वृत्त्यभा नित्य ध
व इति चेन्नासिद्धत्वात् गतिरताभियोग्यदेवप्रेरितगतिपरिणामात् कर्मविपाकस्य वैचित्र्यात्तेषां
हि गतिमुखेनैव कर्म विपच्यत इति एकादशभिर्योजनशतैरेकविंशैर्मेरुमप्राप्य ज्योतिष्काः प्रद
क्षिणाश्चरंति गतिमज्ज्योतिःसंबंधेन व्यवहारकालप्रतिपत्त्यर्थमाह तत्कृतः कालविभागः तद्ग्रह
णं गतिमज्ज्योतिःप्रतिनिर्देशार्थं न केवलया गत्या नापि केवलैर्ज्योतिर्भिः कालः परिछिद्यते अनुपल ८८
ब्धेरपरिवर्तनाच्च कालो द्विविधः व्यावहारिको मुख्यश्च व्यावहारिककालविभागः तत्कृतः समयाव

लिकादिः क्रियाविशेषपरिच्छिन्नोऽन्यस्यापरिच्छिन्नस्य परिच्छेदहेतुः मुख्योऽन्यो वक्ष्यमाणलक्षणः इतर
त्र ज्योतिषामवस्थानप्रतिपादनार्थमाह बहिरवस्थिताः १५ बहिरित्युच्यते कुतो बहिर्नृलोकात् कथम
वगम्यते अर्थवशाद्विभक्तिपरिणामो भवति ननु च नृलोके नित्यगतिवचनादन्यत्रावस्थानं ज्योतिष्का
णां सिद्धं अतो बहिरवस्थिता इति वचनमनर्थकमिति तन्न किं कारणं नृलोकादन्यत्र हि ज्योतिषां अ
स्तित्वमवस्थानं च असिद्धं अतस्तदुभयसिद्ध्यर्थं बहिरवस्थिता इत्युच्यते विपरीतगतिनिवृत्त्यर्थं क
दाचिद्गतिनिवृत्त्यर्थं सूत्रमारब्धं तुरीयस्य निकायस्य सामान्यसंज्ञासंकीर्तनार्थमाह वैमानिकाः
१६ ॥ वैमानिकाग्रहणमधिकारार्थं इत उत्तरं ये वक्ष्यंते तेषां वैमानिकसंप्रत्ययो यथा स्यादिति अ
धिकारः क्रियते विशेषेणात्मस्थान् सुकृतिनो मानयंतीति विमानानि विमानेषु भवा वैमानिकाः
तानि विमानानि त्रिविधानि इंद्रकश्रेणिपुष्पप्रकीर्णकभेदेन तत्र इंद्रकविमानानि इंद्रवन्मध्येऽवस्थि

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

बोडन्यास्कोरै

८९ तानि तेषां च तत्सृपुदिक्षु आकाशप्रदेशश्रेणिवदवस्थानात् श्रेणिविमानानि विदिक्षु प्रकीर्णपुष्पव क १
कार द्‌वस्थानात् पुष्पप्रकीर्णानि तेषां वैमानिकानां भेदावबोधनार्थमाह कल्पोपपन्नाः कल्पातीताश्च ॥१७॥
छ कल्पेषूपपन्नाः कल्पोपपन्नाः कल्पानतीताः कल्पातीताश्चेति द्विविधा वैमानिकाः तेषामवस्थानवि नव ग्रैवेयक देवाः
शेषनिर्ज्ञानार्थमाह उपर्युपरि ॥१८॥ किमर्थमिदमुच्यते तिर्यगवस्थितप्रतिषेधार्थमुच्यते न ज्यो नवानुदिश देवाः
सं१७३५ तिष्कवत्तिर्यगवस्थिताः न व्यंतरवदसमावस्थिता उपर्युपरीत्युच्यते के ते कल्पाः यद्येवं कियत्सु कल्प वि पंचानुत्तरविमा
मानेषु ते देवा भवंतीत्यत आह छ सौधर्मैशानसानत्कुमारमाहेन्द्रब्रह्मब्रह्मोत्तरलांतवकापिष्टशुक्र सिनो त्रिप्रकाराः
महाशुक्रसतारसहस्रारेष्वानतप्राणतयोरारणाच्युतयोर्नवसु ग्रैवेयकेषु विजयवैजयंतजयंतापरा अप्रवीचाराः
जितेषु सर्वार्थसिद्धौ च ॥१९॥ कथमेषां सौधर्मादिशब्दानां कल्पाभिधानं चातुरर्थिकेनाणा स्वभावतो वा तीताः देवा ते ३
कल्पस्याभिधानं भवति अथ कथमिंद्राभिधानं स्वभावतः तदस्मिन्नस्तीत्यण् तत्कल्पसाहचर्यात्
साहचर्यात् तत्कथमिति चेदुच्यते सुधर्मा नाम सभा सास्मिन्नस्तीति सौधर्मः कल्पः १

इंद्रोपि सौधर्मः ई शानो नाम इंद्रः स्वभावतः ईशानस्य निवास कल्पः ऐशानः तस्य निवासः इत्यण्
तत्साहचर्यादिंद्रोपि ऐशानः सनत्कुमार[redacted]: स्वभावतः तस्य निवासः इत्यण् सानत्कुमारः कल्पः तत्सा
हचर्यादिंद्रोपि सानत्कुमारः माहेंद्रो नाम इंद्रः स्वभावतः तस्यैव निवास कल्पो माहेंद्रः तत्साहचर्यादिंद्रो
पि माहेंद्रः एवमुत्तरत्रापि योज्यं आगमापेक्षया व्यवस्था भवतीति उपर्युपरीत्यनेन द्वयोर्द्वयोरभिसंबं
धो वेदितव्यः प्रथमौ सौधर्मैशानकल्पौ तयोरुपरि सानत्कुमारमाहेंद्रौ तयोरुपरि ब्रह्मलोकब्रह्मोत्तरौ
तयोरुपरि लांतवकापिष्टौ तयोरुपरि शुक्रमहाशुक्रौ तयोरुपरि सतारसहस्रारौ तयोरुपरि आनत
५२ प्राणतौ तयोरुपरि आरणाच्युतौ अध उपरि च प्रत्येकमिंद्रसंबंधो वेदितव्यः मध्ये तु प्रतिद्वयं सौधर्मैशा
नसानत्कुमारमाहेंद्राणां चतुर्णां चत्वार इंद्राः ब्रह्मलोकब्रह्मोत्तरयोरेकः ब्रह्मो नाम लांतवकापिष्टयोरेको
लांतवाख्यः शुक्रमहाशुक्रयोरेकः शुक्रसंज्ञः सतारसहस्रारयोरेकः सतारनामा आनतप्राणतारणाच्युतानां

५७ चतुर्णां चत्वारः एवं कल्पवासिनां द्वादश इंद्रा भवंति जंबूद्वीपे महामंदरो योजनसहस्रावगाहो नवनवति
योजनसहस्रोच्छ्रायस्तस्य अधस्ताद् अधोलोकः बाहुल्येन तत्प्रमाणस्तिर्यक्प्रसृतस्तिर्यग्लोकः [redacted]स्तस्योपरिष्टात् ऊर्द्ध्वलोकः मेरुचूलिका चत्वारिंशद्योजनोच्छ्रायस्तस्या उपरि केशांतरमात्रे व्यव-
कं४ स्थितमृजुविमानमिंद्रकं सौधर्मस्य सर्वमन्यल्लोकानुयोगाद्वेदितव्यं नवसु ग्रैवेयकेषु इति नवशब्दस्य पृ-
थग्वचनं किमर्थं अन्यान्यपि नव विमानानि अनुदिशसंज्ञकानि संतीति ज्ञापनार्थं तेनानुदिशानां ग्र-
हणं वेदितव्यं एषामधिकृतानां वैमानिकानां परस्परतो विशेषप्रतिपत्त्यर्थमाह छ स्थितिप्रभाव-
सुखद्युतिलेश्याविशुद्धींद्रियावधिविषयतोऽधिकाः २० स्वोपात्तस्यायुषः उदयात्तस्मिन् भवे शरीरे-
णसहावस्थानं स्थितिः शापानुग्रहशक्तिः प्रभावः सुखमिंद्रियार्थानुभवः शरीरवसनाभरणादिदीप्तिर्द्यु- ५०
तिः लेश्याः उक्ता लेश्याया विशुद्धिः इंद्रियाणामवधेश्च विषयाः इंद्रियावधिविषयाः तेभ्यस्तेभ्योऽधिका

लेश्याविशुद्धिः १

इति तस्मिन्नुपर्युपरि प्रतिकल्पं प्रतिप्रस्तारं च वैमानिकाः स्थित्यादिभिरधिका इत्यर्थः यथा स्थित्यादि-
भिरुपर्युपरि अधिकाः एवं गत्यादिभिरपीत्यतिप्रसंगे तन्निवृत्त्यर्थमाह छ गतिशरीरपरिग्रहाभिमान-
तो हीनाः २१ देशाद्देशांतरप्राप्तिहेतुर्गतिः शरीरं वैक्रियकमुक्तं लोभकषायोदयाद्विषयेषु संगः परि-
ग्रहः मानकषायादुत्पन्नोऽहंकारः अभिमानः एतैर्गत्यादिभिरुपर्युपरि हीनाः देशांतरविषयक्रीडार-
तिप्रकर्षाभावात् उपर्युपरि गतिहीनाः शरीरं सौधर्मैशानयोर्देवानां सप्तरत्निप्रमाणं सनत्कुमारमाहे-
द्रयोः षड्रत्निप्रमाणं ब्रह्मलोकब्रह्मोत्तरलांतवकापिष्टेषु पंचारत्निप्रमाणं आनतप्राणतयोरर्द्धचतुर्था-
रत्निप्रमाणं आरणाच्युतयोस्त्र्यरत्निप्रमाणं अधोग्रैवेयकेषु अर्द्धतृतीयारत्निप्रमाणं अनुत्तरेष्वर-
त्निप्रमाणं परिग्रहश्च विमानपरिच्छदादिः उपर्युपरि हीनः अभिमानश्च उपर्युपरि तनुकषायत्वाद्धी-
नः पुरस्तात् त्रिषु निकायेषु देवानां लेश्याविधिरुक्तः इदानीं वैमानिकेषु लेश्याविधिप्रतिपत्त्यर्थमाह

भवनवास्यादिषु ना: १ महाशुक्रशतारसहस्रारेषु चतुररत्निप्रमाणं ४

मध्यमग्रैवेयकेषु रत्निद्वयप्रमाणं उपरिमग्रैवेयकेषु अनुदिशाविमानेषु चाध्यर्द्धरत्निप्रमाणं

९१

पीतपद्मशुक्लेश्या द्वित्रिशेषेषु ॥२३॥ पीताच पद्माच शुक्लाश्च ताः पीतपद्मशुक्लाः लेश्या येषांते पी
तपद्मशुक्लेश्या कथं ह्रस्वत्वं औत्तरपादिकं यथा द्रुतायां तपरकरणे मध्यमविलंबितयोरुपसं
ख्यानमिति अथवा पीतश्च पद्मश्च शुक्लश्च पीतपद्मशुक्लाः वर्णवंतोऽर्थाः तेषामिव लेश्या येषांते
पीतपद्मशुक्लेश्याः तत्र कस्य का लेश्येत्युच्यते सौधर्मैशानयोः पीत लेश्या सनत्कुमारमाहें
योः पीतपद्मलेश्याः ब्रह्मलोकब्रह्मोत्तरलांतवकापिष्टेषु पद्मलेश्याः [redacted] सतारसहस्रारेषु पद्मशुक्लेश्याः आनतादिषु शुक्लेश्याः तत्राप्यनुदिशा
नुत्तरेषु परमशुक्लेश्या सूत्रेनभिहितं कथं मिश्रग्रहणं साहचर्यात् लोकवत् तद्यथा छत्रिणो
गच्छंतीति अछत्रिषु छत्रिव्यवहारः एवमिहापि मिश्रयोरन्यतरग्रहणं भवति अयमर्थः सूत्रतः क
थं गम्यत इति चेदुच्यते एवमभिसंबंधः क्रियते द्वयोः कल्पयुगलयोः पीतलेश्याः सनत्कुमारमाहें

मध्यमांश शुक्रमहाशुक्रेषु ५

९१

मध्यमांशाः ५ त्रयोदशस्थानेषु ४

द्रयोः पद्मलेश्याः अविवक्षातः ब्रह्मलोकादिषु त्रिषु कल्पयुगलेषु पद्मलेश्या शुक्रमहाशुक्रयोः शुक्लले
श्याया अविवक्षातः शेषेषु सतारादिषु शुक्लेश्या पद्मलेश्यायाः अविवक्षात इति नास्ति दोषः आह
कल्पोपपन्ना इत्युक्तं तवेदं न ज्ञायते के कल्पा इत्यत्रोच्यते प्राग्ग्रैवेयकेभ्यः कल्पाः ॥२३॥ इदं न
ज्ञायते ऽत्र आरभ्य कल्पा भवंति सौधर्मादिग्रहणमनुवर्त्तते तेनायमर्थो लभ्यते सौधर्मादयः प्रा
ग्ग्रैवेयकेभ्यः कल्पा इति पारिशेष्यादितिरे कल्पातीता इति लोकांतिका देवा वैमानिकाः संतः क्व गृह्यं
ते कल्पोपपन्नेषु कथमिति चेदुच्यते ब्रह्मलोकालया लोकांतिकाः ॥२४॥ एत्य तस्मिन्लीयंत इत्याल
यः आवासो ब्रह्मलोकालयो येषां ते ब्रह्मलोकालयाः लोकांतिकाः देवाः वेदितव्याः यद्येवं सर्वेषां ब्र
ह्मलोकालयानां देवानां लोकांतिकत्वप्रसक्तं अन्वर्थसंज्ञाग्रहणाददोषः ब्रह्मलोको लोकः तस्यां
तो लोकांतः तस्मिन्भवा लोकांतिका इति न सर्वेषां ग्रहणं तेषां हि विमानानि ब्रह्मलोकस्यांतेषु स्थिताः

९२ नि अथवा जन्मजरामरणाकीर्णो लोकः संसारः तस्यांतो लोकांतः लोकांते भवा लौकांतिकास्ते सर्वे परीत
संसाराः ततश्च्युता एकं गर्भवासं प्राप्य परिनिर्वास्यंतीति तेषां सामान्येनोपदिष्टानां भेदप्रदर्शनार्थमा
हः सारस्वतादित्यवह्न्यरुणगर्दतोयतुषिताव्याबाधारिष्टाश्च॥२५॥ क्व इमे सारस्वतादयः अष्टास्वपि
वि दि- ५ पूर्वोत्तरादिषु दिक्षु यथाक्रममेते सारस्वतादयो देवगणा वेदितव्याः तद्यथा पूर्वोत्तरकोणे सारस्वत
विमानं पूर्वस्यां दिशि आदित्यविमानं पूर्वे दक्षिणस्यां दिशि वह्निविमानं दक्षिणस्यां दिसि अरुण
विमानं दक्षिणापरकोणे गर्दतोयविमानं अपरस्यां दिसि तुषितविमानं उत्तरापरस्यां दिशि अव्याबा
धविमानं उत्तरस्यां दिसि अरिष्टविमानं च आ च शब्दसमुच्चितास्तेषामंतरेषु द्वौ द्वौ देवगणौ तद्यथा सारस्व
तादित्यांतरे अग्न्याभसूर्याभाः आदित्यस्य च वह्नेश्चांतरे चंद्राभसत्याभाः वह्न्यरुणांतराले श्रेयस्करक्षेमं
कराः अरुणगर्दतोयांतरे वृषभेष्टकामचराः गर्दतोयतुषितमध्ये निर्माणरजोदिगंतरक्षिताः तुषिता ९२

व्याबाधमध्ये आत्मरक्षितसर्वरक्षिताः अव्याबाधारिष्टांतराले मरुद्वसवः अरिष्टसारस्वतांतरे अश्व
विश्वाः सर्वे एते स्वतंत्राः हीनाधिकत्वाभावात् विषयरतिविरहात् देवर्षयः इतरेषां देवानामर्चनीयाः
चतुर्दशपूर्वधरा तीर्थकरनिःक्रमणप्रतिबोधनपरा वेदितव्याः आह उक्ता लौकांतिकाः ततश्च्युत्वा
एकं गर्भवासमवाप्य निर्वास्यंतीत्युक्ताः किमेवमन्येष्वपि निर्वाणप्राप्तिकालविभागो विद्यते इत्यत
आह विजयादिषु द्विचरमाः॥२६॥ आदिशब्दः प्रकारार्थे वर्त्तते तेन विजयवैजयंतापराजितानुदि
शविमानानामिष्टानां ग्रहणं सिद्धं भवति कः पुनरत्र प्रकारः अहमिंद्रत्वे सति सम्यग्दृष्ट्युपपादः सर्वा
र्थसिद्धिप्रसंग इति चेत् न तेषां परमोत्कृष्टत्वात् अन्वर्थसंज्ञातः एकचरमत्वसिद्धेः चरमत्वं देहस्य
मनुष्यभवापेक्षया द्वौ चरमौ देहौ येषां ते द्विचरमाः विजयादिभ्यश्च्युताः अप्रतिपतितसम्यक्त्वा म
नुष्येषूत्पद्य संयममाराध्य पुनर्विजयादिषूत्पद्य ततश्च्युताः पुनर्मनुष्यभवमवाप्य सिध्यंतीति द्विच

मदेहत्वं आह जीवस्यौदयिकेषु भावेषु तिर्यग्योनिगतिरौदयिकी व्याख्याता पुनश्च स्थितौ तिर्यग्योनिजानां
चेति तत्र न ज्ञायते के तिर्यग्योनयः अपपादिकमनुष्येभ्यः शेषास्तिर्यग्योनयः ॥२७॥ अपपादिका उ
क्ताः देवनारकाः मनुष्याश्च निर्दिष्टाः प्राङ्मानुषोत्तरान्मनुष्या इति एभ्योऽन्ये संसारिणो जीवाः शेषास्ते
तिर्यग्योनयो वेदितव्याः एषां तिरश्चां देवादीनामिव क्षेत्रविभागः पुनर्निर्दिष्टव्यः सर्वलोकव्यापित्वा
त्तेषां क्षेत्रविभागो नोक्तः आह स्थितिरुक्ता नारकाणां मनुष्याणां तिरश्चां च देवानां नोक्ता तस्यां वक्त
व्यायां आदावुद्दिष्टानां भवनवासिनां स्थितिप्रतिपादनार्थमाह स्थितिरसुरनागसुवर्णद्वीपशेषाणां
सागरोपमत्रिपल्योपमार्धहीनमिता ॥२८॥ असुरादीनां सागरोपमादिभिर्यथाक्रमं अत्राभिसंबंधो वे
दितव्यः इयं स्थितिरुत्कृष्टा जघन्या पुरस्ताद्वक्ष्यते तद्यथा असुराणां सागरोपमं स्थितिः नागानां त्रि
पल्योपमानि स्थितिः सुपर्णानामर्धतृतीयानि द्वीपानां द्वे शेषाणां अध्यर्धपल्योपमं आद्यदेवनिकाय ९३

वैमानिकेषु २

स्थित्यभिधानादनंतरं व्यंतरज्योतिष्कस्थितिवचने क्रमप्राप्ते सति तदुल्लंघ्य वैमानिकानां स्थितिरुच्यते कु
तस्तयोरुल्लंघनमुत्तरत्र लघुनोपायेन स्थितिवचनात् तेषु चादावुद्दिष्टयोः कल्पयोः स्थितिविधानार्थमा
ह सौधर्मैशानयोस्सागरोपमे अधिके ॥२९॥ इति द्विवचननिर्देशात् द्वित्वगतिः अधिके इत्ययमधिका
रः आकृत आसहस्रारात् इदं तु कुतो ज्ञायते उत्तरत्र तुशब्दग्रहणात् तेन सौधर्मैशानयोर्देवानां द्वे सा
गरोपमे सातिरेके प्रत्येतव्ये तयोरुत्तरयोः स्थितिविशेषप्रतिपत्त्यर्थमाह सनत्कुमारमाहेंद्रयोः सप्त ॥३०॥
अनयोः कल्पयोर्देवानां सप्त सागरोपमाणि साधिकानि उत्कृष्टा स्थितिः ब्रह्मलोकादिषु क्रमात् प्रत्ये
कमेकैकामधिकमिति ज्ञापनार्थं इतरं व सानेषु विशेषप्रतिपत्त्यर्थमाह त्रिसप्तनवैकादशत्रयोदशपं
चदशभिरधिकानि तु ॥३१॥ सप्तग्रहणं प्रकृतं तस्येह आदिभिर्निर्दिष्टैरभिसंबंधो वेदितव्यः सप्त त्रिभिर
धिकानि सप्त सप्तभिरधिकानीत्यादिर्द्वयोरभिसंबंधो वेदितव्यः तुशब्दो विशेषणार्थः किं विशिनष्टि अधि

DR BHAU DAJI MEMORIAL

७४ कशब्दोनुवर्त्तमानश्चतुर्भिरिहसंबंध्यतेनोनशब्दाभिसंबध्यमर्थोविज्ञायतेतेनायमर्थोभवति ब्रह्मलोक
ब्रह्मोत्तरयोर्दशसागरोपमानिसाधिकानि लांतवकापिष्टयोश्चतुर्दशसागरोपमानिसाधिकानि शुक्रम
हाशुक्रयोः षोडशसागरोपमानिसाधिकानि सतारसहस्रारयोरष्टादशसागरोपमानिसाधिकानि आ
नतप्राणतयो[illegible]विंशतिसागरोपमानि आरणाच्युतयोर्द्वाविंशतिसागरोपमानि ततः ऊर्ध्वं विशेष ६।४
प्रतिपत्त्यर्थमाह आरणाच्युतादूर्ध्वमेकैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धौ च ॥३२॥ अधि
कग्रहणमनुवर्त्ततेतेनेहसंबंधोवेदितव्यः एकैकेनाधिकानीति नवग्रहणं किमर्थं प्रत्येकमेकैकमधि
कमितिज्ञापनार्थं इतरथाहिग्रैवेयकेषुएकमेवाधिकंस्यात् विजयादिष्विति आदिशब्दस्यप्रकारार्थत्वात्
अनुदिशानामपिग्रहणं सर्वार्थसिद्धेः पृथक्ग्रहणंजघन्याभावप्रतिपादनार्थं तेनायमर्थः अधोग्रैवेय
केषुप्रथमेत्रयोविंशतिः द्वितीयेचतुर्विंशतिस्तृतीयेपंचविंशतिः मध्यमग्रैवेयकेषुप्रथमेषड्विंशतिः ७४

द्वितीयेसप्तविंशतिः उपरिमग्रैवेयकेषुप्रथमेएकोनत्रिंशत् द्वितीयेत्रिंशत् तृतीयेएकत्रिंशत् अनुदि
शविमानेषुद्वात्रिंशत् विजयादिषुत्रयस्त्रिंशत्सागरोपमाण्युत्कृष्टास्थितिः सर्वार्थसिद्धेत्रयस्त्रिंशदेवे
ति निर्दिष्टोत्कृष्टस्थितिकेषुदेवेषुजघन्यस्थितिप्रतिपादनार्थमाह अपरापल्योपममधिकं ॥३३॥ पल्योप
मंव्याख्यातं अपराजघन्यास्थितिःपल्योपमंसाधिकं केषांसौधर्मैशानीयानां कथंगम्यतेपरतः परतइत्यु
त्तरत्रवक्ष्यमाणत्वात् ततः ऊर्ध्वंजघन्यस्थितिप्रतिपादनार्थमाह परतःपरतःपूर्वापूर्वानंतराः ॥३४॥ पर
स्मिन्देशेपरतः वीप्सायांद्वित्वं पूर्वशब्दस्यापि अधिकग्रहणमनुवर्त्ततेतेनैवमभिसंबंधः क्रियते सौध
र्मैशानयोर्द्वेसागरोपमेसाधिके उक्तेतेसाधिके सनत्कुमारमाहेंद्रयोर्जघन्यास्थितिः सनत्कुमारमाहें
द्रयोःपरास्थितिः सप्तसागरोपमाणिसाधिकानितानिसाधिकानिब्रह्मब्रह्मोत्तरयोर्जघन्यास्थितिरित्या
दि नारकाणामुत्कृष्टास्थितिरुक्ताजघन्यासूत्रेनुपात्ता तामपिलघुनोपायेनप्रतिपादयितुमिच्छन्नाह

९५ नारकाणां द्वितीयादिषु ॥३५॥ चशब्दः किमर्थः प्रकृतसमुच्चयार्थः किंच प्रकृतं परतः परतः पूर्वानंतरा अ
पराः स्थितिरिति तेनायमर्थो लभ्यते रत्नप्रभायां नारकाणां परा स्थितिरेकं सागरोपमं सा शर्कराप्रभायां ज
घन्या शर्कराप्रभायां उत्कृष्टा स्थितिस्त्रीणि सागरोपमानि सा वालुकाप्रभायां जघन्येत्यादि छ एवं द्वि
तीयादिषु जघन्या स्थितिरुक्ता प्रथमायां का जघन्येति तत्प्रदर्शनार्थमाह दशवर्षसहस्राणि प्रथमायां
॥३६॥ अपरा स्थितिरित्यनुवर्त्तते अथ भवनवासिनां का जघन्या स्थितिरित्यत आह छ भवनेषु च ॥३७॥
चशब्दः किमर्थः प्रकृतसमुच्चयार्थः तेन भवनवासिनां अपरा स्थितिर्दशवर्षसहस्राणीत्यभिसंबध्यते
व्यंतराणां तर्हि का जघन्या स्थितिरित्यत आह व्यंतराणां च ॥३८॥ छ ॥ चशब्दः प्रकृतसमुच्चयार्थः तेन व्यंत
राणामपरा स्थितिर्दशवर्षसहस्राणीत्यवगम्यते अथैषां परा स्थितिः केत्यत्रोच्यते परा पल्योपममधिकं
॥३९॥ छ ॥ परा उत्कृष्टा स्थितिर्व्यंतराणां पल्योपममधिकं इदानीं ज्योतिष्काणां परा स्थितिर्वक्तव्येत्यत आ ९५

ह ज्योतिष्काणां च ॥४०॥ चशब्दः प्रकृतसमुच्चयार्थः तेनैवमभिसंबंधः ज्योतिष्काणां परा स्थितिः पल्योपम
मधिकमिति अथवापरा कियतीत्यत आह तदष्टभागोऽपरा ॥४१॥ तस्य पल्योपमस्याष्टभागो ज्योतिष्काणा
मपरा स्थितिरित्यर्थः छ अथ लौकांतिकानां विशेषोक्तानां स्थितिविशेषो नोक्तः स कियानिति लौकांति
कानामष्टौ सागरोपमाणि सर्वेषां ॥४२॥ छ ॥ अविशिष्टाः सर्वे ते शुक्ललेश्याः पंचहस्तोत्सेधशरीराः
चतुर्णिकायदेवानां स्थानं भेदाः सुखादिकं परापरस्थितिर्लेश्यानुयीध्याये निरूपितं छ इति तत्वार्थ
वृत्तौ सर्वार्थसिद्धिसंज्ञिकायां चतुर्थोध्यायः समाप्तः ॥४॥ छ ॥ इदानीं सम्यग्दर्शनस्य विषयभावेनो
पक्षिप्तेषु जीवादिषु जीवपदार्थो व्याख्यातः अथाजीवपदार्थो विचारप्राप्तः तस्य संज्ञाभेदकीर्तनार्थमिद
मुच्यते ॥ छ ॥ ॥ अजीवकाया धर्माधर्माकाशपुद्गलाः ॥१॥ कायशब्दः शरीरे व्युत्पादितः इहोपचा
राद्ध्यारोप्यते कुतः उपचारः यथा शरीरं पुद्गलद्रव्यप्रचयात्मकं तथा धर्मादिष्वपि प्रदेशप्रचयापेक्ष

ननचअसंख्येयाः प्रदेशाः धर्म धर्मैकजीवानामिति ननन प्रदेशबहुत्वं विज्ञापितं ×३

९८ या कायाइव कायाइति अजीवाश्च ते कायाश्च अजीवकायाः विशेषणं विशेष्येण वृत्तिः ननु च नीलोत्प
लादिषु व्यभिचारे सति विशेषणविशेष्ययोगः इहापि व्यभिचारयोगोस्ति अजीवशब्दः अकाये कालेपि वर्त्तते कायो
जीवे किमर्थः कायशब्दः प्रदेशबहुत्वज्ञापनार्थः धर्म्मादीनां प्रदेशबहुत्वं विज्ञापितं सत्यमिदं परं किं
त्वस्मिन्विधौ सति तदवधारणं विज्ञायते असंख्येयाः प्रदेशाः न संख्येया नाप्यनंता इति कालप्रदेशप्र
चयाभावज्ञापनार्थं च इह कायग्रहणं कालो वक्ष्यते अस्य प्रदेशप्रचयप्रतिषेधार्थमिह कायग्रहणं य
थाणोः प्रदेशमात्रत्वात् द्वितीयादयोस्य प्रदेशा न संतीत्यप्रदेशोणुः तथा कालपरमाणुरप्येकप्रदेशत्वा
दप्रदेश इति तेषां धर्म्मादीनामजीव इति सामान्यसंज्ञा जीवलक्षणाभावमुखेन प्रवृत्ता धर्म्माधर्म्माकाश
पुद्गला इति विशेषसंज्ञा सामायिकाः छ अत्राह सर्व्वद्रव्यपर्यायेषु केवलस्येत्येवमादिषु द्रव्याण्युक्ता
नि कानि तानीत्युच्यते द्रव्याणि ॥२॥ यथास्वं पर्यायैर्द्रूयंते द्रवंति वा तानि द्रव्याणि द्रव्यत्वयोगाद्द्रव्यमि ९६

ति चेन्नोभयासिद्धेः यथा दंडदंडिनोर्योगो भवति पृथक्सिद्धयोर्न च तथा द्रव्यद्रव्यत्वे पृथक्सिद्धे स्तः यु
द्यपृथक्सिद्धयोरपि योगः स्यात् आकाशकुसुमस्य प्रकृतिपुरुषद्वितीयशिरसश्च योगः स्यात् इति अ
थ पृथक्सिद्धिरभ्युपगम्यते द्रव्यत्वकल्पना निरर्थिका गुणसमुदायो द्रव्यमिति चेत्तत्रापि गुणानां
समुदायस्य च भेदाभावे तद्व्यपदेशो नोपपद्यते भेदाभ्युपगमे च स एवोक्त एव दोषः ननु गुणान्
द्रवंति गुणैर्वा द्रूयंत इति विग्रहेपि स एव दोष इति चेत् न कथंचिद्भेदाभेदोपपत्तेः तद्व्यपदेशसिद्धिः
भेदेन व्यतिरेकेणानुपलब्धेरभेदः संज्ञालक्षणप्रयोजनादिभेदात् भेद इति प्रकृता धर्म्मादयो वक्ष्यमाणाश्च तत्समा
नाधिकरणत्वाद्बहुवचननिर्देशः स्यादेतत्संख्यानुवृत्तिवत् पुल्लिंगानुवृत्तिरपि प्राप्नोति नैष दोषः आविष्ट
लिंगाः शब्दाः न कदाचिल्लिंगं व्यभिचरंति अतः धर्म्मादयो द्रव्याणि भवंतीति अनंतरत्वाच्चतुर्णामेव द्रव्य
व्यपदेशप्रसंगे अध्यारोपार्थमिदमुच्यते जीवाश्च ॥३॥ जीवशब्दो व्याख्यातार्थः बहुत्वनिर्देशः व्याख्यात

९७ भेदप्रतिपत्त्यर्थः चशब्दः द्रव्यसंज्ञानुकर्षणार्थः जीवाश्च द्रव्याणीति एवमेतानि षट् समासेन कालेन सह षड्
द्रव्याणि भवंति [कुत्र] द्रव्यस्य लक्षणं वक्ष्यते गुणपर्ययवद्द्रव्यमिति तल्लक्षणयोगात् धर्मादीनां द्रव्यव्यपदे
शो भवति नार्थः परिगणनेन परिगणनमवधारणार्थं तेनान्यवादिपरिकल्पितानां पृथिव्यादीनां
निवृत्तिः कृता भवति कथं पृथिव्यप्तेजोवायुमनांसि पुद्गलद्रव्येऽन्तर्भवंति रूपरसगंधस्पर्शवत्त्वात्
वायुमनसो रूपादि योगाभाव इति चेत् न वायुस्तावद्रूपादिमान् स्पर्शवत्त्वात् घटादिवत् चक्षुरादिक
रणग्राह्यत्वाभावात् रूपाद्यभाव इति चेत् परमाण्वादिष्वतिप्रसंगः स्यात् आपो गंधवत्यः स्पर्शवत्त्वा
त् पृथिवीवत् तेजोपि रसगंधवत् रूपवत्त्वात् तद्वदेव मनोपि द्विविधं द्रव्यमनो भावमनश्चेति तत्र
भावमनो ज्ञानं तस्य जीवगुणत्वात् आत्मन्यंतर्भावः द्रव्यमनश्च रूपादियोगात् पुद्गलद्रव्यविका
रो रूपादिमन्मनः ज्ञानोपयोगकारणत्वात् चक्षुरिंद्रियवत् ननु अमूर्त्तेपि शब्दे ज्ञानोपयोगकारण ९७

द्वतिन्वेदर सद्वेषा

त्वदर्शनात् व्यभिचारी हेतुरिति चेत् न तस्य पौद्गलिकत्वात् मूर्तिमत्त्वोपपत्तेः ननु यथा परमाणूनां रूपादि
मत्कार्यत्वदर्शनात् रूपादिमत्त्वं न तथा वायुमनसो रूपादिमत्कार्यं दृश्यते न तेषामपि तदुपपत्तेः सर्वेषां
परमाणूनां सर्वरूपादिमत्कार्यत्वप्राप्तियोग्यताभ्युपगमात् न च केचित् पार्थिवादिजातिविशेषयुक्ताः
परमाणवः संति जातिसंकरेणारंभदर्शनात् दिशोप्याकाशेंतर्भावः आदित्योदयाद्यपेक्षया आका
शप्रदेशपंक्तिषु इतः इदमिति व्यवहारोपपत्तेः उक्तानां द्रव्याणां विशेषप्रतिपत्त्यर्थमाह नित्यावस्थि
तान्यरूपाणि ॥४॥ नित्यध्रुवमित्यर्थः निध्रुवे नित्य इति निष्पादितत्वात् धर्मादीनि द्रव्याणि गतिहे
तुत्वादिविशेषलक्षणद्रव्यार्थादेशात् अस्तित्वादिसामान्यलक्षणद्रव्यार्थादेशाच्च कदापि न व्ययंतीति
ति नित्यानि वक्ष्यते हि तद्भावाव्ययं नित्यमिति इयत्ताव्यभिचारादवस्थितानि धर्मादीनि षडपि द्रव्याणि
कदाचिदपि षडिति इयत्त्वं नातिवर्त्तंते ततोऽवस्थितानीत्युच्यंते न विद्यते रूपं येषां इत्यरूपाणि रूपप्र

त्यनयतोऽ द्रव्यनयविवक्षया [illegible] रूपतया ह्यरूपत्वं

९८ तिषेधेतस्माद्द्वारिणांरसादीनामपिप्रतिषेधः तेनअरूपाणिमूर्त्तानीत्यर्थः यथासर्वेषांद्रव्याणांनित्याव
स्थितानीत्येतत्साधारणंलक्षणंप्राप्तंतथापुद्गलानामपिअरूपित्वमपिप्राप्तं अतस्तदपवादार्थमाह
रूपिणःपुद्गलाः॥५॥रूपंमूर्त्तिरित्यर्थः कामूर्त्तिः रूपासंस्थानपरिणामोमूर्त्तिः रूपमेषामस्तीतिरूपिणः
मूर्त्तिमंतइत्यर्थः अथवा रूपमितिगुणविशेषवचनशब्दः तेषामस्तीतिरूपिणः रूपाद्यग्रहणमि
तिचेन्नतदविनाभावःपुद्गलाः इतिबहुवचनंभेदप्रतिपादनार्थंभिन्नाहिपुद्गलाः स्कंधपरमाणुभेदा
त्तद्विकल्पः उपरिष्टाद्वक्ष्यते यदिप्रधानवदरूपत्वमेकत्वंचेष्टंस्यात् विश्वरूपकार्यदर्शनविरोधःस्या
त् आहकिंपुद्गलवत् धर्म्मादीन्यपिद्रव्याणिप्रत्येकंभिन्नानीत्यत्रोच्यते आआकाशादेकद्रव्याणि ६
आङयमभिविध्यर्थः सौत्रीमानुपूर्वीमाश्रित्येतदुक्तं तेनधर्म्माधर्म्माकाशानिगृह्यंते एकशब्दःसंख्या
वचनः तेनद्रव्यंविशेष्यते एकंद्रव्यंएकद्रव्यमिति यद्येवंबहुवचनमयुक्तं धर्म्माद्यपेक्षयाबहुत्वसि ९८

द्धिर्भवति एकस्यानेकार्थप्रत्यायनशक्तियोगात् एकैकमित्यस्तु लघुत्वात् द्रव्यग्रहणमनर्थकं तत्क्रि
यतेद्रव्यापेक्षया एकत्वख्यापनार्थं द्रव्यग्रहणंक्षेत्रभावापेक्षयाअसंख्येयत्वानंतत्वविकल्पस्येष्टत्वा
त् नजीवपुद्गलवदेषांबहुत्वमित्येतदनेन ख्याप्यते अधिकृतानामेवएकद्रव्याणांविशेषप्रतिपत्यर्थ
मिदमुच्यते निःक्रियाणिच॥७॥छ॥उभयनिमित्तवशादुत्पद्यमानःपर्यायोद्रव्यस्यदेशांतरप्राप्तिहेतुः
क्रियातस्याःनिःक्रांतानिनिःक्रियाणि अत्रचोद्यते धर्म्मादीनिद्रव्याणियदिनिष्क्रियाणिततस्तेषामु
त्पादोनभवेत् क्रियापूर्वकोहिघटादीनांउत्पादोदृष्टः उत्पादाभावाच्चव्ययाभावइति अतःसर्वद्रव्या
णामुत्पादादित्रितयकल्पनाव्याघातइति तन्न किंकारणमन्यथोपपत्तेः क्रियानिमित्तोत्पादाभावेप्येषांध
र्म्मादीनांअन्यथाप्युत्पादःकल्प्यते तद्यथा द्विविधःउत्पादः स्वनिमित्तःपरप्रत्ययश्च स्वनिमित्तस्ताव
दनंतानंतानांअगुरुलघुगुणानांआगमप्रमाणादभ्युपगम्यमानानांषट्स्थानपतितयावृद्ध्याहान्याच

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

९९ प्रवर्त्तमानानां स्वभावादेतेषामुत्पादः व्ययश्च। परप्रत्ययोपि अश्वादिगतिस्थित्यवगाहनहेतुत्वात् क्षणे
क्षणे तेषां भेदात् तद्धेतुत्वमपि भिन्नमिति परप्रत्ययापेक्ष उत्पादो विनाशश्च व्यवह्रियते ननु यदि निःक्रि
याणि धर्म्मादीनि जीवपुद्गलानां गत्यादिहेतुत्वं नोपपद्यते जलादीनि क्रियावंति मत्स्यादीनां गत्यादिनि
मित्तानि दृष्टानीति नैष दोषः बलाधाननिमित्तत्वाच्चक्षुर्वत् यथा रूपोपलब्धौ चक्षुर्निमित्तमिति न व्याक्षिप्त मित्त
मनस्कस्यापि भवति अधिकृतानां धर्म्माधर्म्माकाशानां निःक्रियत्वेऽभ्युपगते जीवपुद्गलानां सक्रियत्व
मर्थादापन्नं कालस्यापि सक्रियत्वमिति चेत् नानधिकारात् अत एवासावेतैः सह नाधिक्रियते अजीव
धा काय इत्यत्र कायग्रहणेन प्रदेशास्तित्वमात्रं निर्ज्ञातं न त्वियत्तावधारितास्तेषां प्रदेशा अतस्तन्निर्धारणा
र्थमिदमुच्यते असंख्येयाः प्रदेशा धर्म्माधर्म्मैकजीवानां ॥८॥ संख्यामतीता असंख्येयाः असंख्ये
यस्त्रिविधः जघन्यः उत्कृष्टः अजघन्योत्कृष्टश्चेति तत्रेहाजघन्योत्कृष्टासंख्येयः परिगृह्यते प्रदि ९९

श्यत इति प्रदेशाः वक्ष्यमाणलक्षणः परमाणुः स यावति क्षेत्रेऽवतिष्ठते स प्रदेश इति व्यवह्रियते ध
र्म्माधर्म्मैकजीवास्तुल्यासंख्येयप्रदेशाः तत्र धर्म्माधर्म्मौ निष्क्रियौ लोकाकाशं व्याप्य स्थितौ जीवस्ता
वत्प्रदेशोपि सन् संहरणविसर्प्पस्वभावत्वात् कर्म्मनिर्वर्तितं शरीरमणुमहद्वाधितिष्ठंस्तावदव
गाह्य वर्त्तते यदा तु लोकपूरणं भवति तदा मंदरस्याधः चित्रवज्रपटलमध्ये जीवस्याष्टौ मध्यप्रदेशा
अवतिष्ठते इतरे प्रदेशाः ऊर्द्धमधस्तिर्यक् कृत्स्नं लोकाकाशं व्यश्नुवते ॥ अथाकाशस्य कति
प्रदेशाः इत्यत आह आकाशस्यानंताः ॥९॥ अविद्यमानोऽन्तो येषां ते अनंताः के प्रदेशाः कस्य आका
शस्य पूर्ववदस्यापि प्रदेशकल्पना अवसेया उक्तममूर्त्तानां प्रदेशपरिमाणं इदानीं मूर्त्तानां पुद्गला
नां प्रदेशपरिमाणं निर्ज्ञातव्यमिति अत आह संख्येयासंख्येयाश्च पुद्गलानां ॥१०॥ चशब्दादनंताश्चेत्यनुक्र
ष्यते कस्यचित्पुद्गलद्रव्यस्य द्व्यणुकादेः संख्येयाः प्रदेशाः कस्यचिदसंख्येया अनंताश्च अनंतानंता

१०० प्रसंख्यानमिति चेन्नानंतसामान्यात् अनंतप्रमाणं त्रिविधमुक्तं परीतानंतं युक्तानंतं अनंतानंतं चेति तत्स
र्वमनंतसामान्येन गृह्यते स्यादेतत् असंख्यातप्रदेशो लोकः अनंतप्रदेशस्यानंतानंतप्रदेशस्य च स्कं
धस्याधिकरणमिति विरोधः ततो नानंत्यमिति नैष दोषः सूक्ष्मपरिणामावगाहनशक्तियोगात् परमा
णवादयो हि सूक्ष्मभावेन परिणताः एकैकस्मिन्नपि आकाशप्रदेशेऽनंतानंता अवतिष्ठंते अवगाह
नशक्तिश्चैषामव्याहतास्ति तस्मादेकस्मिन्नपि प्रदेशेऽनंतानंतानामवस्थानं न विरुध्यते पुद्गलाना
मित्यविशेषवचनात् परमाणोरपि प्रदेशवत्त्वप्रसंगे तत्प्रतिषेधार्थमाह नाणोः ॥११॥ अणोः प्रदेशा
न संतीति वाक्यशेषः कुतो न संतीति चेत् प्रदेशमात्रत्वात् यथाकाशप्रदेशस्यैकस्य प्रदेशभेदाभावा
त् अप्रदेशत्वं एवमणोरपि प्रदेशमात्रत्वात् प्रदेशभेदाभावः किंच ततोऽल्पपरिमाणाभावात् न ह्य
णोरल्पीयानन्योऽस्ति यतोऽस्य प्रदेशा भिद्येरन् एषामवधृतप्रदेशानां धर्म्मादीनामाधारप्रतिपत्त्यर्थमि १००

मिदमुच्यते लोकाकाशेऽवगाहः ॥१२॥ उक्तानां धर्म्मादीनां द्रव्याणां लोकाकाशेऽवगाहो न बहिरित्यर्थः य
दि धर्म्मादीनां लोकाकाशमाधारः आकाशस्य क आधार इति आकाशस्य नास्त्यन्य आधारः स्वप्रति
ष्ठमाकाशं यद्याकाशं स्वप्रतिष्ठं धर्म्मादीन्यपि स्वप्रतिष्ठान्येव अथ धर्म्मादीनामन्य आधारः कल्प्यते आ
काशस्याप्यन्यः आधारः कल्प्यः तथा सत्यनवस्थाप्रसंग इति नैष दोषः नाकाशादन्यदधिकपरिमा
णं द्रव्यमस्ति यत्राकाशं स्थितमित्युच्यते सर्वतोऽनंतं हि तत् धर्म्मादीनां पुनरधिकरणमाकाशमित्युच्य
ते व्यवहारनयवशात् एवंभूतनयापेक्षया तु सर्वाणि द्रव्याणि स्वप्रतिष्ठान्येव तथा चोक्तं क्व भवाना
स्ते आत्मनीति धर्म्मादीनि लोकाकाशान्न बहिः संतीति एतावत् अत्र आधाराधेयकल्पनासाध्यं फलं
ननु च लोके पूर्वोत्तरकालभाविनामाधाराधेयभावो दृष्टः यथा कुंडे बदरादीनां न तथाकाशं पूर्वं धर्म्मा
दीन्युत्तरकालभावीनि अतो व्यवहारनयापेक्षयापि आधाराधेयकल्पनाऽनुपपत्तिरिति नैष दोषः

युगपद्भाविनामपि आधाराधेयभावो दृष्टः यतो घटे रूपादयः शरीरे हस्तादय इति लोक इत्युच्यते को लोकः
धर्माधर्मादीनि द्रव्याणि यत्र लोक्यंते स लोक इति अधिकरणसाधने घञ् आकाशं द्विधा विभक्तं लोका
काशमलोकाकाशं चेति लोक उक्तस्य यत्र स लोकाकाशं ततो बहिः सर्वतोऽनंतमलोकाकाशं लोकविभा
गश्च धर्माधर्मास्तिकायसद्भावात् विज्ञेयः असति हि तस्मिन् धर्मास्तिकाये जीवपुद्गलानां गतिनिय
महेत्वभावात् विभागो न स्यात् असति च अधर्मास्तिकाये स्थितेराश्रयनिमित्ताभावात् स्थितेरभावो लो
कालोकविभागाभावो स्यात् तस्माद् उभयसद्भावाल्लोकालोकविभावसिद्धिः छ तत्राधियमाणानां अ
वस्थानभेदसंभवात् विशेषप्रतिपत्त्यर्थमाह धर्माधर्मयोः कृत्स्ने ॥१३॥ कृत्स्नवचनमशेषव्याप्तिप्र
दर्शनार्थं अगारे उत्थितो घट इति यथा तथा धर्माधर्मयोर्लोकाकाशेऽवगाहो न भवति किं तर्हि कृत्स्ने
तिलेषु तैलवदिति अन्योन्यप्रदेशप्रवेशव्याघाताभावोऽवगाहनशक्तियोगात् वेदितव्यः अतो विपरी १०१

तानां मूर्त्तिमतां एकप्रदेशासंख्येयासंख्येयाऽनंतप्रदेशानां पुद्गलानां अवगाहविशेषप्रतिपत्त्यर्थमाह
एकप्रदेशादिषु भाज्यः पुद्गलानां ॥१४॥ एकः प्रदेशः एकप्रदेशः एकप्रदेश आदिर्येषां त इमे एक
प्रदेशादयः तेषु पुद्गलानामवगाहो भाज्यो विकल्प्यः अवयवेन विग्रहस्समुदयः समासार्थ इति एक
प्रदेशोऽपि गृह्यते तद्यथा एकस्मिन्नाकाशप्रदेशे परमाणोरवगाहः द्वयोरेकत्रोभयत्र च बद्धयोरबद्ध
योश्च त्रयाणामप्येकत्र द्वयोस्त्रिषु च बद्धानां अबद्धानां च एवं संख्येयासंख्येयप्रदेशानां स्कंधानामेक
संख्येयासंख्येयप्रदेशेषु लोकाकाशे स्थानं प्रत्येतव्यं ननु युक्तं तावदमूर्त्तयोर्धर्माधर्मयोरेकत्रापि
विरोधेनानवरोध इति मूर्त्तिमतां पुद्गलानां कथमित्यत्रोच्यते अवगाहनस्वभावत्वात् सूक्ष्मपरिणामाच्च
मूर्त्तिमतामप्यवगाहो न विरुध्यते एकापवरके अनेकप्रकाशावस्थानवत् आगमप्रामाण्याच्च तथाप्येवमे
यं उक्कंच उगाढगाढणिचिउ पुग्गलकाएहिं सव्वदो लोगो सुहुमेहिं बादरेहिं अणंताणंतेहिं विविहेहिं १

१०२ अथ जीवानां कथमवगाहनमित्यत्रोच्यते असंख्येयभागादिषु जीवानां ॥१५॥ लोकाकाश इत्यनुवर्त्त
ते तस्यासंख्येयभागीकृतस्य एको भागः असंख्येयभाग इत्युच्यते स आदिर्येषां ते असंख्येयभागादयः
तेषु जीवानामवगाहो वेदितव्यः तद्यथा एकस्मिन्नसंख्येयभागे एको जीवोऽवतिष्ठते एवं द्वित्रिचतुरादि
ष्वपि असंख्येयभागेषु आसर्वलोकादवगाहः प्रत्येतव्यः नानाजीवानां तु सर्वलोक एव यद्येकस्मिन्नऽ
संख्येयभागे एको जीवोऽवतिष्ठते कथं द्रव्यप्रमाणेनानंतानंतो जीवराशिः सशरीरोऽवतिष्ठते लोका
काशे सूक्ष्मबादरभेदादवस्थानं प्रत्येतव्यं बादरास्तावत्सप्रतिघातशरीराः सूक्ष्मास्तु शरीरत्वेपि सू
क्ष्मभावादेवैकनिगोदजीवावगाह्येपि प्रदेशे साधारणशरीराः अनंतानंताः वसंति न ते परस्परेण
बादरैश्च व्याहन्यंत इति नास्त्यवगाहविरोधः अत्राह लोकाकाशतुल्यप्रदेशः एको जीव इत्युक्तं तस्य क
थं लोकस्यासंख्येयभागादिषु वृत्तिः ननु सर्वलोकव्यापिनैव भवितव्यमित्यत्रोच्यते ॥ प्रदेशसंहार १०२

विसर्पाभ्यां प्रदीपवत् १६ अमूर्त्तस्वभावस्यात्मनोऽनादिबंधं प्रत्येकत्वात् कथंचिन्मूर्त्तितां बिभ्रतः का
र्मणशरीरवशान्महदणु च शरीरमधितिष्ठतः तद्वशात्प्रदेशसंहरणविसर्पणस्वभावस्य तावत् प्रमा
णतायां सत्यां असंख्येयभागादिषु वृत्तिरुपपद्यते प्रदीपवत् यथा निरावरणव्योमप्रदेशेऽनवधृतप्रका
शपरिमाणस्य प्रदीपस्य शरावमानिकाऽपवरकाद्यावरणवशात्तत्परिमाणतेति अत्राह धर्मादीनां
अन्योन्यप्रदेशानुप्रवेशात्संकरे सति एकत्वं प्राप्नोतीति तन्न परस्परमत्यंतश्लेषे सत्यपि स्वभावं न
जहति उक्तं च अण्णोण्णं पविसंता दिंता ओगासमण्णमण्णस्स मेलंता वि य णिच्चं सगसब्भावं ण जहंति
॥ यद्येवं धर्मादीनां स्वभावभेद उच्यतामित्यत आह गतिस्थित्युपग्रहौ धर्माधर्मयोरुपकार
१७॥ देशांतरप्राप्तिहेतुर्गतिः तद्विपरीता स्थितिः उपगृह्यत इत्युपग्रहः गतिश्च स्थितिश्च गतिस्थिती
एव उपग्रहौ गतिस्थित्युपग्रहौ धर्माधर्मयोरिति कर्त्तृनिर्देशः उपक्रियत इत्युपकारः कः पुनरसाग

त्युपग्रहः स्थित्युपग्रहश्च यद्येवं द्विवनिर्देशः प्राप्नोति नैष दोषः सामान्येन व्युत्पादितउपात्तसंख्यः शा
१०३ ब्दांतरसंबंधे सत्यपि न पूर्वोपात्तसंख्यां जहाति यथा साधोः कार्यं तपःश्रुते इति एतदुक्तं भवति गति
परिणामिनां जीवपुद्गलानां गत्युपग्रहे कर्त्तव्ये धर्मास्तिकायः साधारणाश्रयः पृथिवीधातुरिवादि
स्थिताविति ननु च उपग्रहवचनमनर्थकमुपकार इत्येवं सिद्धत्वात् गतिस्थिती धर्माधर्मयोरुपका
र इति नैष दोषः यथासंख्यनिवृत्त्यर्थमुपग्रहवचनं धर्माधर्मयोर्गतिस्थित्योश्च यथासंख्यं भवति
यथा एवं जीवपुद्गलानां यथासंख्यं प्राप्नोति धर्मस्योपकारो जीवानां गतिः अधर्मस्योपकारः पुद्गला
नां स्थितिरिति तन्निवृत्त्यर्थमुपग्रहवचनं क्रियते आह धर्माधर्मयोः यः उपकारः स आकाशस्य युक्तः
सर्वगतत्वादिति चेन्न तदयुक्तं तस्यान्योपकारसद्भावात् सर्वेषां धर्मादीनां द्रव्याणामवगाहनं तत्प्रयोज १०३
नं एकस्यानेकप्रयोजनकल्पनायां लोकालोकविभागाभावः भूमिजलादीन्येव तत्प्रयोजनसमर्थानि ना

र्थो धर्माधर्माभ्यामिति चेन्न साधारणाश्रय इति विशेष्योक्तत्वात्नाप्रेरकत्वात् अनुपलब्धेर्नतौ स्तः
खरविषाणवदिति चेत् न सर्वप्रवाद्यविप्रतिपत्तेः सर्वे हि प्रवादिनः प्रत्यक्षाप्रत्यक्षानर्थानभिवांछंति
अस्मान् प्रति हेतोरसिद्धेश्च सर्वज्ञेन निरतिशयप्रत्यक्षज्ञानचक्षुषा धर्मादयः सर्वे उपलभ्यंते तदुपदे
शाच्च श्रुतज्ञानिभिरपि अत्राह यद्यतींद्रिययोर्धर्माधर्मयोरुपकारसंबंधेनास्तित्वमवध्रियते तद
नंतरमुद्दिष्टस्य नभसोऽतींद्रियस्याधिगमे क उपकार इत्युच्यते आकाशस्यावगाहः ॥१८॥ उपकार
इति वर्त्तते जीवपुद्गलादीनामवगाहिनामवकाशदानमवगाहः आकाशस्योपकारो वेदितव्यः आ
ह जीवपुद्गलानां क्रियावतामवगाहिनामवकाशदानं युक्तं धर्मास्तिकायादयः पुनर्निष्क्रिया नित्य
संबंधाः तेषां कथमवगाह इति चेन्नोपचारतस्तत्सिद्धेः यथा गमनाभावेऽपि सर्वगतमाकाशमित्युच्य
ते सर्वत्र सद्भावात् एवं धर्माधर्मावपि अवगाहनक्रियाऽभावेऽपि सर्वत्र व्याप्तिदर्शनात् अवगाहिना

DR. BHAU DAJI MEMORIAL

१०५ विलक्ष्यते आह यद्येवमाकाशदानमस्य स्वभावः वज्रादिभिर्लोष्टादीनां भित्त्यादिभिर्गवादीनां च व्या
घातो न प्राप्नोति दृश्यते च व्याघातः तस्मादस्यावकाशदानं हीयत इति नैष दोषः वज्रलोष्टादीनां स्थूला
नां परस्परव्याघात इति नास्यावकाशदानसामर्थ्यं हीयते तत्रावगाहिनामेव व्याघातात् वज्रादयः पुनः
स्थूलत्वात् परस्परं प्रत्यवकाशदानं न कुर्वंतीति नासावाकाशदोषः ये खलु पुद्गलाः सूक्ष्मास्ते परस्प
रं प्रत्यवकाशदानं कुर्वंती यद्येवं नेदमाकाशस्यासाधारणलक्षणमितिपरेषामपि तत्सद्भावादिति
तन्न सर्वपदार्थानां साधारणावगाहनहेतुत्वमस्यासाधारणलक्षणमिति नास्ति दोषः अलोकाकाशे
तदभावादिति चेन्न स्वभावापरित्यागात् उक्तः आकाशस्योपकारः छ अथ तदनंतरोद्दिष्टा
नां पुद्गलानां कः उपकार इत्यत्रोच्यते शरीरवाङ्मनःप्राणापानाः पुद्गलानां॥१९॥ इदमयुक्तं वर्त्तते कि
मत्रायुक्तं पुद्गलानां कः उपकार इति परिप्रश्ने पुद्गलानां लक्षणमुच्यते शरीरादीनि पुद्गलमयानीति नैत १०५

दयुक्तं पुद्गलानां लक्षणं उत्तरत्र वक्ष्यते इदं तु जीवान् प्रति पुद्गलानामुपकारप्रतिपादनार्थमेवेति उपकार
प्रकरणे उच्यते शरीराणि उक्तानि औदारिकादीनि सौक्ष्म्यादप्रत्यक्षाणि तदुदयापादितवृत्तीन्युपच
यशरीराणि कानिचित्प्रत्यक्षाणि कानिचिदप्रत्यक्षाणि एतेषां कारणभूतानि कर्म्माण्यपि शरीरग्रहणे
न गृह्यंते एतानि पौद्गलिकानीति कृत्वा जीवानामुपकारे पुद्गलाः प्रवर्त्तन्ते स्यान्मतं कार्म्मणमपौद्गलि
कं अनाकारत्वात् आकारवतां हि औदारिकादीनां पौद्गलिकत्वं युक्तमिति तन्न तदपि पौद्गलिकमे
व तद्विपाकस्य मूर्त्तिमत्संबंधनिमित्तत्वात् दृश्यते हि व्रीह्यादीनां उदकादिद्रव्यसंबंधप्रापितपरिपाका
नां पौद्गलिकत्वं तथा कर्म्मणामपि गुडकंटकादिमूर्त्तिमद्द्रव्योपनिपाते सति विपच्यमानत्वात् पौद्गलि
कमित्यवसेयं वाक् द्विविधा द्रव्यवाग्भाववागिति तत्र भाववाक् तावद्वीर्यांतरायमतिश्रुतिज्ञानावरणक्ष
योपशमांगोपांगनामलाभनिमित्तत्वात् पौद्गलिकी तदभावे तद्वृत्त्यभावात् तत्सामर्थ्योपेतेन क्रियावता

१०५ त्मनाप्रेर्यमाणाः पुद्गलाः वाक्त्वेन विपरिणमंत इति द्रव्यवागपि पौद्गलिकी श्रोत्रेंद्रियविषयत्वात् इतरेंद्रि
यविषया कस्मान्न भवति तद्ग्रहणायोग्यत्वात् घ्राणग्राह्ये गंधद्रव्ये रसाद्यनुपलब्धिवत् अमूर्त्ता वागिति
चेत् न मूर्त्तिमद्ग्रहणावरोधव्याघाताभिभवादिदर्शनात् मूर्त्तिमत्वसिद्धेः मनो द्विविधं द्रव्यमनो भावमनश्चे
ति भावमनस्तावत् लब्ध्युपयोगलक्षणं पुद्गलावलंबनत्वात् पौ[illegible]द्गलिकं द्रव्यमनश्च ज्ञानावरणवीर्यां
तरायक्षयोपशमांगोपांगनामलाभप्रत्ययाः गुणदोषविचारस्मरणादिप्रणिधानाभिमुखस्यात्मनोऽनु
ग्राहकाः पुद्गलाः मनस्त्वेन परिणता इति पौद्गलिकं कश्चिदाह मनोद्रव्यांतरं रूपादिपरिणामविरहितं अ
णुमात्रं तस्य पौद्गलिकत्वमयुक्तमिति तदयुक्तं उच्यते तदिंद्रियेणात्मना च संबद्धं वा स्यादसंबद्धं वा य
द्यसंबद्धं तन्नात्मन उपकारकं भवितुमर्हति इंद्रियस्य च साचिव्यं न करोति अथ संबद्धमेकस्मिन् प्रदेशे
संबद्धं सत्तदणु इतरेषु प्रदेशेषु उपकारं न कुर्यात् अदृष्टवशादस्य अलातचक्रवत्परिभ्रमणमिति चे १०५

त् न तत्सामर्थ्याभावात् अमूर्त्तस्यात्मनो निःक्रियस्यादृष्टो गुणः स निःक्रियः सन् अन्यत्र क्रियारंभे न समर्थः ह

१०६ कारः छ आहोस्विदन्योप्यस्तीत्यत आह सुखदुःखजीवितमरणोपग्रहाश्च ॥२०॥ सदसद्वेद्योदयेंतरंग
हेतौ सति बाह्यद्रव्यपरिपाकनिमित्तवशादुत्पद्यमानः प्रीतिपरितापरूपः परिणामः सुखदुःखमित्याख्या
यते भवधारणकारणायुराख्यकर्मोदयाद्भवस्थितिमादधानस्य जीवस्य पूर्वोक्तप्राणापानक्रियावि
शेषाव्युच्छेदः जीवितमित्युच्यते तदुच्छेदो मरणं एतानि सुखादीनि जीवस्य पुद्गलकृत उपकारः कृतः मू
र्त्तिमद्धेतुसंनिधाने सति तदुत्पत्तेः उपकाराधिकारादुपग्रहवचनमनर्थकं नानर्थकं स्वोपग्रहप्रदर्शना
र्थमिदं पुद्गलानां पुद्गलकृत उपकार इति तद्यथा कंसादीनां भस्मादिभिर्जलादीनां कतकादिभिरयः
प्रभृतीनामुदकादिभिरुपकारः क्रियते चशब्दः किमर्थः समुच्चयार्थः अन्योपि पुद्गलकृत उपकारो
स्तीति समुच्चीयते यथा शरीराणि एवं चक्षुरादीनीन्द्रियाण्यपीति एवमाद्यजीवकृतमुपकारं प्रदर्श्य जी
वकृतोपकारप्रदर्शनार्थमाह परस्परोपग्रहो जीवानां ॥२१॥ परस्परशब्दः कर्मव्यतिहारे वर्त्तते कर्म १०६

व्यतिहारश्च क्रियाव्यतिहारः परस्परस्य उपग्रहः परस्परोपग्रहः जीवानामुपकारः कः पुनरसौ स्वामी भृत्यः
आचार्यः शिष्यः इत्येवमादिभावेन वृत्तिः परस्परोपग्रहः स्वामी तावद्वित्तत्यागादिना भृत्यानामुपकारे व
र्त्तते भृत्याश्च हितप्रतिपादनेनाहितप्रतिषेधेन च आचार्य उभयलोकफलप्रदोपदेशदर्शनेन तदुपदे
शविहितक्रियाऽनुष्ठापनेन च शिष्याणामनुग्रहे वर्त्तते शिष्या अपि तदानुकूल्यवृत्त्या आचार्याणां
उपकाराधिकारे पुनरुपग्रहवचनं किमर्थं पूर्वोक्तसुखादिचतुष्टयप्रदर्शनार्थं पुनरुपग्रहवचनं क्रियु
ते सुखादीन्यपि जीवानां जीवकृत उपकार इति छ आह यद्येवं सतोपकारिणा भवितव्यं सश्च कालो
भिमतः तस्य क उपकार इत्यत्रोच्यते वर्त्तनापरिणामक्रियाः परत्वापरत्वे च कालस्य ॥२२॥ कर्मणि
भावे वा युचि स्त्रीलिंगे वर्त्तनेति भवति वर्त्यते वर्त्तमानमात्रं वा वर्त्तनेति धर्मादीनां द्रव्याणां स्वपर्यायनिर्वृ
त्तिं प्रति स्वात्मनैव वर्त्तमानानां बाह्योपग्रहाद्विना तद्वृत्त्यभावात्तत्प्रवर्त्तनोपलक्षितः काल इति कृत्वा व

१०७ र्त्तिना कालस्योपकारः कोनिजंधः बर्त्तते द्रव्यपर्यायः तस्य बर्त्तयिता कालः यद्येवं कालस्य क्रियावत्त्वं प्राप्नो
ति यथा शिष्य अधीते उपाध्यायो ध्यापयतीति नैष दोषः निमित्तमात्रे पि हेतुकर्त्तृव्यपदेशो दृष्टः यथा
कारीषोग्निरध्यापयति एवं कालस्य हेतुकर्तृता स कथं काल इत्यवसीयते समयादीनां क्रियाविशेषाणां
समयादिभिर्निर्वर्त्यमानानां च पाकादीनां समयः पाक इत्येवमादिस्वसंज्ञारूढिसद्भावे पि समयः का
लः उदनपाकः काल इति अध्यारोप्यमाणः कालव्यपदेशस्तद्व्यपदेशनिमित्तस्य मुख्यस्य कालस्या
स्तित्वं गमयति कुतो गौणस्य मुख्यापेक्षत्वात् द्रव्यस्य पर्यायः धर्मांतरनिवृत्तिधर्मांतरोपजननरूपः
अपरिस्पंदात्मकः परिणामः जीवस्य क्रोधादिः पुद्गलस्य वर्णादिः धर्माधर्माकाशानां अगुरुलघु
गुणवृद्धिहानिकृतः क्रियापरिस्पंदात्मिका सा द्विधा प्रायोगवैश्रसिकभेदात् तत्र प्रायोगिकी शकटा
दीनां वैश्रसिकी मेघादीनां ननु परत्वापरत्वे क्षेत्रकृते कालकृते च स्तः तत्र कालोपकरणात् कालकृते गृ १०७

ह्यते त एते बर्त्तमानादयः उपकाराः कालस्यास्तित्वं गमयंति ननु बर्त्तनाग्रहणमेवास्तु तद्भेदाः परिणा
मादयः तेषां पृथग्ग्रहणमनर्थकं नानर्थकं कालद्वयसूचनार्थत्वात् प्रपंचस्य कालो हि द्विविधः पर
मार्थकालो व्यवहारकालश्च परमार्थकालो वर्त्तनालक्षणः परिणामादिलक्षणो व्यवहारकाल अन्ये
न परिछिन्नः अन्यस्य परिछेदहेतुः क्रियाविशेषकाल इति व्यवह्रियते स त्रेधा व्यवतिष्ठते भूतो बर्त्त
मानो भविष्यन्निति तत्र परमार्थकाले कालव्यपदेशो मुख्यः भूतादिव्यपदेशो गौणः क्रियावद्द्रव्यापे
क्षत्वात् कालकृतत्वाच्च अत्राह धर्माधर्माकाशपुद्गलजीवकालानां उपकारा उक्ताः लक्षणं चोक्तं उ
पयोगो लक्षणमित्येवमादि पुद्गलानां तु सामान्यलक्षणमुक्तं विशेषलक्षणं नोक्तं तत्किमित्यत्रोच्यते
स्पर्शरसगंधवर्णवंतः पुद्गलाः ॥२३॥ स्पृश्यते स्पर्शनमात्रं वा स्पर्शः सोष्टविधः मृदुकठिनगुरुलघुशी
तोष्णस्निग्धरूक्षभेदात् रस्यते रसनमात्रं वा रसः स पंचविधः तिक्ताम्लकटुमधुरकषायभेदात् गंध

१०८ तेगंधनमात्रं वा गंधः स द्वेधा सुरभिरसुरभिश्च वर्ण्यते वर्णनमात्रं वा वर्णः स पंचविध कृष्णनीलपीत
शुक्ललोहितभेदात् त एते मूलभेदाः प्रत्येकं संख्येयासंख्येयानंतभेदाश्च भवंति स्पर्शश्च रसश्च गं
धश्च स्पर्शो रसगंधवर्णाः एते षां संतीति स्पर्शरसगंधवर्णवंत इति नित्ययोगे मतुनिर्देशः यथा क्षीरिणो न्यग्रो
धा इति ननु च रूपिणः पुद्गलाः इत्यत्र पुद्गलानां रूपवत्वमुक्तं तदविनाभाविनश्च रसादयः तत्रैव परिगृही
ता इति व्याख्यातं तस्मात्तेनैव पुद्गलानां रूपादिमत्वसिद्धेः सूत्रमिदमनर्थकमिति नैष दोषः नित्याव
स्थितान्यरूपाणीत्यत्र धर्मादीनां नित्यत्वादिनिरूपणेन पुद्गलानामरूपित्वप्रसंगे तदपाकरणार्थं तदु
क्तं इदं तु तेषां स्वरूपविशेषप्रतिपत्त्यर्थमुच्यते अवशिष्टपुद्गलविकारप्रतिपत्त्यर्थमिदमुच्यते शब्द
बंधसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवंतश्च ॥२४॥ शब्दो द्विविधो भाषालक्षणो विपरीत १०८
श्चेति भाषालक्षणो द्विविधः साक्षरोऽनक्षरश्चेति अक्षरीकृतः शास्त्राभिव्यंजकः संस्कृतविपरीतभेदा

दार्यम्लेच्छव्यवहारहेतुः अनक्षरात्मको द्वींद्रियादीनामतिशयज्ञानस्वरूपप्रतिपादनहेतुः स एषः सर्वः प्रायो
गिकः अभाषात्मको द्विविधः प्रायोगिको वैश्रसिकश्चेति वैश्रसिको बलाहकादिप्रभवः प्रायोगिकश्चतुर्धा तत
विततघनसौषिरभेदात् तत्र चर्मतननिमित्तः पुष्करभेरीदर्दुरादिप्रभवः ततः तंत्रीकृतवीणासुघोषादि
समुद्भवो विततः तालघंटालालनाद्यभिघातजः घनः वंशशंखादिनिमित्तः सौषिरः बंधो द्विविधः वैश्रसि
कः प्रयोगिकश्च पुरुषप्रयोगानपेक्षो वैश्रसिकः तद्यथा स्निग्धरूक्षत्वगुणनिमित्तो विद्युदुल्काजल
धराग्नींद्रधनुरादिविषयः पुरुषप्रयोगनिमित्तः प्रयोगिकः अजीवविषयो जीवाजीवविषयश्चेति द्वि
धा भिन्नः तत्राजीवविषयो जतुकाष्ठादिलक्षणः जीवाजीवविषयः कर्मनोकर्मबंधः सौक्ष्म्यं द्विवि
धं अंत्यमापेक्षिकं च तत्रांत्यं परमाणूनां आपेक्षिकं बिल्वामलकबदरादीनां स्थौल्यमपि द्विविधं अंत्य
मापेक्षिकं चेति तत्रांत्यं जगद्व्यापिनि महास्कंधे आपेक्षिकं बदरामलकबिल्वतालादि षु संस्थानमाकृ


DR. BHAU DAJI MEMORIAL

ति तद्द्विविधमित्थंलक्षणमनित्थंलक्षणंचेति वृत्तत्र्यस्रचतुरस्रायतपरिमंडलादीत्थंलक्षणं अतोऽन्य
न्मेघादीनांसंस्थानमनेकविधंइत्थमिदमितिनिरूपणाभावादनित्थंलक्षणं भेदाःषोढाउत्करचूर्णखंडचू
र्णिकाप्रतराणुचटनविकल्पात् तत्रोत्करःकाष्ठादीनांकरपत्रादिभिरुत्किरणं चूर्णोयवगोधूमादीनां
शक्तुकणिकादिः खंडोघटादीनांकपालशर्करादिश्चूर्णिकामाषमुद्गादीनांप्रतरोऽभ्रपटलादीनां अ
णुचटनंसंतप्तायस्पिंडादिषुअयोघनादिभिर्हन्यमानेषुस्फुलिंगनिर्गमः तमोदृष्टिप्रतिबंधकारणंप्र
काशविरोधि छायाप्रकाशावरणनिमित्तासाद्वेधा वर्णादिविकारपरिणताप्रतिबिंबमात्रात्मिकाचे
ति आतपःआदित्यादिनिमित्तःउष्णप्रकाशलक्षणः उद्योतश्चंद्रमणिखद्योतादिप्रभवाःप्रकाशाः त
एतेशब्दादयःपुद्गलद्रव्यविकाराः तएतेषांसंतीतिसब्दबंधसौक्ष्मस्थौल्यसंस्थानभेदतमछायातपो
द्योतवंतःपुद्गलाइत्यभिसंबध्यतेचशब्देननोदनाभिघातादयःपुद्गलपरिणामाःआगमेप्रसिद्धाःसमु

च्चीयंतेउक्तानांपुद्गलानांभेदप्रदर्शनार्थमाह अणवःस्कंधाश्च॥२५॥प्रदेशमात्रभाविस्पर्शादिपर्यायप्र
सवसामर्थ्येनाण्यंतेशब्द्यंतइतिअणवः सौक्ष्म्यादात्मादयःआत्ममध्याआत्मांताश्च उक्तंच अत्तादि
अत्तमज्झंअत्तंतंनेवइंदिएगिज्झं जंदव्वंअविभागीतंपरमाणुवियाणेहि ७ स्थूलभावेनग्रहणनिक्षे
पणादिव्यापारस्कंधनात्स्कंधाइतिसंज्ञायंते रूढौक्रियाक्वचित्सतीउपलक्षणत्वेनाश्रीयतइति ग्र
हणादिव्यापारायोग्येष्वपिद्व्यणुकादिषुस्कंधाख्याप्रवर्ततेअनंतभेदाअपिपुद्गलाणुजात्यास्कंध
जात्याचद्वैविध्यमापद्यमानाःसर्वेगृह्यंतइति तज्जात्याधारानंतभेदसंसूचनार्थंबहुवचनंक्रियते
अणवस्कंधाइतिभेदाभिधानं पूर्वोक्तसूत्रद्वयभेदसंबंधनार्थंस्पर्शरसगंधवर्णवंतोऽणवःस्कंधाः
पुनःशब्दःबंधसौक्ष्मस्थौल्यसंस्थानभेदतमःछायातपोद्योतवंतश्चस्पर्शादिमंतश्चेति आहकिमेषां
पुद्गलानांअणुस्कंधलक्षणःपरिणामोऽनादिरुतआदिमानित्युच्यते सखल्वुत्पत्तिमत्वादादिमानप्रति

११७ जायते यद्येवं तस्मादवधीयतां कस्मान्निमित्तादुत्पद्यंत इति तत्र स्कंधानां तावदुत्पत्तिहेतुप्रतिपादनार्थमुच्य
ते भेदसंघातेभ्यः उत्पद्यंते॥२६॥संघातानां द्वितयनिमित्तवशात् विदारणं भेदः पृथग्भूतानामेकत्वापत्तिः
संघातः ननु च द्वित्वात् द्विवचनेन भवितव्यं बहुवचननिर्देशस्तृतीयसंग्रहार्थः भेदात् संघातात् भे
दसंघाताभ्यां च उत्पद्यंत इति तद्यथा द्वयोः परमाण्वोः संघातात् द्विप्रदेशः स्कंध उत्पद्यते द्विप्रदेशस्या
णोश्च त्रयाणां वा अणूनां संघातात् त्रिप्रदेशः द्वयोर्द्विप्रदेशयोः त्रिप्रदेशस्याणोश्च चतुर्णां वाणूनां
संघाताच्चतुःप्रदेशः एवं संख्येयानंतानामनंतानां च संघातात्तावत्प्रदेशः एषामेव भेदात् द्विप्रदेश
पर्यंताः स्कंधाः उत्पद्यंते एवं भेदसंघाताभ्यामेकसमयिकाभ्यां द्विप्रदेशादयः स्कंधा उत्पद्यंते अन्य
तो भेदेनान्यस्य संघातेनेति एवं स्कंधानामुत्पत्तिहेतुरुक्तः अणोरुत्पत्तिहेतुप्रदर्शनार्थमाह भेदा ११७
दणुः॥२७॥ सिद्धे विधिरारभ्यमाणो नियमार्थो भवति अणोरुत्पत्तिर्भेदादेव न संघातात् नापि भे

दसंघाताभ्यामिति आह संघातादेव स्कंधानामात्मलाभे सिद्धे भेदसंघातग्रहणमनर्थकमिति तद्ग्रह
णप्रयोजनप्रतिपादनार्थमिदमुच्यते भेदसंघाताभ्यां चाक्षुषः॥२८॥ अनंतानंतपरमाणुसमुदा
यनिष्पाद्योऽपि कश्चिच्चाक्षुषः कश्चिदचाक्षुषः स कथं चाक्षुषो भवतीति चेदुच्यते भेदसंघाताभ्यां चा
क्षुषः न भेदादिति कात्रोपपत्तिरिति चेत् ब्रूमः सूक्ष्मपरिणामस्य स्कंधस्य भेदे सौक्ष्म्यापरित्यागात्
अचाक्षुषत्वमेव सौक्ष्म्यपरिणतः पुनरपरः सत्यपि तद्भेदेऽन्यसंघातांतरसंयोगात् सौक्ष्म्यपरिणामो
परमे स्थौल्योत्पत्तौ चाक्षुषो भवति आह धर्मादीनां द्रव्याणां विशेषलक्षणान्युक्तानि सामान्यल
क्षणं नोक्तं तद्वक्तव्यमुच्यते सद्द्रव्यलक्षणमिति॥२९॥ यत्सत्तद्द्रव्यमित्यर्थः यद्येवं तदेव तावद्वक्त
व्यं किं सदित्यत आह उत्पादव्ययध्रौव्ययुक्तं सत्॥३०॥ चेतनस्याचेतनस्य वा द्रव्यस्य स्वां जातिमजह
तः निमित्तवशाद्भावांतरावाप्तिरुत्पादनमुत्पादः मृत्पिंडस्य घटपर्यायवत् तथा पूर्वभावविगमनं

११२ व्ययः यथा घटोत्पत्तौ पिंडाकृतेः अनादिपारिणामिकस्वभावेन व्ययोदयाभावात् ध्रुवति स्थिरीभवती-
ति ध्रुवः ध्रुवस्य भावः कर्म्म वा ध्रौव्यं यथा मृत्पिंडघटाद्यवस्थासु मृदाद्यन्वयात् तैरुत्पादव्ययध्रौव्यैर्यु-
क्तं सदिति आह भेदे सति युक्तशब्दो दृष्टः यथा दंडेन युक्तो देवदत्त इति तथा सति तेषां त्रयाणां वै युक्तं-
स्य द्रव्यस्य च अभावः प्राप्नोति नैष दोषः अभेदेपि कथंचिद्भेदनयापेक्षया युक्तशब्दो दृष्टः यथा सार-
युक्तः स्तंभ इति तथा सति तेषामविनाभावात् सद्व्यपदेशो युक्तः समाधिवचनो वा युक्तः शब्दः युक्तः
समाहितः तदात्मक इत्यर्थः उत्पादव्ययध्रौव्ययुक्तं सत् उत्पादव्ययध्रौव्यात्मकमिति यावत् एतदुक्तं
भवति उत्पादादीनि द्रव्यस्य लक्षणानि द्रव्यं लक्ष्यं तत्र पर्यायार्थिकनयापेक्षया परस्परतो द्रव्याच्चा-
र्थांतरभावः द्रव्यार्थिकनयापेक्षया व्यतिरेकेणानुपलब्धेः अनर्थांतरभाव इति लक्ष्यलक्षणभावा- १११
भावसिद्धिः आह नित्यावस्थितान्यरूपाणीत्युक्तं ॥ छ ॥ तत्र न ज्ञायते किं नित्यमित्यत आह तद्भावाव्ययं

नित्यं ॥३१॥ तद्भाव इत्युच्यते कस्तद्भावः प्रत्यभिज्ञानहेतुता तदेवेदमिति स्मरणं प्रत्यभिज्ञानं तदकस्मान्न
भवतीति योस्य हेतुः स तद्भावः भवनं भावः तस्य भावः तद्भावः येनात्मना प्राग्दृष्टं वस्तु तेनैवात्मना पुनर-
पि भावात् तदेवेदमिति प्रत्यभिज्ञायते यद्यत्यंतनिरोधोऽभिनवप्रादुर्भावमात्रमेव स्यात्ततः स्मरणानु-
पपत्तिः तदधीनो लोकसंव्यवहारो विरुध्यते ततस्तद्भावेनाव्ययं नित्यमिति निश्चीयते तत्तु कथंचिद्वे-
दितव्यं सर्वथा नित्यत्वे अन्यथाभावाभावात् संसारतन्निवृत्तिकारणप्रक्रियाविरोधः स्यात् ननु इ-
दमेव विरुद्धं तदेव नित्यं तदेवानित्यमिति यदि नित्यं व्ययोदयाभावात् अनित्यताव्याघातव्याघातः
अथानित्यमेव स्थित्यभावात् नित्यव्याघात इति नैतद्विरुद्धं कुतः अर्पितानर्पितसिद्धेः ॥३२॥ अनेका-
तात्मकस्य वस्तुनः प्रयोजनवशाद्यस्य कस्यचिद्धर्मस्य विवक्षया प्रापितं प्राधान्यमर्पितमुपनीतमिति या-
वत् तद्विपरीतमनर्पितं प्रयोजनाभावात् सतोप्यविवक्षा भवतीत्युपसर्ज्जनीभूतमनर्पितमित्युच्यते अ-

११२ र्प्पितं चानर्प्पितं च अर्प्पितनर्प्पिते ताभ्यां सिद्धेः अर्प्पितानर्प्पितसिद्धेर्न्नास्ति बिरोधः तद्यथा एकस्य देवदत्तस्य
पिता पुत्रो भ्राता भागिनेय इत्येवमादयः संबंधा जनकत्वजन्यत्वादिनिमित्ताः न विरुध्यंते अर्प्पणाभे
दात् पुत्रापेक्षया पिता पित्रापेक्षया पुत्र इत्येवमादि तथा द्रव्यमपि सामान्यार्प्पणया नित्यं विशेषार्प्पण
यानित्यं इति नास्ति बिरोधः तौ च सामान्यविशेषौ कथंचिद्भेदाभेदाभ्यां व्यवहारहेतू भवतः अत्राह स
तोऽनेकनयव्यवहारतंत्रत्वात् उपपन्ना भेदसंघातेभ्यः सतां स्कंधानामेवोत्पत्तिरिदं तु संदिग्धं
किं संघातः संयोगादेव द्व्यणुकादिलक्षणो भवति उत कश्चिद्विशेषोऽवध्रियत इत्यत्रोच्यते सति
संयोगे बंधादेकत्वपरिणामकृतात् संघातो निष्पद्यते यद्येवमिदमुच्यतां कुतोत्र खलु पुद्गलजात्यप
रित्यागे संयोगे च सति भवति केषांचिद्बंधोऽन्येषां च नेत्युच्यते यस्मात्तेषां पुद्गलात्मा विशेषेष्वनंत ११२
पर्यायाणां परस्परविलक्षणपरिणामाहितसामर्थ्यात् भवन् प्रतीतः स्निग्धरूक्षत्वाद्बंधः ॥३३॥ बाह्या

भ्यंतरकारणवशात् स्नेहपर्यायाविर्भावात् स्निग्धते स्मेति स्निग्धः तथा रूक्षणाद्रुक्षः स्निग्धश्च रूक्षश्च स्नि
ग्धरूक्षौ तयोर्भावः स्निग्धरूक्षत्वः स्निग्धत्वं चिक्कणगुणलक्षणः पर्यायः तद्विपरीतपरिणामो रूक्षत्वं
स्निग्धरूक्षत्वं स्निग्धरूक्षत्वादिति हेतुनिर्देशः तत्कृतो बंधो द्व्यणुकादिपरिणामः द्वयोः स्निग्धरूक्षयोः
अण्वोः परस्परश्लेषलक्षणे बंधे सति द्व्यणुकः स्कंधो भवति एवं संख्येयासंख्येयानंतप्रदेशः स्कंधो यो
ज्यः तत्र स्नेहगुणः एकद्वित्रिचतुःसंख्येयासंख्येयानंतविकल्पः तथा रूक्षगुणोपि तद्गुणाः परमाण
वः संति यथा तोयाऽजागोमहिष्युष्ट्रिकाक्षीरघृतेषु स्नेहगुणप्रकर्षाप्रकर्षेण प्रवर्त्तते पांशुकणिका
शर्करादिषु च रूक्षगुणो दृष्टः तथा परमाणुष्वपि स्निग्धरूक्षगुणयोर्वृत्तिः प्रकर्षाप्रकर्षेणानुमीयते
स्निग्धरूक्षत्वगुणनिमित्ते बंधे अविशेषेण प्रसक्ते अनिष्टगुणनिवृत्त्यर्थमाह न जघन्यगुणानां ॥३४॥ ज
घन्यो निकृष्टो गुणो भागः जघन्यो गुणो येषां ते जघन्यगुणाः जघन्यगुणानां नास्ति बंधः तद्यथा एकगुण

स्निग्धस्यैकगुणस्निग्धेन द्व्यादिसंख्येयानंतगुणस्निग्धेन वा नास्ति बंधः तथा एकगुणरूक्षस्यापि योज्यमि
ति एतौ जघन्यगुणस्निग्धरूक्षौ वर्जयित्वा अन्येषां स्निग्धानां रूक्षाणां च परस्परेण बंधो भवतीत्यविशेषे
ण प्रसंगे तत्रापि प्रतिषेधविषयख्यापनार्थमाह गुणसाम्ये सदृशानां ॥३५॥ सदृशग्रहणं तुल्यजातीय
संप्रत्ययार्थं गुणसाम्यग्रहणं तुल्यभागसंप्रत्ययार्थं एतदुक्तं भवति द्विगुणस्निग्धानां द्विगुणरूक्षैः त्रि
गुणस्निग्धानां त्रिगुणरूक्षैः द्विगुणस्निग्धानां द्विगुणस्निग्धैः द्विगुणरूक्षाणां द्विगुणरूक्षैश्चेत्येवमादिषु
नास्ति बंधः इति यद्येवं सदृशग्रहणं किमर्थं गुणवैषम्ये बंधप्रतिपत्त्यर्थं सदृशग्रहणं क्रियते अतो वि
षमगुणानां तुल्यजातीयानामतुल्यजातीयानां च अनियमेन बंधप्रसक्तौ विशिष्टार्थसंप्रत्ययार्थमिदमु
च्यते द्व्यधिकादिगुणानां तु ॥३६॥ द्वाभ्यां गुणाभ्यामधिको द्व्यधिकः कः पुनरसौ चतुर्गुणः आदिशब्दः प्र
कारार्थः कः पुनरसौ प्रकारार्थः द्व्यधिकता तेन पंचगुणादीनां संप्रत्ययो न भवति तेन द्व्यधिकादिगुणानां ११३

तुल्यजातीयानामतुल्यजातीयानां च बंध उक्तो भवति नेतरेषां तद्यथा द्विगुणस्निग्धस्य परमाणोः एकगु
णस्निग्धेन द्विगुणस्निग्धेन त्रिगुणस्निग्धेन वा नास्ति बंधः चतुर्गुणस्निग्धेन पुनरस्ति बंधः तस्यैव पुनर्द्वि
गुणस्निग्धस्य पंचगुणस्निग्धेन षट्सप्ताष्टसंख्येयानंतगुणस्निग्धेन वा बंधो नास्ति एवं त्रिगुणस्निग्धस्य
पंचगुणस्निग्धेन बंधोऽस्ति शेषैः पूर्वोत्तरैर्न भवति चतुर्गुणस्निग्धस्य षड्गुणस्निग्धेनास्ति बंधः शे
षैः पूर्वोत्तरैर्नास्ति एवं शेषेष्वपि योज्यः तथा द्विगुणरूक्षस्य एकद्वित्रिगुणरूक्षैर्नास्ति बंधः चतुर्गुणरू
क्षेण त्वस्ति बंधः तस्यैव द्विगुणरूक्षस्य पंचगुणरूक्षादिभिरुत्तरैर्नास्ति बंधः एवं त्रिगुणरूक्षादीनाम
पि द्विगुणाधिके बंधो योज्यः एवं भिन्नजातीयेष्वपि योज्यः उक्तं च णिद्धस्स णिद्धेण दुराधिएण लुक्ख
स्स लुक्खेण दुराधिएण णिद्धस्स लुक्खेण उवेदि बंधो जहण्णवज्जे विसमे समे वा तु शब्दो विशेषणार्थः
प्रतिषेधं व्यावर्तयति बंधं च विशेषयति किमर्थमधिकगुणविषयो बंधो व्याख्यातः न समगुणविषय इ

११४

स्मत आह बंधेधिकौपारिणामिकौ ॥३७॥ अधिकाराद्गुणद्व्याद्यः संबध्यते अधिकगुणावधिकाविति भा
वांतरोपादानेपरिणामकत्वं क्लिन्नगुडवत् यथा क्लिन्नोधिकमधुररसः पतितानां रेण्वादीनां स्वगुणोपा
दनात् परिणामकः तथान्योप्यधिकगुणः अल्पीयसः परिणामक इति कृत्वा द्विगुणादिस्निग्धरूक्ष
स्य चतुर्गुणादिस्निग्धरूक्षः परिणामको भवति ततः पूर्वावस्थाप्रच्यवनपूर्वकं तार्तीयिकमवस्थांतरं
प्रादुर्भवतीत्येकत्वमुपपद्यते इतरथा हि शुक्लकृष्णतंतुवत् संयोगे सत्यपरिणामकत्वात् सर्वं वि
विक्तरूपेणैवावतिष्ठते उक्तेन विधिना बंधे पुनः सति ज्ञानावरणादीनां कर्मणां त्रिंशत्सागरोपमको
ट्यादिस्थितिरुपपन्ना भवति उत्पादव्ययध्रौव्ययुक्तं सदिति द्रव्यलक्षणमुक्तं पुनरपरेण प्रकारेण द्र
व्यलक्षणप्रतिपादनार्थमाह गुणपर्ययवद्द्रव्यं ॥३८॥ गुणाश्च पर्यायाश्च गुणपर्यायाः ते अस्य संतीति ११४
गुणपर्ययवद्द्रव्यं अत्र मतोरुत्पत्तावुक्तएव समाधिः कथंचिद्भेदोपपत्तेरिति के गुणाः के पर्यायाः

अन्वयिनो गुणाः व्यतिरेकिणः पर्यायाः उभायेरुपेतं द्रव्यमिति उक्तं च गुण इदि दव्वविधाणं दव्वविको
कपज्जवो भणिदो तेहिं अणूणं दव्वं अजुदपसिद्धं हवदि णिच्चं इति एतदुक्तं भवति द्रव्यं द्रव्यांतराद्येन
विशिष्यते स गुणः तेन हि तत् द्रव्यं विधीयते असति तस्मिन् द्रव्यसंकरप्रसंगः स्यात् तद्यथा जीवः पुद्ग
लादिभ्यः ज्ञानादिभिर्गुणैर्विशिष्यते पुद्गलादयश्च रूपादिभिः ततश्चाविशेषे संकरः स्यात् ततः सा
मान्यापेक्षया ऽन्वयिनो ज्ञानादयो जीवस्य गुणाः पुद्गलादीनां च रूपादयः तेषां विकाराः विशेषात्म
ना भिद्यमानाः पर्यायाः घटज्ञानं पटज्ञानं क्रोधो मानः वर्णो गंधः तीव्रो मंदः इत्येवमादयः तेभ्योन्य
त्वं कथंचिदापद्यमानः समुदायो द्रव्यव्यपदेशभाक् यदि हि सर्वथा समुदायोऽनर्थांतरभूत एव स्यात्
तद्यथा परस्परविलक्षणानां समुदाये सति एकानार्थांतरभावात् समुदायस्य सर्वाभावः परस्परतोऽर्थां
तरभूतत्वात् यदिदं रूपं तस्मादर्थांतरभूता रसादयस्ततः समुदयोऽनर्थांतरभूतः यश्च रसादिभ्योऽ

डाक्टर भाऊदाजी स्मारकम्
Dr. BHAU DAJI MEMORIAL

११५ र्थांतरभूताद्रूपादनर्थांतरभूतः स कथं रसादिभ्योऽर्थांतरभूतो न भवेत् ततश्च रूपमात्रं समुदायः प्रस
क्तः न चैकरूपं समुदयो भवितुमर्हति। ततः समुदयाभावाच्च तदनर्थांतरभूतानां समुदायिनामप्यभावः इ
ति सर्वाभावः एवं रसादिष्वपि योज्यं तस्मात् समुदायमिच्छता कथंचिदर्थांतरभावः एषितव्यः उक्तानां द्रव्याणां
लक्षणनिर्देशात् तद्विषय एव द्रव्याध्यवसाये प्रसक्तेऽननुक्तद्रव्यसंसूचनार्थमिदमाह । कालश्च । किं द्रव्य
मिति वाक्यशेषः कुतः तल्लक्षणोपेतत्वात् द्विविधं लक्षणमुक्तं उत्पादव्ययध्रौव्ययुक्तं सत् गुणपर्ययवत्
द्रव्यमिति च तदुभयलक्षणं कालस्य विद्यते तद्यथा ध्रौव्यं तावत्कालस्य स्वप्रत्ययं स्वभावव्यवस्थानात् व्ययो
दयौ परप्रत्ययौ अगुरुलघुगुणवृद्धिहान्यपेक्षया स्वप्रत्ययौ च तथा गुणा अपि कालस्य साधारणासाधारण
रूपाः संति तत्रासाधारणा वर्तनाहेतुत्वं साधारण्याश्च अचेतनत्वागुरुलघुत्वादयः पर्यायाश्च व्ययोत्पादलक्ष
णा योज्याः तस्माद्द्विप्रकारलक्षणोपेतत्वात् आकाशादिवत् कालस्य द्रव्यत्वं सिद्धं तस्यास्तित्वलिंगं धर्मा ११५

दिवत् व्याख्यातं वर्तनालक्षणः काल इति ननु किमर्थमयं कालः पृथगुच्यते यत्रैव धर्मादयः उक्ताः तत्रै
वायमपि वक्तव्यः अजीवकाया धर्माधर्माकाशकालपुद्गला इति नैवं शक्यं तत्रोपदेशे सति कायत्वमस्य
स्यात् नेष्यते च मुख्योपचारप्रदेशप्रचयकल्पनाभावात् धर्मादीनां तावत् मुख्यप्रदेशप्रचयः उक्तः असंख्ये
याः प्रदेशा इत्येवमादिना अणोरप्येकप्रदेशस्य पूर्वोत्तरप्रज्ञापनयापेक्षया उपचारकल्पनया प्रदेशप्रच
यः उक्तः कालस्य पुनः द्विविधापि प्रदेशप्रचयकल्पना नास्तीत्यकायत्वं अपि च तत्र पाठे निःक्रियाणि
चेत्यत्र धर्मादीनां आकाशांतानां निःक्रियत्वे प्रतिपादिते इतरेषां जीवपुद्गलानां सक्रियत्वप्राप्तिवत्
कालस्यापि सक्रियत्वं स्यात् अथ आकाशात् प्राक्काल उद्दिश्यते आ आकाशादेकद्रव्याणीति एकद्रव्यत्वम
स्य स्यात् तस्मात् पृथगिह कालोद्देशः क्रियते अनेकद्रव्यत्वे सति किमस्य प्रमाणं लोकाकाशस्य यावंतः
प्रदेशाः तावंतः कालाणवो निःक्रियाः एकैकाकाशप्रदेशे एकैकवृत्त्या लोकं व्याप्य व्यवस्थिताः उक्तं च

लोगागासपदेसे एक्केके जे ठिदा हु एक्केक्का रयणाणं रासी विव ते कालाणू मुणेदव्वा रूपादिगुणविरहाद
मूर्त्ताः वर्त्तनालक्षणस्य मुख्यस्य कालस्य प्रमाणमुक्तं परिणामादिगम्यस्य व्यवहारकालस्य किं प्रमाणमि
त्यत इदमुच्यते सोऽनंतसमयः॥ सांप्रतिकस्यैकसमयिकत्वेपि अतीता अनागताश्च समयाः अनंता
इति कृत्वा अनंतसमय इत्युच्यते अथवा मुख्यस्यैव कालस्य प्रमाणावधारणार्थमिदमुच्यते अनंतप
र्यायवर्त्तनाहेतुत्वादेकोपि कालाणुरनंत इत्युपचर्यते समयः पुनः परमनिरुद्धः कालांशस्तत्प्रचयवि
शेष आवलिकादिरवगंतव्यः आह गुणपर्ययवत् द्रव्यमित्युक्तं तत्र के गुणा इत्यत्रोच्यते द्रव्याश्रया निर्गु
णा गुणाः॥ द्रव्यमाश्रयो येषां ते द्रव्याश्रयाः निःक्रांता गुणेभ्यो निर्गुणाः एवमुभयलक्षणोपेता गुणा इ
ति निर्गुणा इति विशेषणं द्व्यणुकादिनिवृत्त्यर्थं तान्यपि हि कारणभूतपरमाणुद्रव्याश्रयाणि गुणवंति
तु तस्मान्निर्गुणा इति विशेषणात्तानि निवर्त्तितानि भवंति ननु पर्याया अपि घटसंस्थानादयो द्रव्याश्र

या निर्गुणास्तेषामपि गुणत्वं प्राप्नोति द्रव्याश्रया इति वचनान्नित्यं द्रव्यमाश्रित्य वर्त्तंते ते गुणा इति विशेषणा
त् पर्याया निवर्त्तिता भवंति ते हि कदाचित्का इत्यसकृत् परिणामशब्दः उक्तः तस्य कोर्थः इति प्रश्ने उत्तर
माह तद्भावः परिणामः॥ अथवा गुणाः द्रव्यादर्थांतरभूता इति केषांचिद्दर्शनं तत्किं भवतः अभिमतं ने
त्याह यद्यपि कथंचिद्व्यपदेशादिभेदहेत्वपेक्षया द्रव्यादन्ये तथापि तदव्यतिरेकात्तत्परिणामाच्च ना
न्ये यद्येवं स उच्यतां कः परिणाम इति तन्निश्चयार्थमिदमुच्यते धर्मादीनि द्रव्याणि येनात्मना भवंति तद्भा
वः तत्त्वं परिणाम इति आख्यायते स द्विविधोऽनादिरादिमांश्च तत्रानादिर्मांश्च तत्रानादिर्धर्मादीनां ग
त्युपग्रहादिः सामान्यापेक्षया स एवादिमांश्च भवति विशेषापेक्षया इति तत्त्वार्थवृत्तौ सर्वार्थसिद्धिसंज्ञि
कायां पंचमोऽध्यायः समाप्तः ॥५॥ अथाजीवपदार्थो व्याख्यातः इदानीं तदनंतरोद्देशभागास्रवपदा
र्थो व्याख्येय इति ततस्तत्प्रसिद्ध्यर्थमिदमुच्यते कायवाङ्मनःकर्म योगः॥ कायादयः शब्दा व्याख्यातार्थ

१२७ कर्म्मक्रियेत्यनर्थांतरं कायवाङ्मनसां कर्म्म कायवाङ्मनकर्म्म योग इत्याख्यायते आत्मप्रदेशपरिस्पंदो
योगः स निमित्तभेदात्त्रिधा भिद्यते काययोगो वाग्योगो मनोयोग इति तद्यथा वीर्यांतरायक्षयोपशमसद्भा
६ वे सति औदारिकादिसप्तविधकायवर्गणान्यतमालंबनापेक्षः आत्मप्रदेशपरिस्पंदः काययोगः शरीरनाम
कर्म्मोदयापादितवाग्वर्गणालंबने सति वीर्यांतरायमत्यक्षराद्यावरणक्षयोपशमापादिताभ्यंतरवाग्लब्धि
सान्निध्ये वाह्यनिमित्तमनोवर्गणालंबने च सति मनःपरिणामाभिमुखस्यात्मनः प्रदेशपरिस्पंदो मनोयो
पित्रिविधवर्गणापेक्षः सयोगकेवलिनः आत्मनः प्रदेशपरिस्पंदो योगो वेदितव्यः आह अभ्युपेमः आ
हितत्रैविध्या क्रिया योग इति प्रकृतं इदानीं निर्दिश्यतां किंलक्षणः आश्रव इत्युच्यते योयं योगशब्दाभिधेयः
संसारिणः पुरुषस्य। स आश्रवः यथा सरः सलिलावाहि द्वारं तदाश्रवणकारित्वात् आश्रव इत्याख्याय १२७
ते तथा योगप्रणालिकया आत्मनः कर्म्म आश्रवतीति योग आश्रव इति व्यपदेशमर्हति आह कर्म्म द्विविधं

पुण्यं पापं चेति तस्य किमविशेषेण योग आश्रवहेतुः आहोस्विदस्ति कश्चित्प्रतिविशेष इत्यत्रोच्यते शुभः पुण्य
स्याशुभः पापस्य॥ कः शुभो योगः को वा अशुभो योगः प्राणातिपातादत्तादानमैथुनादिः अशुभकाययोगः
अनृतभाषणपरुषासभ्यवचनादिः अशुभो वा ग्योगः वधचिंतनेर्ष्याऽसूयादिरशुभो मनोयोगः ततो विपरी
तः शुभः कथं योगस्य शुभाशुभत्वं शुभपरिणामनिर्वृत्तो योगः शुभः अशुभपरिणामनिर्वृत्तश्चाशुभः न पुनः
शुभाशुभकर्म्मकारणत्वेन यद्येवमुच्यते शुभयोग एव न स्यात् शुभयोगस्यापि ज्ञानावरणादिबंधहेतुत्वाभ्यु
पगमात् पुनात्यात्मानं पूयतेऽनेनेति वा पुण्यं तत्सद्वेद्यादि पाति रक्षति आत्मानं शुभादिति पापं तदसद्वे
द्यादि आह किमयमाश्रवः सर्वसंसारिसमानफलारंभहेतुराहोस्वित्कश्चिदस्ति प्रतिविशेष इत्यत्रोच्यते
सकषायाकषाययोः सांपरायिकेर्यापथयोः स्वामिभेदात् आश्रवभेदः स्वामिनौ द्वौ सकषायश्चाकषाय
श्चेति कषायः क्रोधादिः कषाय इव कषायः क उपमार्थः यथा कषायो नैयग्रोधादिः श्लेषहेतुस्तथा क्रोधा

११८ द्विरपि आत्मनः कर्म्मश्लेषहेतुत्वात् कषायइव कषायइत्युच्यते सहकषायेण वर्त्तत इति सकषायः नविद्यते कषा
योऽस्येति अकषायः सकषायश्च अकषायश्च सकषायाकषायौ तयोः सकषायकषाययोः सांपरायः संसारः त
त्प्रयोजनं कर्म्म सांपरायिकं ईरणमीर्या योगो गतिरित्यर्थः तद्द्वारकं कर्म ईर्यापथं सांपरायिकं च ईर्यापथं च
सांपरायिकेर्यापथे तयोः सांपरायिकेर्यापथयोः यथासंख्यमभिसंबंधः सकषायस्यात्मनो मिथ्यादृष्ट्यादेः
सांपरायिकस्य कर्म्मण आश्रवो भवति अकषायादेरीर्यापथस्य कर्म्मण आश्रवो भवति आदावुद्दिष्टस्याश्रव
स्य भेदप्रतिपादनार्थमाह इंद्रियकषायाव्रतक्रियाः पंचचतुःपंचपंचविंशतिसंख्याः पूर्वस्य भेदाः अत्र इं
द्रियादीनां पंचादिभिर्यथासंख्यमभिसंबंधो वेदितव्यः इंद्रियाणि पंच चत्वारः कषायाः पंचाव्रतानि प्राण
व्यपरोपणादीनि वक्ष्यंते पंचविंशतिक्रिया उच्यंते चैत्यगुरुप्रवचनपूजादिलक्षणा सम्यक्त्ववर्द्धनी क्रि
या सम्यक्त्वक्रिया अन्यदेवता[illegible]स्तवनादिरूपा मिथ्यात्वहेतुका कर्म्मप्रवृत्तिर्मिथ्यात्वक्रिया गमनागमना ११८

दिप्रवर्त्तनं कायादिभिः प्रयोगक्रिया संयतस्य सतः अविरतिं प्रत्याभिमुख्यं समादानक्रिया ईर्यापथनिमित्तेर्याप
थक्रिया ताः एताः पंचक्रियाः क्रोधावेशात्प्रादोषिकी क्रिया प्रदुष्टस्य सतोऽभ्युद्यमः कायिकी क्रिया हिंसोपक
रणादधिकारिणिकी क्रिया दुःखोत्पत्तितंत्रत्वात् पारितापिकी क्रिया आयुरिंद्रियबलोच्छ्वासनिश्वासप्राणा
नां वियोगकरणात् प्राणातिपातिकी क्रिया ता एताः पंचक्रियाः रागार्द्रीकृतत्वात् प्रमादिनो रमणीयरूपावलो
कनाभिप्रायो दर्शनक्रिया प्रमादवशात् स्पृष्टव्यसंचेतनानुबंधः स्पर्शनक्रिया अपूर्वाधिकरणोत्पादनात्
प्रत्ययिकी क्रिया स्त्रीपुरुषपशुसंपातिदेशेऽंतर्म्मलोत्सर्गकरणं समंतानुपातक्रिया अप्रमृष्टादृष्टभूमौ का
यादिनिक्षेपोऽनाभोगक्रियाः यां परेण निर्वर्त्यां क्रियां स्वयं करोति सा स्वहस्तक्रिया पापादानादिप्रवृत्ति
विशेषाभ्यनुज्ञानं सा निसर्गक्रिया पराचरितसावद्यादिप्रकाशनं विदारणक्रिया यथोक्तामाज्ञामावश्य
कादिषु चारित्रमोहोदयात् कर्तुमशक्नुवतोऽन्यथाप्ररूपणाद्व्यापादिकी क्रिया साठ्यालस्याभ्यां प्रवचनोपदि

११९ ष्टविधिकर्त्तव्यताऽनादरोनाकांक्षाक्रिया ताएताःपंचक्रियाः छेदनभेदनविसर्जनादिक्रियापरत्वमन्येनवारंभे
क्रियमाणेप्रहर्षः प्रारंभक्रियापरिग्रहाविनाशार्थापारिग्राहिकीक्रियाज्ञानदर्शनादिषुनिकृतिर्वंचनंमाया
क्रिया अन्यंमिथ्यादर्शनकारणाविष्टंप्रसंसादिभिः दृढयतियथासाधुकरोषीतिसामिथ्यादर्शनक्रिया सं
यमघातिकर्मोदयवशादनिवृत्तिरप्रत्याख्यानक्रिया ताएताःपंचविंशतिक्रियाः एतानींद्रियादीनिकार्यका
रणभेदात् भेदमापद्यमानानिसांपरायिकस्यकर्मणः आश्रवद्वाराणिभवंति अत्राहयोगत्रयस्यसर्वात्म
कार्यत्वातसर्वेषांसंसारिणांसाधारणस्यततोबंधफलानुभवनंप्रत्यविशेषः इत्युच्यते नैतदेवंयस्मात्स
त्यपिप्रत्यात्मसंभवेतेषांजीवपरिणामेभ्योऽनंतविकल्पेभ्योविशेषोऽभ्यनुज्ञायतेकथमितिचेदुच्यते ती
व्रमंदज्ञाताज्ञातभावाधिकरणवीर्यविशेषेभ्यस्तद्विशेषः बाह्याभ्यंतरहेतूदीरणवशादुद्रिक्तःपरिणा
मः तीव्रः तद्विपरीतोमंदः अयंप्राणीमयाहंतव्यइति ज्ञात्वाप्रवृत्तिःज्ञातमित्युच्यते मदात्प्रमादाद्वाऽनवबुध्य ११९

प्रवृत्तिरज्ञातं अधिक्रियंतेऽस्मिन्नर्थाइत्यधिकरणंद्रव्यमित्यर्थः द्रव्यस्यस्वशक्तिविशेषोवीर्यं भावशब्दःप्र
त्येकंपरिसमाप्यते तीव्रभावःमंदभाव इत्यादिएतेभ्यस्तस्याश्रवस्यविशेषोभवति कारणभेदाद्धिकार्यभेद
इति अत्राहअधिकरणमुक्तंतत्स्वरूपमनिर्ज्ञातंअतस्तदुच्यतामिति अत्रभेदप्रतिपादनद्वारेणाधिक
रणस्वरूपनिर्ज्ञानार्थमाह अधिकरणंजीवाजीवाः ७ उक्तलक्षणाःजीवाजीवाः यद्युक्तलक्षणाःपुनर्ग्रह
णंकिमर्थं अधिकरणविशेषज्ञापनार्थंपुनर्वचनं जीवाजीवाधिकरणमित्ययंविशेषोज्ञापयितव्यइति
कःपुनरसौहिंसाद्युपकरणभावइति स्यादेतन्मूलपदार्थयोर्द्वित्वात् जीवाजीवावितिद्विवचनंन्यायप्रा
प्तमिति तन्नपर्यायाणामधिकरणत्वात् येनकेनचित्पर्यायेणविशिष्टंद्रव्यंतदधिकरणंनसामान्य
मिति बहुवचनंकृतं जीवाजीवाअधिकरणंकस्य आश्रवस्येत्यर्थवशादभिसंबंधोभवति तत्रजीवाधिक
रणभेदप्रतिपत्त्यर्थमाह आद्यंसंरंभसमारंभारंभयोगकृतकारितानुमतकषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैक

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारकम्

१२० सःप्राणव्यपरोपणादिषुप्रमादवतः प्रयत्नावेशः संरंभः साधनसमभ्यासीकरणंसमारंभः प्रक्रमःआरं
भः योगशब्दोव्याख्यातार्थः कृतवचनंस्वातंत्र्यप्रतिपत्त्यर्थंकारिताभिधानंपरप्रयोगापेक्षं अनुमत
शब्दः प्रयोजकस्य मानसपरिणामप्रदर्शनार्थः अभिहित लक्षणाःकषायाः क्रोधादयः विशिष्यतेऽर्थो
ऽर्थांतरादितिविशेषः सप्रत्येकं अभिसंबध्यतेसंरंभविशेषः समारंभविशेषइत्यादि आद्यंजीवाधिकरणं
एतैर्विशेषैर्भिद्यतइतिवाक्यशेषः एतेचत्वारः सुजंतास्त्र्यादिशब्दाःयथाक्रममभिसंबध्यंते संरंभसमारंभा
कृत रंभास्त्रयः योगास्त्रयः कारितानुमतास्त्रयः कषायश्चत्वारइतिएतेषांगणनाभ्यावृत्तिःसावद्योत्पत्ते एकशः
इतिवीप्सानिर्देशः एकैकंत्र्यादिभेदान्नयेदित्यर्थः तद्यथा क्रोधकृतकायसंरंभः मान कृतकायसंरंभः
मायाकृतकायसंरंभः लोभ कृतकायसंरंभश्चेति द्वादशधाकायसंरंभः एवंवाग्योगेमनोयोगेचद्वादशा
धासंरंभः तएतेसंपिंडिताःषट्त्रिंशत् तथासमारंभाअपिषट्त्रिंश त् एतेसंपिंडिताजीवाधिकरणाश्र १२०

वभेदाः अष्टोत्तरसंख्याःसंभवंति चशब्दः अनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनकषायभेदकृतांतर्भे
दसमुच्चयार्थः परस्याजीवस्याधिकरणस्यभेदप्रसत्त्यर्थमाह निर्वर्त्तनानिक्षेपसंयोगनिसर्गाद्विचतुर्द्वित्रिभे।
दाःपरं निर्वर्त्यतइतिनिर्वर्त्तनानिष्पादना निक्षिप्यतइतिनिक्षेपः स्थापनासंयुज्यतइतिसंयोगःमिश्री
कृतं निसृज्यतइतिनिसर्गःप्रवर्त्तनं एतेद्व्यादिभिर्यथाक्रममभिसंबध्यंते निर्वर्त्तनाधिकरणंद्विविधं नि
क्षेपश्चतुर्भेदः संयोगोद्विभेदः निसर्गस्त्रिभेदइति तएतेभेदाजीवाधिकरणस्यवेदितव्याः परवचनमन
र्थकंपूर्वसूत्रेआद्यमितिवचनादिदमवशिष्टार्थंभवतीति नानर्थकमन्यार्थः परशब्दः संरंभादिभ्योऽन्या
निनिर्वर्त्तनादीनि इतरथाहिनिर्वर्त्तनादीनांआत्मपरिणामसद्भावाज्जीवाधिकरणविकल्पाएवेतिवि
ज्ञायते निर्वर्त्तनाधिकरणंद्विविधंमूलगुणनिर्वर्त्तनाधिकरणंउत्तरगुणनिर्वर्त्तनाधिकरणंचेति तत्र
मूलंपंचविधंशारीरवाङ्मनःप्राणापानाश्च उत्तरंकाष्ठपुस्तचित्रकर्मादि निक्षेपश्चतुर्भेदः अप्रत्यवेक्षित

अना

१२१ निक्षेपाधिकरणं दुःप्रमृष्टनिक्षेपाधिकरणं सहसानिक्षेपाधिकरणं॰भोगनिक्षेपाधिकरणं चेति संयो
गो द्विविधः भक्तपानसंयोगाधिकरणं उपकरणसंयोगाधिकरणं चेति निसर्गस्त्रिविधः कायनि
सर्गाधिकरणं वाग्निसर्गाधिकरणं मनोनिसर्गाधिकरणं चेति उक्तः सामान्येन कर्माश्रवभेदः इदा
नीं कर्मविशेषाश्रवभेदो वक्तव्यस्तस्मिन्वक्तव्ये आद्ययोर्ज्ञानदर्शनावरणयोराश्रवभेदप्रतिपा
स्पर्थमाह तत्प्रदोषनिह्नवमात्सर्यान्तरायासादनोपघाता ज्ञानदर्शनावरणयोः॥ तत्त्वज्ञानस्य
मोक्षसाधनस्य कीर्तने कृते कस्यचिदनभिव्याहरतः अंतःपैशुन्यपरिणामः प्रदोषः कुतश्चित्का
रणान्नास्ति न वेद्मीत्यादि ज्ञानस्य व्यपलपनं निह्नवः कुतश्चित्कारणाद्भावितमपि विज्ञानं दाना
र्हमपि यतो न दीयते तन्मात्सर्यं ज्ञानव्यवच्छेदकरणमंतरायः कायेन वाचा च परप्रकाश्यज्ञानस्य व
र्जनं आसादनं प्रशस्तज्ञानदूषणं उपघातः आसादनमेवेति चेति सतो ज्ञानस्य विनयप्रदानादि १२१

गुणकीर्तनाननुष्ठानमासादनं उपघातस्तु ज्ञानमज्ञानमेवेति ज्ञाननाशाभिप्राय इत्यनयोरयं भेदः
तच्छब्देन ज्ञानदर्शनयोः प्रतिनिर्देशः क्रियते कथं पुनरप्रकृतयोरनिर्दिष्टयोस्तच्छब्देन परामर्शः कर्तुं श
क्यः प्रश्नापेक्षया ज्ञानदर्शनावरणयोः क आश्रव इति प्रश्ने कृते तदपेक्षया तच्छब्दः ज्ञानदर्शने प्रतिदि
शति एते ज्ञानदर्शनवत्सु तत्साधनेषु च प्रदोषादयो योज्याः तन्निमित्तत्वात् एते ज्ञानदर्शनावरणयो
राश्रवहेतवः एककारणसाध्यस्य कार्यस्यानेकस्य दर्शनात् तुल्येपि प्रदोषादौ ज्ञानदर्शनावरणाश्र
वसिद्धिः अथवा विषयभेदात् आश्रवभेदः ज्ञानविषयाः प्रदोषादयो ज्ञानावरणस्य दर्शनविषयाः प्र
दोषादयो दर्शनावरणस्येति यथानयोः कर्मप्रकृत्योराश्रवभेदास्तथा दुःखशोकतापाक्रंदनव
धपरिदेवनान्यात्मपरोभयस्थान्यसद्वेद्यस्य॥११॥ पीडालक्षणः परिणामो दुःखं अनुग्राहकसंबंधविच्छेदे सति
वैक्लव्यविशेषः शोकः परिवादादिनिमित्तादाविलांतःकरणस्य तीव्रानुशयस्तापः परितापजाश्रुपा

प्रचुरविलापादिभिर्व्यक्तं क्रंदनं आक्रंदनं आयुरिंद्रियबलप्राणवियोगकरणं वधः संक्लेशपरिणामाव
लंबनं अनुकंपाप्रचुरं परिदेवनं ननु च शोकादीनां दुःखग्रहणमेवास्तु सत्यमेवं तथापि कतिपयवि
शेषप्रतिपादनेन दुःखशासनुविधानं क्रियते यथा गोरित्युक्ते अनिर्ज्ञाते विशेषे तत्प्रतिपादनार्थं खं
डमुंडशुक्लकृष्णाद्युपादानं क्रियते तथा दुःखविषयाश्रवासंख्येयलोकभेदसंभवात् दुःखमित्युक्ते वि
शेषानिर्ज्ञानात् कतिपयविशेषनिर्देशेन तद्विवेकप्रतिपत्तिः क्रियते तानि पुनरानि दुःखादीनि क्रोधा
द्यावेशवशात् आत्मस्थान्यपि भवंति परस्थानि उभयस्थानि च एतानि सर्वाणि असद्वेद्याश्रवका
रणानि वेदितव्यानि अत्र चोद्यते यदि दुःखादीनि आत्मपरोभयस्थानि असद्वेद्याश्रवनिमित्तानि कि
मर्थमार्हतैः केशलुंचनानशनातपस्थानादीनि दुःखनिमित्तानि आस्थीयंते परेषु च प्रतिपाद्यंत इति
नैष दोषः अंतरंगक्रोधाद्यावेशपूर्वकाणि दुःखादीनि असद्वेद्याश्रवनिमित्तानीति विशेष्योक्तत्वात् १२२

यथा कस्यचिद्भिषजः परमकरुणाशयस्य निःशल्यस्य संयतस्योपरि गंडं पाटयतः दुःखहेतुत्वे सत्यपि न
पापबंधो बाह्यनिमित्तमात्रादेव भवति एवं संसारविषयमहादुःखादुद्विग्नस्य भिक्षोः तन्निवृत्त्युपायं प्र
ति समाहितमनस्कस्य शास्त्रविहिते कर्मणि प्रवर्त्तमानस्य संक्लेशपरिणामाभावात् दुःखनिमित्तत्वे
सत्यपि न पापबंधः उक्तं च न दुःखं न सुखं यद्वद्धेतुर्दृष्टः चिकित्सिते चिकित्सायां तु युक्तस्य स्यात्
दुःखमथवा सुखं न दुःखं न सुखं तद्वद्धेतुर्मोक्षस्य साधने मोक्षोपाये तु युक्तस्य स्यात् दुःखमथवा सुखं
उक्ताः असद्वेद्याश्रवहेतवः सद्वेद्यस्य पुनः के इत्यत्रोच्यते सू भूतव्रत्यनुकंपादानं सरागसंयमादि
योगः क्षांतिः शौचमिति सद्वेद्यस्य सू ताः सुखासुखगतिषु कर्मोदयवशात् भवंतीति भूतानि प्राणि
नः इत्यर्थः व्रतान्यहिंसादीनि वक्ष्यंते तद्वंतो व्रतिनः ते द्विविधाः अगारं प्रति निवृत्तौत्सुक्याः संयताः
गृहिणश्च संयतासंयताः अनुग्रहार्द्रीकृतचेतसः परपीडामात्मस्थामिव कुर्वत अनुकंपनमनुकंपा

१२३ भूतेषु व्रतीषु च अनुकंपा: भूतव्रत्यनुकंपा परानुग्रहबुध्या स्वस्यातिसर्जनं दानं संसारकारणनिवृत्तिं
प्रत्यागूर्णोऽक्षीणाशयः सराग इत्युच्यते प्राणींद्रियेष्वशुभप्रवृत्तेर्विरतिः संयमः सरागस्य संयमः
सरागसंयमः सरागो वा संयमः सरागसंयमः आदिशब्देन संयमासंयमाकामनिर्जराबालतपोनुरो
धः योगः समाधिः सम्यक्प्रणिधानमित्यर्थः भूतव्रत्यनुकंपादानसरागसंयमादीनां योगः भूतव्रत्य
नुकंपादानसरागसंयमादियोगः क्रोधादिनिवृत्तिः क्षांतिः लोभप्रकाराणामुपरमः शौचं इति शब्दः
प्रकारार्थः केपुनस्ते प्रकाराः अर्हत्पूजाकरणतत्परताबालवृद्धतपस्विवैयावृत्यादयः भूतग्रहणा
त्सिद्धे व्रतिग्रहणं तद्विषयानुकंपाप्राधान्यख्यापनार्थं त एते सद्वेद्यस्याश्रवाः ज्ञेयाः अथ तदनंतरो
द्देशभाजो मोहस्याश्रवहेतौ वक्तव्ये तद्भेदस्य दर्शनमोहस्याश्रवहेतुप्रतिपादनार्थमिदमुच्यते
केवलिश्रुतसंघधर्मदेवावर्णवादो दर्शनमोहस्य ॥१३॥ निरावरणज्ञानाः केवलिनः तदुपदिष्टं बुध्य १२३

तिशयर्द्धियुक्तगणधरानुस्मृतं ग्रंथरचनं श्रुतं रत्नत्रयोपेतः श्रमणगणः संघः अहिंसादिलक्षण
स्तदागमदेशितो धर्मः देवाश्चतुर्णिकायाः उक्ताः गुणवत्सु महत्सु असद्भूतदोषोद्भावनमवर्णवादः ए
तेष्ववर्णवादः दर्शनमोहस्याश्रवहेतुः कवलाभ्यवहारजीविनः केवलिन इत्येवमादिवचनं केवलि
नामवर्णवादः मांसभक्षणाद्यभिधानं श्रुतावर्णवादः शूद्रत्वाशुचित्वाद्याविर्भावनं संघावर्णवा
दः जिनोपदिष्टो धर्मो निर्गुणः तदुपसेविनो ये ते चासुरा भविष्यंतीत्येवमाद्यभिधानं धर्मावर्णवा
दः सुरामांसोपसेवाद्याघोषणं देवावर्णवादः द्वितीयमोहस्याश्रवभेदप्रतिपादनार्थमाह ॥ कषा
योदयात्तीव्रपरिणामश्चारित्रमोहस्य ॥१४॥ कषाया हि निरुक्ताः उदयो विपाकः कषायाणामुदयात्ती
व्रपरिणामश्चारित्रमोहस्याश्रवो वेदितव्यः तत्र स्वपरकषायोत्पादनं तपस्विजनवृत्तदूषणं संक्लिष्ट
लिंगव्रतधारणादि कषायवेदनीयस्याश्रवः सद्धर्मोपहसनदीनातिहासबहुविप्रलापोपहासशी

१२४ लत्यादिः हास्यवेदनीयस्य विचित्रक्रीडनपरताव्रतशीलाक्रमादिरतिवेदनीयस्य परारतिप्रादुर्भावन
रतिविनाशनपापशीलसंसर्गादिः अरतिवेदनीयस्य स्वशोकोत्पादनापरशोकप्लुताभिनंदादिः शो
कवेदनीयस्य स्वभीतौत्पादनापि भयपरिणाम परभयोत्पादनादिर्भयवेदनीयस्य कुशलक्रियाचा
रजुगुप्सापरिवादशीलत्वादिः जुगुप्सावेदनीयस्य अलीकाभिधायिताऽतिसंधानपरत्वं पररंध्रापेक्षि
त्वप्रवृद्धरागादिः स्त्रीवेदनीयस्य स्तोकक्रोधानुत्सिक्तत्व स्वदारसंतोषादिः पुंवेदनीयस्य प्रचुरकषा
यगुह्येंद्रियव्यपरोपणपरांगनावस्कंदनादिः नपुंसकवेदनीयस्य निर्दिष्टो मोहनीयस्याश्रवभेदः
इदानीं तदनंतरं निर्दिष्टस्यायुषः आश्रवहेतोर्वक्ष्यते आद्यस्य नियतकालपरिपाकस्यायुषः का
रणप्रदर्शनार्थं पदमुच्यते ॥ बह्वारंभपरिग्रहत्वं नारकस्यायुषः १५ ॥ आरंभः प्राणिपीडाहेतु
व्यापारः ममेदं बुद्धिलक्षणः परिग्रहः आरंभाश्च परिग्रहाश्च आरंभपरिग्रहाः बहवः आरंभपरिग्र १२४

हाः बहवः आरंभपरिग्रहा यस्य स बह्वारंभपरिग्रहः तस्य भावः बह्वारंभपरिग्रहत्वं हिंसादिक्रूरकर्मजस्र
प्रवर्तनपरस्वहरणविषयातिगृद्धिकृष्णलेश्याभिजातरौद्रध्यानमरणकालतादिलक्षणः नारकस्यायु
षः आश्रवो भवति आहोस्वित् नारकस्यायुषः आश्रवः तैर्यग्योनस्य इदानीं वक्तव्य इत्यत्रोच्यते ॥
माया तैर्यग्योनस्य १६ ॥ चारित्रमोहकर्मविशेषस्य उदयादाविर्भूतः आत्मनः कुटिलभावो माया
निकृतिः तैर्यग्योनस्यायुषः आश्रवो वेदितव्यः तत्प्रपंचः मिथ्यात्वोपेतधर्मदेशनातिसंधानप्रियता
नीलकापोतलेश्यार्तध्यानमरणकालतादिः आह व्याख्यातस्तैर्यग्योनस्यायुषः आश्रवः इदानीं मानु
षस्यायुषः को हेतुरित्यत्रोच्यते ॥ अल्पारंभपरिग्रहत्वं मानुषस्य १७ ॥ नारकायुराश्रवो व्याख्यातः
तद्विपरीतो मानुषस्यायुषः इति संक्षेपतस्तद्व्यासः विनीतस्वभावः प्रकृतिभद्रता प्रगुणव्यवहारतात
नुकषायत्वं मरणकालासंक्लेशतादिः किमेतावानेव मानुषस्यायुषः आश्रव इत्यत्रोच्यते ॥ स्वभावमा

DR. BHAU DAJI MEMORIAL

१२५ र्द्दवं च ॥ श्री मृदोर्भावमार्द्दवं स्वभावेन मार्द्दवं स्वभावमार्द्दवं उपदेशानपेक्षं इत्यर्थः एतदपि मानुषस्यायु
षः आश्रवः पृथग्योगकरणं किमर्थं उत्तरार्थं देवायुषः आश्रवोऽयमपि यथा स्यात् किमेतदेव द्वितयं
मानुषस्याश्रव नेष्यते श्री निःशीलव्रतत्वं च सर्वेषां श्री चशब्दोधिकृतसमुच्चयार्थः अल्पारंभपरिग्र
हत्वं च निःशीलव्रतत्वं च शीलानि व्रतानि च वक्ष्यंते निःक्रांतः शीलव्रतेभ्यो निःशीलव्रतस्तस्य भा
वः निःशीलव्रतत्वं सर्वेषां ग्रहणं सकलायुराश्रवप्रत्यर्थः किं देवायुषोपि भवति सत्यं भवति
भोगभूमिजापेक्षया अथ चतुर्थस्यायुषः क आश्रव इत्युच्यते श्री सरागसंयमसंयमासंयमाकामनि
र्ज्जराबालतपांसि दैवस्य ॥ श्री सरागसंयमः संयमासंयमश्च व्याख्यातौ अकामनिर्ज्जरा अकामश्चार
कनिरोधबंधबंधनवद्धेषु क्षुत्तृष्णानिरोधब्रह्मचर्यभूशय्यामलधारणपरितापादिः अकामेन निर्ज्जरा
अकामनिर्ज्जरा बालतपो मिथ्यादर्शनोपेतं अनुपायकायक्लेशप्रचुरं निकृतिबहुलव्रतधारणं तान्ये १२५

तानि देवस्यायुषः आश्रवतेतवो वेदितव्याः किमेतावानेव दैवस्यायुषः आश्रवो नेत्याह श्री सम्यक्त्वं
च ॥ श्री किं दैवस्यायुषः आश्रव इत्यनुवर्त्तते अविशेषाभिधानेपि सौधर्म्मादिविशेषगतिः कुतः पृ
थक्करणात् यद्येवं पूर्वसूत्रे उक्त आश्रवविधिरविशेषेण प्रसक्तः तेन सरागसंयमसंयमसंयमाव
पि भवनवास्याद्यायुषः आश्रवौ प्राप्नुतः नैष दोषः सम्यक्त्वाभावे तद्व्यपदेशाभावात् तदुभयमपि अ
त्रांतर्भवति आयुषोनंतरमुद्दिष्टस्य नाम्नः आश्रवविधौ वक्तव्ये तत्राशुभनाम्नः आश्रवप्रतिपत्त्य
र्थमाह श्री योगवक्रताविसंवादनं चाशुभस्य नाम्नः ॥ श्री योगस्त्रिप्रकारो व्याख्यातः तस्य वक्रता
कौटिल्यं विसंवादनमन्यथाप्रवर्त्तनं ननु च नार्थभेदः योगवक्रतैवान्यथाप्रवर्त्तनं सत्यमेव मेतत्स्व
गतायोगवक्रतेत्युच्यते परगतं विसंवादनं सम्यगभ्युदयनिःश्रेयसार्थासु क्रियासु वर्त्तमानमन्यं
तद्विपरीतकायवाङ्मनोभिर्विसंवादयति मैवं कार्षीरेवं कुर्विति एतदुभयमशुभनामकर्म्माश्रव

१२६ कारणं वेदितव्यं चशब्देन मिथ्यादर्शनपैशुन्यास्थिरचित्तताकूटमानतुलाकरणपरनिंदात्मप्रशंसादिः
समुच्चीयते ॥ अथ शुभनामकर्मणः क आश्रव इत्यत्रोच्यते ॥ तद्विपरीतं शुभस्य ॥ कायवाङ्मनसा
मृजुत्वमविसंवादनं च तद्विपरीतं चशब्देन समुच्चितस्य विपरीतं ग्राह्यं धार्मिकदर्शनसंभ्रमसद्भावो
पनयनसंसारभीरुताप्रमादवर्जनादि तदेतच्छुभनामकर्मणः कारणं वेदितव्यं ॥ आह किमेतावा
नेव शुभनाम्नः आश्रवविधिः उत कश्चिदस्ति प्रतिविशेष इत्यत्रोच्यते यदिदं तीर्थकरनामकर्मानं
तानुपमप्रभावमचिंत्यविभूतिविशेषकारणं त्रैलोक्यविजयकरं तस्याश्रवविधिविशेषोस्तीति य
द्येवमुच्यतां के तस्याश्रवाः इत्यत इदमारभ्यते ॥ दर्शनविशुद्धिर्विनयसंपन्नता शीलव्रतेष्वन
तिचारोभीक्ष्णज्ञानोपयोगसंवेगौ शक्तितस्त्यागतपसी साधुसमाधिर्वैयावृत्त्यकरणमर्हदाचार्य
बहुश्रुतप्रवचनभक्तिरावश्यकापरिहाणिर्मार्ग्गप्रभावनाप्रवचनवत्सलत्वमिति तीर्थकरत्वस्य ॥ १२६

जिनेन भगवता परमेष्ठिना उपदिष्टे निर्ग्रंथलक्षणे मोक्षवर्त्मनि रुचिर्दर्शनविशुद्धिः प्रागुक्तलक्षण
तस्याष्टावंगानि निःशंकितत्वं निःकांक्षिता विचिकित्साविरहता अमूढदृष्टिता उपबृंहणं स्थितिक
रणं वात्सल्यं प्रभावनं चेति सम्यग्ज्ञानादिषु मोक्षसाधनेषु तत्साधनेषु च गुर्वादिषु स्वयोग्यवृत्त्या स
त्कार आदरो विनयः तेन संपन्नता विनयसंपन्नता अहिंसादिषु व्रतेषु तत्प्रतिपालनार्थेषु च क्रोध
वर्जनादिषु शीलेषु निरवद्या वृत्तिः शीलव्रतेष्वनतिचारः जीवादिपदार्थस्वतत्त्वविषये सम्यग्ज्ञा
ने नित्ययुक्तता अभीक्ष्णज्ञानोपयोगः संसारदुःखान्नित्यभीरुता संवेगः त्यागो दानं तत्त्रिविधं
माहारदानमभयदानं ज्ञानदानं चेति तच्छक्तितः यथाविधि प्रयुज्यमानं त्याग इत्युच्यते अनिगू
हितवीर्यस्य मार्गाविरोधी कायक्लेशः तपः यथा भाण्डागारे दहने समुत्थिते तत्प्रशमनमनुष्ठीयते ब
हूपकारत्वात्तथानेकव्रतशीलसमृद्धस्य मुनेस्तपसः कुतश्चित्प्रत्यूहे समुपस्थिते तत्संधारणं समा

१२७ ष्विंगुणवद्दुःखोपनिपाते निरवद्येन विधिना तदपहरणं वैयावृत्त्यं अर्हदाचार्येषु बहुश्रुतेषु प्रवचने
च भावविशुद्धियुक्तोऽनुरागो भक्तिः षण्णामावश्यकक्रियाणां यथाकालप्रवर्तनमविश्यकापरिहाणिः
ज्ञानतपोदानजिनपूजाविधिना धर्मप्रकाशनं मार्गप्रभावना वत्से धेनुवत्सधर्म्मणि स्नेहः प्रवचन
वत्सलत्वं तान्येतानि षोडशकारणानि सम्यग्व्यस्तानि व्यस्तानि समस्तानि च तीर्थकरनामक
र्म्माश्रवकारणानि प्रत्येतव्यानि इदानीं नामाश्रवाभिधानानन्तरं गोत्राश्रवे वक्तव्ये सति नीचैर्गोत्र
स्याश्रवविधानार्थमिदमाह ॥ परात्मनिंदाप्रशंसे सदसद्गुणोच्छादनोद्भावने च नीचैर्गोत्रस्य
॥ तथ्यस्यातथ्यस्य च दोषस्योद्भावनं प्रतीच्छा निंदा गुणोद्भावनाभिप्रायः प्रशंसा यथास
ख्यमिति संबंधः परनिंदात्मप्रशंसेति प्रतिबंधकहेतुसन्निधाने सति अनुद्भूतवृत्तितानाविर्भा
वः उच्छादनं प्रतिबंधकाभावे प्रकाशितवृत्तिता उद्भावनं अत्रापि च यथाक्रममभिसंबंधः सद्गुणोच्छा १२७

व

दनं असद्गुणोद्भावनमिति तान्येतानि नीचैर्गोत्रस्याश्रवकारणानि वेदितव्यानि ॥ अथोच्चैर्गोत्रस्य कश्चा
श्रवविधिरित्यत्रोच्यते ॥ तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य ॥ तदित्यनेन प्रत्यासन्नो नीचैर्गोत्राश्रवः
प्रतिनिर्दिश्यते अन्येन प्रकारेण वृत्तिर्विपर्ययस्तस्य विपर्ययस्तद्विपर्ययः कः पुनरसौ आत्मनिंदापर
प्रशंसासद्गुणोद्भावनमसद्गुणोच्छादनं च गुणोत्कृष्टेषु विनयेनावनतिः नीचैर्वृत्तिः विज्ञानादिभिरुत्कृ
ष्टस्यापि सतः तत्कृतमदविरहोऽनहंकारता अनुत्सेकः तान्येतानि उत्तरस्योच्चैर्गोत्रस्याश्रवकारणा
नि भवंति अथ गोत्रानंतरमुद्दिष्टस्यांतरायस्य क आश्रव इत्यत्रोच्यते ॥ विघ्नकरणमंतरायस्य २७
॥ दानादीनां दानलाभभोगोपभोगवीर्याणां वेत्यत्र तेषां विहननं विघ्नः विघ्नस्य करणं विघ्न
करणं अंतरायस्याश्रवविधिर्वेदितव्यः अत्र चोद्यते तत्प्रदोषनिह्नवादयो ज्ञानदर्शनावरणादीनां
प्रतिनियता आश्रवहेतवो वर्णिताः किं ते प्रतिनियतज्ञानावरणाद्याश्रवहेतवः एव उताविशेषेणेति

यदि प्रतिनियतज्ञानावरणाद्याश्रवहेतवएव आगमविरोधः अंहस्यते आगमेहिसप्तकर्म्माणि आयुर्व
र्ज्यानि प्रतिक्षणं युगपदाश्रवंतिइत्युक्तं तद्विरोधः स्यात् अथाविशेषेण आश्रवहेतुर्विशेषनिर्देशोना
र्थकइति अत्रोच्यते यद्यपि तत्प्रदोषादिभिर्ज्ञानावरणादीनां सर्व्वासां कर्म्मप्रकृतीनां प्रदेशबंधनिय
मो नास्ति तथापि अनुभागनियमहेतुत्वेन तत्प्रदोषनिह्नवादयो विभज्यंते श्री इति तत्त्वार्थवृत्तौ सर्वार्थ
सिद्धिसंज्ञिकायां षष्ठोऽध्यायः समाप्तः ६ ॥ श्री आश्रवपदार्थो व्याख्यातः श्री तत्प्रारंभकाले एवमु
क्तं शुभः पुण्यस्येति तत्सामान्येनोक्तं तद्विशेषप्रतिपत्त्यर्थं कः पुनः शुभ इत्यत इदमुच्यते श्री हिं
सानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतं १ श्री प्रमत्तयोगात्प्राणव्यपरोपणं हिंसेत्येवमादिभिः सूत्रैर्हिं
सादयो निर्दिश्यंते तेभ्यो विरमणं विरतिर्व्रतमित्युच्यते व्रतमभिसंधिकृतो नियमः इदं कर्त्तव्यमिदं न कर्त्त
व्यमिति वा ननु च हिंसादयः परिणामविशेषाः अध्रुवाः कथं तेषामपादानत्वं उच्यते बुद्ध्यपाये ध्रुव १२८

त्वविवक्षोपपत्तेः यथा धर्म्माद्विरमतीत्यत्र य एष मनुष्यः संभिन्नबुद्धिः स पश्यति दुष्करो धर्म्मः फलं चास्य श्र
द्धामात्रगम्यमिति संबुद्ध्या संप्राप्य निवर्त्तते एवमिहापि य एष मनुष्यः प्रेक्षापूर्वकारी स पश्यति य ए
ते हिंसादयः परिणामास्ते पापहेतवः पापकर्म्मणि प्रवर्त्तमानानिहैव राजानो दंडयंति परत्र च दुःख
मवाप्नुवंतीति संबुद्ध्या संप्राप्य निवर्त्तते ततो बुद्ध्या ध्रुवत्वविवक्षोपपत्तेः अपादानत्वं युक्तं विरतिशब्दः
प्रत्येकं परिसमाप्यते हिंसाया विरतिः अनृताद्विरतिः इत्येवमादि तत्र अहिंसाव्रतमादौ क्रियते प्रधान
त्वात् सत्यादीनि हि तत्परिपालनार्थानि सस्यस्य वृत्तिपरिक्षेपवत् सर्व्वसावद्यनिवृत्तिलक्षणसामा
यिकापेक्षया एकं व्रतं तदेव छेदोपस्थापनापेक्षया पंचविधमिहोच्यते ननु चास्य व्रतस्याश्रवहेतुत्व
मनुपपन्नं संवरहेतुष्वंतर्भावात् संवरहेतवो वक्ष्यंते गुप्तिसमित्यादयः तत्र दशविधधर्मे संयमे वा
व्रतानामंतर्भाव इति नैष दोषः तत्र संवरो निवृत्तिलक्षणो वक्ष्यते प्रवृत्तिश्चात्र दृश्यते हिंसानृतादत्ता

१२९ दानादिपरिहारोणेऽहिंसासत्यवचनदत्तादानादिक्रियाप्रतीतेः गुप्त्यादिसंवरपरिकर्म्म चाद्यव्रतेषु हि छत
परिकर्म्मसाधकः सुखेन संवरं करोतीति ततः पृथक्त्वेनोपदेशः क्रियते ननु च षष्ठमणुव्रतमस्ति रात्रिभो
जनविरमणं तदिहोपसंख्यातव्यं न भावनास्वंतर्भावात् अहिंसाव्रतभावनासु हि वक्ष्यते आलोकितपा
नभोजनभावना कार्येति तस्य पंचतयस्य व्रतभेदप्रतिपत्त्यर्थमाह श्री देशसर्वतोणुमहती श्री
देशएकदेशः सर्वः सकलदेशश्च सर्वश्च देशसर्वौ ताभ्यां देशसर्वतः विरतिरित्यनुवर्त्तते अणुच म
हच्च अणुमहती व्रतानीति संबंधान्नपुंसकलिंगनिर्देशः यथासंख्यमभिसंबध्यते देशतो विरतिरणुव्र
तं सर्वतो विरतिर्महाव्रतमिति द्विविधानि द्युते व्रतं प्रत्येकं एतानि व्रतानि भावितानि वरौषधवत्
दुःखनिवृत्तिनिमित्तानि भवंति किमर्थं कथं वा भावना भवनं तेषामत्रोच्यते श्री तत्स्थैर्यार्थं भावनाः पं
च पंच ३ श्री तेषां व्रतानां स्थिरीकरणाय एकैकस्य व्रतस्य पंच पंच भावनाः वेदितव्याः यद्येवमाद्यस्याहिं १२९

सा व्रतस्य का भावनाः इत्यत्रोच्यते श्री वाङ्मनोगुप्तीर्यादाननिक्षेपणसमित्यालोकितपानभोजनानि पंच ४
वाग्गुप्तिः मनोगुप्तिः ईर्यासमितिः आदाननिक्षेपणसमितिः आलोकितपानभोजनमित्येताः पंचाहिं
साव्रतस्य भावनाः अथ द्वितीयस्य व्रतस्य का इत्यत्रोच्यते श्री क्रोधलोभभीरुत्वहास्यप्रत्याख्यानान्यनु
वीचीभाषणं च ५ क्रोधप्रत्याख्यानं लोभप्रत्याख्यानं भीरुत्वप्रत्याख्यानं हास्यप्रत्याख्यानं अनुवीचीभा
षणं चेत्येताः पंच भावनाः सत्यव्रतस्य ज्ञेयाः अनुवीचीभाषणं निरवद्यानुभाषणमित्यर्थः इदानीं तृती
यस्य व्रतस्य का भावनाः इत्यत्र आह श्री शून्यागारविमोचितावासपरोपरोधाकरणभैक्ष्यशुद्धिसध
र्म्माविसंवादाः ६ पंच शून्यागारेषु गिरिगुहातरुकोटरादिष्वावासः परकीयेषु च विमोचितेष्वावासः परेषा
मुपरोधाकरणं आचारशास्त्रमार्गेण भैक्ष्यशुद्धिः ममेदं तवेदमिति सधर्म्मभिरविसंवादः इत्येताः पं
च अदत्तादानविरमणव्रतस्य भावनाः अथेदानीं ब्रह्मचर्यव्रतस्य भावनाः वक्तव्या इत्यत आह श्री

Dr. BHAU DAJI MEMORIAL

१३० स्त्रीरागकथाश्रवणतन्मनोहरांगनिरीक्षणपूर्वरतानुस्मरणवृष्येष्टरसस्वशरीरसंस्कारत्यागाः पंच सा
गशाः प्रत्येकं परिसमाप्यते स्त्रीरागकथाश्रवणत्यागस्तन्मनोहरांगनिरीक्षणत्यागः पूर्वरतानुस्मरण
त्यागः वृषेष्टरसत्यागः स्वशरीरसंस्कारत्यागश्चेति चतुर्थव्रतस्य भावनाः पंच विज्ञेयाः अथ पंचमव्रत
स्य भावनाः काइत्यत्रोच्यते ॥ मनोज्ञामनोज्ञेंद्रियविषयरागद्वेषवर्जनानि पंच ॥ पंचानामिंद्रि
याणां स्पर्शनादीनामिष्टानिष्टेषु विषयेषु पनिपतितेषु स्पर्शादिषु रागद्वेषवर्जनानि पंच अकिंच
न्यस्य व्रतस्य भावनाः प्रत्येतव्याः किंचान्यत् यथामीषां व्रतानां दृढिमार्थं भावनाः प्रतीयंते तद्विपक्ष
ष्विति भावनोपदेशास्तथा तदर्थं तद्विरोधिष्वपायाह ॥ हिंसादिष्विहामुत्रापायावद्यदर्शनं ॥
अभ्युदयनिःश्रेयसार्थानां क्रियाणां विनाशकः प्रयोगोऽपायः अवद्यं गर्ह्यं अपायश्च अवद्यं च अपायाव
द्ये तयोर्दर्शनमपायावद्यदर्शनं भावयितव्यं क्व इहामुत्र च केषु हिंसादिषु कथमिति चे उच्यते हिंसा १३०

यां तावत् हिंस्रो हि नित्योद्वेजनीयः सततानुबद्धवैरश्च इह च वधबंधपरिक्लेशादीन्प्रतिलभते प्रेत्य चाऽशु
भां गतिं गर्हितश्च भवतीति हिंसाया व्युपरमः श्रेयान् तथाऽनृतवादी अश्रद्धेयो भवति इहैव च जिह्वा
छेदादीन् प्रतिलभते मिथ्याभ्याख्यानदुःखितेभ्यश्च बद्धवैरेभ्यो बहूनि व्यसनानि प्राप्नोति प्रेत्य चाशु
भां गतिं गर्हितश्च भवतीत्यनृतवचनाद्व्युपरमः श्रेयांस्तथा स्तेनः परद्रव्यहरणाशक्तः सर्वस्योद्वेजनीयो
भवति इहैव चाभिघातवधबंधहस्तपादकर्णनासोत्तरौष्ठच्छेदनभेदनसर्वस्वहरणादीन्प्रतिलभते
प्रेत्य चाशुभां गतिं गर्हितश्च भवतीति स्तेयाद्व्युपरतिः श्रेयसी तथाऽब्रह्मचारी मदविभ्रमोद्भ्रांतचि
त्तः वनगज इव वासितां वंचितो विवशो वधबंधनपरिक्लेशानऽनुभवति मोहाभिभूतत्वाच्च कार्याकार्या
ऽनभिज्ञो न किंचित्कुशलं समाचरति परांगनालिंगनसंगकृतरतिश्चेहैव वैरानुबंधिनः लिंगछेदन
वधबंधसर्वस्वहरणादीनऽपायान्प्राप्नोति प्रेत्य चाशुभां गतिमश्नुते गर्हितश्च भवति अतो विरतिरात्महि

१३१ तात्तथापरिग्रहवान् शकुनिरिव गृहीतमांसखंडः अन्येषां तदर्थिनां पतत्रिणामिहैव तस्करादीनामभि
भवनीयो भवति तदर्जनरक्षणप्रक्षयकृतांश्च दोषान् बहून् अवाप्नोति न चास्य तृप्तिर्भवति इंधनैरिवाग्नेः
लोभाभिभूतत्वाच्च कार्याकार्यानपेक्षो भवति प्रेत्य चाशुभां गतिमास्कंदति लुब्धोयमिति गर्हितश्च भवती
ति तद्विरमणं श्रेयः एवं हिंसादिष्वपायावद्यदर्शनं भावनीयं हिंसादिषु भावनांतरप्रतिपादनार्थमाह
श्री दुःखमेव वा ॰ श्री हिंसादयो दुःखमेवेति भावयितव्याः कथं हिंसादयो दुःखं दुःखकारणत्वाद्यथा
अन्नं वै प्राणा इति कारणकारणत्वाद्वा यथा धनं प्राणा इति धनकारणमन्नपानं अन्नपानकारणाः प्रा
णा इति तथा हिंसादयो असद्वेद्यकर्मकारणं असद्वेद्यकर्म च दुःखकारणमिति दुःखकारणे दुःखका
रणे वा दुःखोपचारः त   देते दुःखमेवेति भावनापरात्मसाक्षिकमवगंतव्यं ननु च न तत्सर्वं दुःखमेव
विषयरतिसुखसद्भावात् न तत्सुखं वेदनाप्रतीकारत्वात् कच्छूकंडूयनवत् पुनरपि भावनार्थमाह श्री १३१

मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानि च सत्त्वगुणाधिकक्लिश्यमानाविनयेषु ॰ श्री परेषां दुःखानुत्पत्त्यभिलाषो
मैत्री वदनप्रसादादिभिरभिव्यज्यमानांतर्भक्तिरागः प्रमोदः दीनानुग्रहभावः कारुण्यं रागद्वेषपूर्वकपक्ष
पाताभावो माध्यस्थ्यं दुःकर्म्मविपाकवशान्नानायोनिषु सीदंतीति सत्त्वा जीवाः सम्यक्ज्ञानादिभिः प्रकृ
ष्टाः गुणाधिकाः असद्वेद्योदयापादितक्लेशाः क्लिश्यमानाः तत्त्वार्थश्रवणग्रहणाभ्यामसंपादितगुणाः
अविनेयाः एतेषु सत्त्वादिषु यथासंख्यं मैत्र्यादीनि भावयितव्यानि सर्वसत्त्वेषु मैत्री गुणाधिकेषु प्रमो
दः क्लिश्यमानेषु कारुण्यं अविनेयेषु माध्यस्थ्यमिति एवं भावयतः पूर्णान्यहिंसादीनि व्रतानि भवं
ति पुनरपि भावनांतरमाह श्री जगत्कायस्वभावौ वा संवेगवैराग्यार्थं ॰ जगत्स्वभावस्तावत् अनादि
रनिधनः वेत्रासनझल्लरीमृदंगनिभः अत्र जीवा अनादिसंसारे अनंतकालं नानायोनिषु दुःखं भोजं
भोजं पर्यटंति न चात्र किंचिन्नियतमस्ति जलबुद्बुदोपमं जीवितं विद्युन्मेघादिविकाराश्चपला भोगसंपद इ

१३२ त्येवमादिजगत्स्वभावचिंतनात्संसारात्संवेगो भवति कायस्वभावश्च अनित्यता दुःखहेतुत्वं निःसारताऽ
शुचित्वमित्येवमादिकायस्वभावचिंतनाद्विषयरागनिवृत्तेर्वैराग्यमुपजायत इति जगत्कायस्वभावौ भा
वयितव्यौ अत्राह उक्तं भवता हिंसादिनिवृत्तिर्व्रतमिति तत्र न जानीमः के हिंसादयः क्रियाविशेषा इ
त्यत्रोच्यते युगपद्वक्तुमशक्यत्वात्तल्लक्षणनिर्देशस्य क्रमप्रसंगे याऽसावादौ चोदिता सैव तावत् श्री
५ प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा १३ श्री प्रमादः सकषायत्वं तद्वानात्मपरिणामः प्रमत्तः प्रमत्तस्य योगः प्रमत्तयो
गस्तस्मात्प्रमत्तयोगात् इंद्रियादयो दश प्राणाः तेषां यथासंभवं व्यपरोपणं वियोगकरणं हिंसा इत्य
भिधीयते सा प्राणिनो दुःखहेतुत्वादधर्महेतुत्वादधर्महेतुः प्रमत्तयोगादिति विशेषणं केवलं प्रा
णव्यपरोपणं नाधर्मायेति ज्ञापनार्थं उक्तं च वियोजयति चासुभिर्न च वधेन संयुज्यत इति उक्तं च
उच्चालिदम्मि पादे इरियासमिदस्स णिग्गमट्ठाणे आवादिज्ज कुलिंगो मरिज्ज तं जोगमासिज्ज ण हि तस्स १३२

तण्णिमित्तो बंधो सुहुमो वि देसिदो समये मुच्छा परिग्गहो च्चिय अज्झप्पपमाणदो भणिदो न च प्राणव्य
परोपणाभावेऽपि प्रमत्तयोगमात्रादेव हिंसेष्यते उक्तं च मरदु व जियदु व जीवो अयदाचारस्स णिच्छिदा हिं
सा पयदस्स णत्थि बंधो हिंसामित्तेण समिदस्स इति नैष दोषः तत्रापि प्राणव्यपरोपणमस्ति भावल
क्षणं तथा चोक्तं स्वयमेवात्मनात्मानं हिनस्त्यात्मा प्रमादवान् पूर्वं प्राण्यंतराणां तु पश्चात्स्याद्वा न वा व
ध इति आह अभिहितलक्षणा हिंसा तदनंतरोद्दिष्टमनृतं किंलक्षणमित्यत्रोच्यते श्री असदभिधा
नमनृतं १४ श्री सच्छब्दः प्रशंसावाची न सत् असत् अप्रशस्तमिति यावत् असतोऽर्थस्याभिधानमसद
भिधानमनृतं ऋतं सत्यं न ऋतमनृतं किं पुनः अप्रशस्तं प्राणिपीडाकरं यत्तदप्रशस्तं विद्यमानार्थवि
षयं वा अविद्यमानार्थविषयं वा उक्तं च प्रागेवाहिंसाव्रतपरिपालनार्थमितरद्व्रतमिति तस्माद्धिंसा
कारं वचः अनृतमिति निश्चेयं अथानृतानंतरमुद्दिष्टं यत्स्तेयं तस्य किं लक्षणमित्यत आह श्री अदत्ता

१३३ दानं स्तेयं[१५] श्री आदानं ग्रहणं अदत्तस्यादानं अदत्तादानं स्तेयमित्युच्यते यद्येवं कर्मग्रहणमपि स्ते
यं प्राप्नोति अन्येनादत्तत्वात् नैष दोषः दानादाने यत्र संभवतः तत्रैव स्तेयव्यवहारः कुतः अदत्तग्र
हणसामर्थ्यात् एवमपि भिक्षोर्ग्रामनगरादिषु भ्रमणकाले रथ्याद्वारादिप्रवेशात् अदत्तादानं प्राप्नो
ति नैष दोषः सामान्येनोक्तत्वात् तथा ह्ययं भिक्षुः पिहितद्वारादिषु न प्रविशति अयुक्तत्वात् अथवा
प्रमत्तयोगादित्यनुवर्तते प्रमत्तयोगाददत्तादानं यत्तत्स्तेयमित्युच्यते न रथ्यादिप्रविशतः प्रमत्तयो
गोऽस्ति तेनैतदुक्तं भवति यत्र संक्लेशपरिणामेन प्रवृत्तिः तत्र स्तेयं भवति बाह्यवस्तुनः ग्रहणे चाग्रह
णे च अथ चतुर्थमब्रह्म तस्य किं लक्षणमित्यत्रोच्यते श्री मैथुनमब्रह्म[१६] श्री स्त्रीपुंसयोश्चारित्रमो
होदये सति रागपरिणामाविष्टयोः परस्परस्पर्शनं प्रति इच्छा मिथुनं मिथुनस्य कर्म मैथुनमित्युच्य
ते न सर्वं कर्म कुतः लोके शास्त्रे च तथा प्रसिद्धेः लोके तावदा गोपालादिप्रसिद्धं स्त्रीपुंसयो रागपरिणा १३३

मनिमित्तं चेष्टितं मैथुनमिति शास्त्रेऽपि अश्ववृषभयोर्मैथुनेच्छायां इत्येवमादिषु तदेव गृह्यते अपि च प्र
मत्तयोगादित्यनुवर्तते तेन स्त्रीपुंसमिथुनविषयं रतिसुखार्थं चेष्टितं मैथुनमिति गृह्यते न सर्वं अहिंसा
दयो गुणाः यस्मिन्परिपाल्यमाने बृंहन्ति वृद्धिमुपयान्ति तद्ब्रह्म न ब्रह्म अब्रह्म इति किं तत् मैथुनं तत्र हिंसा
दयो दोषाः पुष्यन्ति यस्मान्मैथुनसेवनप्रवणः स्थास्नुचरिष्णुप्राणिनो हिनस्ति मृषावादमाचष्टे अदत्त
मादत्ते अचेतनमितरं च परिग्रहं गृह्णाति अथ पञ्चमस्य परिग्रहस्य किं लक्षणमित्यत्रोच्यते श्री मूर्छा
परिग्रहः[१७] श्री मूर्छेत्युच्यते केयं मूर्छा बाह्यानां गोमहिषमणिमुक्ताफलादीनां चेतनाचेतनानामभ्यन्तराणां च रा
गादीनामुपधीनां संरक्षणार्जनसंस्कारादिलक्षणा व्यावृत्तिर्मूर्छा ननु च लोके वातादिप्रकोपविशेषस्य
मूर्छेति प्रसिद्धिरस्ति तद्ग्रहणं कस्मान्न भवति सत्यमेवैतत् मूर्छिरयं मोहसामान्ये वर्तते सामान्यचोद
नाश्च विशेषेष्ववतिष्ठन्त इत्युक्ते विशेषे व्यवस्थितः परिगृह्यते परिग्रहप्रकरणात् एवमपि बाह्यस्य

१३४ परिग्रहत्वं प्राप्नोतिनैषदोषः आध्यात्मिकस्यसंग्रहात् सत्यमेवमेतत् प्रधानत्वात् अभ्यंतरएवसंगृहीतः असत्य
स्यपिबाह्येममेदमितिसंकल्पवान् सपरिग्रहएवभवति अथवाह्यः परिग्रहोनभवत्येवभवतिचमूर्छा
कारणत्वाद्यदिममेदमितिसंकल्पपरिग्रहः संज्ञानाद्यपिपरिग्रहः प्राप्नोतितदपिममेदमितिसंकल्प्य
ते रागादिपरिणामवत् नैषदोषः प्रमत्तयोगादित्यनुवर्तते ज्ञानदर्शनचारित्रवतोऽप्रमत्तस्यमो
हाभावात् नमूर्छास्तीतिनिःपरिग्रहत्वंसिद्धं किंचितेषांज्ञानादीनामहेयत्वात् आत्मस्वभावत्वादपरि
ग्रहत्वंरागादयः पुनः कर्मोदयतंत्राइति अनात्मस्वभावत्वात्हेयास्ततः तेषुसंकल्पः परिग्रहइतियुज्य
तेतन्मूलाः सर्वेदोषाममेदमितिहिसतिसंकल्पेसंरक्षणादयः संजायंतेतत्रचहिंसाऽवश्यंभाविनीतद
र्थमनृतंजल्पति चौर्यंवाचरतिमैथुनेचकर्मणिप्रयतते तत्प्रभवाः नरकादिषुदुःखप्रकाराः १३४
एवमुक्तेनक्रमेणहिंसादिदोषदर्शिनः अहिंसादिगुणाहितचेतसः परमप्रयत्नस्यअहिंसादीनिव्रता

निपरस्संतिसः श्री निःशल्योव्रती श्री शृणातिहिनस्तीतिशल्यंशरीरानुप्रवेशिकांडादिप्रहरणं
शल्यमिवशल्यं यथातत्प्राणिनोबाधाकरंतथाशारीरमानसबाधाहेतुत्वात् कर्मोदयविकारः श
ल्यमित्युपचर्यते तत्त्रिविधं मायाशल्यंनिदानशल्यंमिथ्यादर्शनशल्यमिति मायानिकृतिर्वंचना
निदानंविषयभोगाकांक्षा मिथ्यादर्शनमतत्वश्रद्धानं एतस्मात्त्रिविधाच्छल्यान्निःक्रांतोनिःशल्योव
तीत्युच्यते अत्रचोद्यते शल्याभावात्निःशल्यः व्रताभिसंबंधात्व्रतीनभिन्न निःशल्यत्वात्व्रतीभ
वितुमर्हति नहिदेवदत्तोदंडसंबंधात्छत्रीभवतीति अत्रोच्यते उभयविशेषणविशिष्टस्येष्टत्वात् न
हिंसाद्युपरतिमात्रव्रतसंबंधात् व्रतीभवत्यंतरेणशल्याभावेसतिशल्यापगमेव्रतसंबंधात् व्रतीवि
वक्षितोयथाबहुक्षीरघृतोगोमानितिव्यपदिश्यते बहुक्षीरघृताभावात्सतीष्वपिगोषुनगोमांस्तथा
सशल्यत्वात् सत्स्वपिव्रतेषुनव्रती यस्तुनिःशल्यः सव्रतीतस्यभेदप्रतिपत्त्यर्थमाह श्री अगार्यनगार

DR. BHAU DAJI MEMORIAL

१३५ श्री॰श्री प्रतिश्रयार्थिभिरंगपतइति अगारं वेश्मतद्वानगारी न विद्यते अगारमस्येत्यनगारः द्विविधो व्र
ती अगारी अनागारश्चेति ननु चात्र विपर्ययोपि प्राप्नोति शून्यागारदेवकुलाद्यावासस्य मुनेरगारित्वं अ
निवृत्तविषयतृष्णस्य कुतश्चित्कारणात् गृहं विमुच्य वने वसतः अनागारत्वं च प्राप्नोति नैष दोषो भावागा
रस्य विवक्षितत्वात् चारित्रमोहोदये सति अगारसंबंधं प्रति अनिवृत्तिपरिणामः भावागारमित्युच्यते
स यस्यास्ति सो वगारी वने वसन्नपि गृहे वसन्नपि तदभावादनगार इति च भवति ननु चागारिणो व्रतित्वं न
प्राप्नोति असकलव्रतित्वात् नैष दोष नैगमादिनयापेक्षया अगारिणो व्रतित्वमुपपद्यते नगरावासव
त् यथा गृहे अपवरके वा वसन्नपि नगरावास इत्युच्यते तथा असकलव्रतोपि नैगमसंग्रहव्यवहा
रनयापेक्षया व्रतीति व्यपदिश्यते अत्राह किं हिंसादीनां अन्यतमस्माद्यः प्रतिनिवृत्तः स खल्वगारी
व्रती नैवं किं तर्हि पंचतय्या अपि विरतेः वैकल्येन विवक्षित इत्युच्यते श्री अणुव्रतोगारी श्री अणु १३५

शब्दो अल्पवचनः अणूनि व्रतान्यस्य अणुव्रतोगारीत्युच्यते कथमस्य व्रतानामणुत्वं सर्वसावद्यनि
वृत्त्यसंभवात् कुतस्तर्हि असौ निवृत्तः त्रसप्राणिव्यपरोपणान्निवृत्तः अगारीत्याद्यमणुव्रतं स्नेहमोहा
दिवशात् गृहविनाशे ग्रामविनाशे वा कारणमित्यभिमतादसत्यवचनान्निवृत्तो गृहीति द्वितीयमणु
व्रतं अन्यपीडाकरं पार्थिवभयादिवशादवश्यं परित्यक्तमपि यददत्तं ततः प्रतिनिवृत्तादरः श्रावक
इति तृतीयमणुव्रतं उपात्ताया अनुपात्तायाश्च परांगनायाः संगान्निवृत्तरतिः गृहीति चतुर्थमणुव्रतं
धनधान्यक्षेत्रादीनां इच्छावशात् कृतपरिच्छेदः गृहीति पंचममणुव्रतं आहापरिसमाप्तागारस्य किमेता
वानेव विशेषः आहोस्विदस्ति कश्चिदन्योपीत्यत आह श्री दिग्देशानर्थदंडविरतिसामायिक
प्रोषधोपवासोपभोगपरिभोगपरिमाणातिथिसंविभागव्रतसंपन्नश्च विरतिशब्दः प्रत्येकं परिसमाप्य
ते दिग्विरतिः देशविरतिः अनर्थदंडविरतिः एतानि त्रीणि गुणव्रतानि व्रतशब्दस्य प्रत्येकमभिसंबंधा

१३६ त् तथा सामायिकव्रतं प्रोषधोपवासव्रतं उपभोगपरिभोगपरिमाणव्रतं अतिथिसंविभागव्रतमिति ए
तानि चत्वारि शिक्षाव्रतानि एतैर्व्रतैः संपन्नो गृही विरताविरत इत्युच्यते तद्यथा दिक्प्राच्यादिस्तत्र प्र
सिद्धैरभिज्ञानैरवधिं कृत्वा नियमनं दिग्विरतिव्रतं ततो बहिः त्रसस्थावरव्यपरोपणनिवृत्तेः महाव्रतत्व
मवसेयं तत्र लाभे सत्यपि परिणामस्य निवृत्तेः लोभनिराशश्च कृतो भवति ग्रामादीनामवधृतपरिमाणः
प्रदेशो देशः ततो बहिर्निवृत्तिः देशविरतिव्रतं पूर्ववत् बहिर्महाव्रतत्वं व्यवस्थाप्यं असत्युपका
रे पापादानहेतुरनर्थदंडः ततो विरतिरनर्थदंडविरतिः अनर्थदंडः पंचविधः अपध्यानं पापोपदेशः
प्रमादाचरितं हिंसाप्रदानं अशुभश्रुतिरिति तत्र परेषां जयपराजयवधबंधनांगच्छेदसर्वस्वहरणादिकं कथं स्या
दिति मनसा चिंतनमपध्यानं वणिकपाशलिवधकार्यारंभादिषु पापसंयुक्तं वचनं पापोपदेशः प्रयोज
नमंतरेण वृक्षादिछेदनभूमिकुट्टनसलिलसेचनाद्यवद्यकर्म प्रमादाचरितं विषकंटकशस्त्राग्निर १३६

ज्जुकंसार्दडादिहिंसोपकरणप्रदानं हिंसाप्रदानं हिंसारागादिप्रवर्धनदुष्टकथाश्रवणशिक्षण
व्यापृतिरशुभश्रुतिः समेकीभावे वर्तते तद्यथा संगतं घृतं संगतं तैलमित्युच्यते एकीभूतमिति
गम्यते एकत्वेन अयनं गमनं समयः समय एव सामायिकं समयः प्रयोजनमस्येति वा विगृह्य सा
मायिकं इयति देशे एतावति काले इत्यवधारिते सामायिके स्थितस्य महाव्रतत्वं पूर्ववद्वेदितव्यं
कुतः अणुस्थूलकृतहिंसादिनिवृत्तेः संयमप्रसंग इति चेत् न तद्घातिकर्मोदयसद्भावात् महाव्र
तत्वाभाव इति चेत् न तत्र उपचाराद्राजकुले सर्वगतचैत्राभिधानवत् प्रोषधशब्दः पर्वपर्यायवाची श
ब्दादिग्रहणं प्रति निवृत्तौत्सुक्यानि पंचापीन्द्रियाण्युपेत्य तस्मिन्वसंतीत्युपवासः चतुर्विधाहार
परित्याग इत्यर्थः प्रोषधे उपवासः प्रोषधोपवासः स्वशरीरसंस्कारकारणस्नानगंधमाल्याभरणादिवि
रहितः शुचावकाशे साधुनिवासे चैत्यालये स्वप्रोषधोपवासगृहे वा धर्मकथाश्रवणश्रावणचिंतना

१३१ बहितांतःकरणःसन्नुपवसेत निरारंभः श्रावकः उपभोगः असनपानगंधमाल्यादिः परिभोगः आछाद
नप्रावरणालंकारशयनासनगृहयानवाहनादिः तयोः परिमाणमुपभोगपरिभोगपरिमाणं मधुमां
संमद्यंचसदापरिहर्त्तव्यं त्रसघातान्निवृत्तचेतसा केतक्यर्जुनपुष्पादीनि बहुघाताल्पफलत्वात् या
नवाहनाभरणादिषु एतावदेवेष्टं अतोऽन्यदनिष्टान्निवर्त्तनं कर्त्तव्यं कालनियमेन यावज्जीवं वा यथा
शक्तिः संयममविनाशयन्नततीत्यतिथिः अथवा नास्य तिथिरस्तीत्यतिथिः अनियतकालागमन इ
त्यर्थः अतिथये संविभागः अतिथिसंविभागः स चतुर्विधः भिक्षोपकरणौषधप्रतिश्रयभेदात् मोक्षा
र्थमभ्युद्यतायातिथये संयमपरायणाय शुद्धचेतसा निरवद्या भिक्षा देया धर्मोपकरणानि च स
म्यग्दर्शनाद्युपबृंहणानि दातव्यानि औषधमपि योग्यमुपयोजनीयं प्रतिश्रयश्च परमधर्मश्रद्धया प्र
तिपादयितव्य इति चशब्दो वक्ष्यमाणगृहस्थधर्मसमुच्चयार्थः का पुनरसौ मारणांतिकी सल्लेखनां जोषि १३१

२२ ता स्वपरिणामोपात्तस्यायुषः इंद्रियाणां बलानां च कारणवशात्संक्षयो मरणं अंतग्रहणं तद्भवमरणप्रति
पत्यर्थं मरणमंतः मरणांतः मरणांतः स प्रयोजनमस्या इति मारणांतिकी सम्यक्कायकषायलेखना सल्ले
खना कायस्य बाह्यस्याभ्यंतराणां च कषायाणां तत्कारणहापनया क्रमेण सम्यग्लेखना सल्लेखना तां मा
रणांतिकीं सल्लेखनां जोषिता सेविता गृहीत्यभिसंबध्यते ननु च विस्पष्टार्थं सेवितेत्येवं वक्तव्यं नार्थवि
शेषोपपत्तेः न केवलमिह सेवनं परिगृह्यते किं तर्हि प्रीत्यर्थोऽपि यस्मादसत्यां प्रीतौ बलान्न सल्लेखना
कार्यते सत्यां हि प्रीतौ स्वयमेव करोति स्यान्मतमात्मवधः प्राप्नोति स्वाभिसंधिपूर्वकायुरादिनिवृत्तेः
नैष दोषः अप्रमत्तत्वात् प्रमत्तयोगात् प्राणव्यपरोपणं हिंसेत्युक्तं न चास्य प्रमादयोगोऽस्ति कुतः रागा
द्यभावात् रागद्वेषमोहाविष्टस्य विषशस्त्राद्युपकरणप्रयोगवशादात्मानं घ्नतः स्वघातो भवति न तथा
सल्लेखनां प्रतिपन्नस्य रागादयः संति ततो नात्मवधदोषः उक्तं च रागादीणमणुप्पा अहिंसगत्तेत्ति देसि

१३८ दंसमए तेसिंचेउप्पत्ती हिंसन्निजिणेहिंनिहिट्ठा किंचमरणस्यानिष्टत्वात् यथावणिजः विविधःपण्यदा
नादानसंचयपरस्यगृहविनाशोऽनिष्टः तद्विनाशकारणेचकुतश्चिदुपस्थितेयथाशक्तिपरिहरति दुः
परिहार्येचपण्यविनाशोयथानभवति तथायततेएवंगृहस्थोपिव्रतशीलपण्यसंचयेप्रवर्त्तमानःतदा
श्रयस्यनपातमभिवांछति तदुपप्लवकारणेचोपस्थितेस्वगुणाविरोधेनपरिहरति दुःपरिहारेच
यथास्वगुणविनाशोनभवति तथाप्रयततेइति कथमात्मवधोभवेत अत्राहनिःशल्योव्रतीत्युक्त
कं तत्रचतृतीयंशल्यंमिथ्यादर्शनंततःसम्यग्दृष्टिनाव्रतिनाभवितव्यमित्युक्तं तत्सम्यग्दर्शनं
किंसापवादंनिरपवादमितिउच्यते कस्यचिन्मोहनीयावस्थाविशेषात्कदाचिदिमेभवंत्यपवा
दाः श्री शंकाकांक्षाविचिकित्सान्यदृष्टिप्रशंसासंस्तवाः सम्यग्दृष्टेरतीचाराः ३३ श्री निःशंकितत्वा
दयोव्याख्याताः दर्शनविशुद्धिरित्यत्रतत्प्रतिपक्षभूताः शंकादयोवेदितव्याः अथप्रशंसासंस्तवयोः १३८

कोविशेषः मनसामिथ्यादृष्टेर्ज्ञानचारित्रगुणोद्भावनंप्रशंसाभूताभूतगुणोद्भावनवचनंसंस्तवइत्ययम
नयोर्भेदः ननुचसम्यग्दर्शनस्याष्टांगमुक्तंतस्यातिचारैरप्यष्टाभिर्भवितव्यं नैषदोषः शीलव्रतेषु
पंचपंचातिचारानुत्तरत्रविवक्षुणाचार्येणप्रशंसासंस्तवयोरितरानतीचारानंतर्भाव्य पंचैवातिचाराउक्ताः
आहसम्यग्दृष्टेरतीचाराउक्ताः किमेवंव्रतशीलेष्वपिभवंतीति उमित्युक्त्वातदतीचारसंख्यानिर्देशार्थ
माह श्री व्रतशीलेषुपंचपंचयथाक्रमं २४ श्री व्रतानिचशीलानिचव्रतशीलानितेषुव्रतशीलेषु शी
लग्रहणमनर्थकंव्रतग्रहणेनैवसिद्धेर्नानर्थकं विशेषज्ञापनार्थंव्रतपरिरक्षणार्थंशीलमिति
दिग्विरत्यादीनीहशीलग्रहणेनगृह्यंते अगार्यधिकारात् अगारिणोव्रतशीलेषुपंचपंचातिचारा
वक्ष्यमाणाः यथाक्रमंवेदितव्याः तद्यथा आद्यस्यतावदहिंसाव्रतस्य श्री बंधवधच्छेदातिभारारोप
णान्नपाननिरोधाः २५ श्री अभिमतदेशगतिनिरोधहेतुर्बंधः दंडकशावेत्रादिभिरभिघातःप्राणिनांवधः

१३९ नुप्राणव्यपरोपणं ततः प्रागेवास्य विनिवृत्तिश्चात् कर्णनासिकादीनां अवयवानां अपनयनं छेदः न्याय्य
भारादतिरिक्तवाहनं अतिभारारोपणं गवादीनां क्षुत्पिपासाबाधाकरणमन्नपाननिरोधः एते पंचाहिंसा
णुव्रतस्यातिचाराः मिथ्योपदेशरहोभ्याख्यानकूटलेखक्रियान्यासापहारसाकारमंत्रभेदाः ॥ श्री अ
भ्युदयनिःश्रेयसार्थेषु क्रियाविशेषेषु अन्यस्यान्यथाप्रवर्त्तनमतिसंधापनं वा मिथ्योपदेशः यत्स्त्री
पुंसाभ्यामेकांतेनुष्ठितस्य क्रियाविशेषस्य प्रकाशनं तद्रहोभ्याख्यानं वेदितव्यं अन्येनानुक्तं अनुष्ठितं
यत्किंचित्परप्रयोगवशादेवं तेनोक्तमनुष्ठितमिति वंचनानिमित्तं लेखनं कूटलेखक्रिया हिरण्या
देर्द्रव्यस्य निक्षिप्तुर्विस्मृतसंख्यस्याल्पसंख्येयमाददानस्यैवमित्यनुज्ञावचनं न्यासापहारः अर्थ
प्रकरणांगविकारभ्रूक्षेपादिभिः पराकूतमुपलभ्य तदाविष्करणमसूयादिनिमित्तं यत्तत्साकारमंत्र १३९
भेद इति कथ्यते तएते सत्याणुव्रतस्य पंचातिचारा बोद्धव्याः ॥ श्री स्तेनप्रयोगस्तदाहृतादानविरुद्धराज्या

तिक्रमहीनाधिकमानोन्मानप्रतिरूपकव्यवहाराः ॥ श्री मुष्णंतं स्वयमेव वा प्रयुंक्ते अन्येन वा प्रयोजयति
प्रयुक्तमनुमन्यते वा यतः स स्तेनप्रयोगः अप्रयुक्तेनाननुमतेन च चौरेणानीतस्य गृहणं तदाहृतादा
नं उचितन्यायादन्येन प्रकारेण दानग्रहणमतिक्रमः विरुद्धं राज्यं विरुद्धराज्यं विरुद्धराज्ये अतिक्रमः विरुद्धराज्या
तिक्रमः तत्र हि अल्पमूल्यलभ्यानि महार्घाणि द्रव्याणीति प्रयत्नः प्रस्थादिमानातुलाद्युन्मानं एतेनोनेन
नान्यस्मै देयमधिकेनात्मनो ग्राह्यमित्येवमादिकूटप्रयोगः हीनाधिकमानोन्मानं कृत्रिमैर्हिरण्यादि
भिर्वंचनापूर्वको व्यवहारः प्रतिरूपकव्यवहारः तएते पंचादत्तादानाणुव्रतस्यातीचाराः परविवाह
करणेत्वरिकापरिगृहीतापरिगृहीतागमनानंगक्रीडाकामतीव्राभिनिवेशाः ॥ श्री कन्यादानं विवाहः
परस्य विवाहः परविवाहः परविवाहस्य करणं परविवाहकरणं परपुरुषानेति गच्छतीत्येवंशीला इत्वरी कुत्सा
यां का इत्वरिका या एकपुरुषभर्तृका सा परिगृहीता या गणिकात्वेन पुंश्चलित्वेन वा परपुरुषगमनशीला

Dr. BHAU DAJI MEMORIAL

१४० अस्वामिकासा अपरिगृहीतापरिगृहीतावापरिगृहीताचपरिगृहीतापरिगृहीतेइत्वरिकेचपरिगृहीतापरि
गृहीतेचतेइत्वरिकापरिगृहीतापरिगृहीतेतयोर्गमनेइत्वरिकापरिगृहीतापरिगृहीतागमनेशेषंगंप्रजन
नेयोनिश्च ततोन्यत्रक्रीडाअनंगक्रीडाकामस्यप्रवृद्धपरिणामः कामतीव्राभिनिवेशः तएतेपंचस्वदारसं
तोषव्रतस्यातीचाराः श्री क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यप्रमाणातिक्रमाः श्री क्षेत्रं
सस्याधिकरणं वास्तु आगारहिरण्यं रूप्यादिव्यवहारतंत्रंसुवर्णप्रतीतंधनंगवादिः धान्यंव्रीह्यादिः
दासीदासं भृत्यस्त्रीपुंसवर्गः कुप्यंक्षौमकर्पासकौसेयचंदनादि क्षेत्रंचवास्तुच क्षेत्रवास्तुहिरण्यं
चसुवर्णंचहिरण्यसुवर्णं धनंचधान्यंचधनधान्यं दासीचदासश्चदासीदासं क्षेत्रवास्तुचहिरण्यसुवर्णं
चधनधान्यंचदासीदासंचकुप्यंचक्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यानि एतावानेवप
रिग्रहोममनान्यइति परिछिन्नात्प्रमाणात्क्षेत्रवास्त्वादिविषयादतिरेकाः अतिलोभवशात् प्रमा १४०

णातिरेकाइतिप्रत्याख्यायंते तएतेपंचपरिग्रहपरिमाणव्रतस्यातीचाराः उक्ताव्रतानामतीचाराः शीला
नामतीचारावक्ष्यंते तद्यथा ऊर्ध्वाधस्तिर्यग्व्यतिक्रमक्षेत्रवृद्धिस्मृत्यंतराधानानि परिमितस्यदिग्वधेः
अतिलंघनमतिक्रमः ससमासतस्त्रिविधः ऊर्द्धातिक्रमः अधोतिक्रमः तिर्यगतिक्रमश्चेति तत्रपर्वतताद्या
रोहणात् ऊर्द्धातिक्रमः कूपावतरणादेरधोतिक्रमः बिलप्रवेशादेस्तिर्यगतिक्रमः परिगृहीतायाःदि
शोलोभावेशाद्दाधिक्याभिसंधिः क्षेत्रवृद्धिः सएषोतिक्रमः प्रमादात्मोहाद्वासंगाद्वाभवतीति अवसेयः
अननुस्मरणंस्मृत्यंतराधानंतएतेदिग्विरमणस्यातीचाराः श्री आनयनप्रेष्यप्रयोगशब्दरूपानुपातपु
द्गलक्षेपाः श्री आत्मनासंकल्पितेदेशोत्थितस्यप्रयोजनवशात्यत्किंचिदानयेतिसंदेशदापनमानयन
एवंकुर्विति प्रेष्यप्रयोगः योगः व्यापारकरान्पुरुषान्प्रतिअभ्यासिकादिकरणंशब्दानुपातः स्व
विग्रहदर्शने रूपानुपातः लोष्टादिनिपातः पुद्गलक्षेपएतेदेशविरमणस्यपंचातीचाराः श्री कंदर्पकौ

वो

१४१ कुच्यमौखर्य्यासमीक्ष्याधिकरणोपभोगपरिभोगानर्थक्यानि[३] रागोद्रेकात्प्रहासमिश्रोशिष्टवाक्प्रयो
गः कंदर्पः तदेवोभयंपरत्रदुष्टकायकर्म्मप्रयुक्तं कौकुच्यं धाष्टर्यप्रायंबहुप्रलापित्वं मौखर्यं असमीक्ष्य
प्रयोजनमाधिक्येन करणमसमीक्ष्याधिकरणं यावतार्थेनउपभोगपरिभोगौ सोर्थस्ततोन्यस्याधिक्य
मानर्थक्यं एते पंचानर्थदंडविरतेरतीचाराः श्री योगदुःप्रणिधानानादरस्मृत्यनुपस्थानानि[३३] श्री यो
गोव्याख्यातः त्रिविधस्तस्य दुःप्रणिधानं योगदुःप्रणिधानं कायदुःप्रणिधानं वाक्दुःप्रणिधानं मनो
दुःप्रणिधानमिति अनादरोनुत्साहः अनैकाग्र्यं स्मृत्यनुपस्थानं तएते पंच सामायिकस्यातिक्रमाः श्री
अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणानादरस्मृत्यनुपस्थानानि जंतवः संति न संति
वेति प्रत्यवेक्षणं चक्षुर्व्यापारः मृदुनाउपकरणेन यत्क्रियते प्रयोजनं तत्प्रमार्जनं तदुभयं प्रतिषेधवि
विशिष्टं उत्सर्गादिभिः त्रिभिरभिसंबध्यते अप्रत्यवेक्षिताप्रमार्जितोत्सर्ग इत्येवमादिः तत्र अप्रत्यवेक्षि १४१

ताप्रमार्जिते भौमे मूत्रपुरीषोत्सर्गः अप्रत्यवेक्षिताप्रमार्जितोत्सर्गः अप्रत्यवेक्षिताप्रमार्जितस्य अ
र्हदाचार्यपूजोपकरणस्य गंधमाल्यधूपादेः आत्मपरिधानाद्यर्थस्य च वस्त्रादेरादानमप्रत्यवेक्षिताप्रमा
र्जितादानं अप्रत्यवेक्षिताप्रमार्जितस्य प्रावरणादेः संस्तरस्योपक्रमणं अप्रत्यवेक्षिताप्रमार्जितसं
स्तरोपक्रमणं क्षु[illegible]दभ्यर्दितत्वादावश्यकेष्वनादरः अनुत्साहः स्मृत्यनुपस्थापनं व्याख्यातं तएते पंच प्र
प्रोषधोपवासस्यातीचाराः सचित्तसंबंधसन्मिश्राभिषवदुःपक्वाहाराः[३५] श्री सह चित्तेन वर्त्तत इति सचित्तं
चेतनावद्द्रव्यं तदुपश्लिष्टः संबंधः तद्व्यतिकीर्णः सन्मिश्रः कथं पुनरस्य सचित्तादिषु प्रवृत्तिः प्रमादसंमो
हाभ्यां द्रवो वृष्यो वाभिषवः असम्यक्पक्वो दुःपक्वः एतैराहारो विशेष्यते सचित्ताहारः संबंधाहारः स
न्मिश्राहारः अभिषवाहारः दुःपक्वाहार इति तएते पंच भोगोपभोगपरिसंख्यानस्यातीचाराः श्री सचित्त
निक्षेपापिधानपरव्यपदेशमात्सर्यकालातिक्रमाः[३६] श्री सचित्ते पद्मपत्रादौ निक्षेपः सचित्तनिक्षे

१४२ पः अपिधानमावरणं सचित्तेनैव संबध्यते सचित्तपिधानमिति अन्यदातृदेयार्प्पणं परव्यपदेशः प्रयच्छ
तोप्यादराभावोन्यदातृगुणासहनं वा मात्सर्यं अकाले भोजनं कालातिक्रमः त एते पंच अतिथिसंविभाग
शीलातीचाराः श्री जीवितमरणाशंसामित्रानुरागसुखानुबंधनिदानानि [37] श्री आशंसनमाशंसा आ
कांक्षणमित्यर्थः जीवितं च मरणं च जीवितमरणं जीवितमरणस्याशंसे जीवितमरणाशंसे पूर्वसुहृत्स
हपांसुक्रीडनाद्यनुस्मरणं मित्रानुरागः अनुभूतप्रीतिविशेषः स्मृतिसमन्वाहारः सुखानुबंधः भोगा
कांक्षया नियतं दीयते चित्तं तस्मिं तेनेति वा निदानं त एते पंच सल्लेखनायाः अतीचाराः अत्राह उक्तं भ
वता तीर्थकरत्वकारणकर्मास्रवनिर्देशे शक्तितस्त्यागतपसी इति पुनश्चोक्तं शीलविधाने अतिथि
संविभाग इति तस्य दानस्य लक्षणमनिर्ज्ञातं तदुच्यतामित्यत आह श्री अनुग्रहार्थं स्वस्यातिसर्गो
दानं [38] श्री स्वपरोपकारोनुग्रहः स्वोपकारः पुण्यसंचयः परोपकारः सम्यग्ज्ञानादिवृद्धिः स्वशब्दो धन १४२

पर्यायवचनः अनुग्रहार्थं स्वस्यातिसर्गस्त्यागो दानं वेदितव्यं अत्राह उक्तं दानं तत्किमविशिष्टफलमाहो
स्विदस्ति कश्चित्प्रतिविशेष इत्यत आह श्री विधिद्रव्यदातृपात्रविशेषात्तद्विशेषः [39] श्री प्रतिग्रहादि
क्रमो विधिः विशेषो गुणकृतः तस्य प्रत्येकमभिसंबंधं क्रियते विधिविशेषः द्रव्यविशेषः दातृविशेषः पा
त्रविशेष इति तत्र विधिविशेषः प्रतिग्रहादिष्वादरानादरकृतो भेदः तपःस्वाध्यायपरिवृद्धिहेतुत्वा
दिर्द्रव्यविशेषः अनसूयाविषादादिर्दातृविशेषः मोक्षकारणगुणसंयोगः पात्रविशेषः ततश्च पुण्य
फलविशेषः क्षित्यादिविशेषाद्बीजफलविशेषवत् श्री इति तत्त्वार्थवृत्तौ सर्वार्थसिद्धिसंज्ञिकायां
सप्तमोध्यायः समाप्तः श्री व्याख्यातः आस्रवपदार्थः तदनंतरोद्देशभाग्बंधपदार्थः इदानीं व्याख्येयः
तस्मिन्व्याख्येये सति पूर्वं बंधहेतूपन्यासः क्रियते तत्पूर्वकत्वात् बंधस्येति श्री मिथ्यादर्शनाविरतिप्र
मादकषाययोगा बंधहेतवः [1] श्री मिथ्यादर्शनादय उक्ताः क्व मिथ्यादर्शनं तावदुक्तं तत्त्वार्थश्रद्धानमित्यत्र

१४३ तत्प्रतिपक्षभूतं आश्रवविधाने च क्रियासु व्याख्यातं मिथ्यादर्शनक्रियेति विरतिरुक्ता तत्प्रतिपक्षभूताऽ
विरतिर्ग्राह्या आज्ञाव्यापादनक्रियाऽनाकांक्षाक्रियेत्यनयोः प्रमादस्यांतर्भावः सच प्रमादः कुशलेष्वनाद
रः कषायाः क्रोधादयः अनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनविकल्पाः प्रोक्ताः क्व इंद्रियकषा
याइत्यत्रैव योगाः कायादिविकल्पाः प्रोक्ताः क्व कायवाग्मनःकर्म्मयोग इत्यत्र मिथ्यादर्शनं द्विविधं
नैसर्गिकं परोपदेशपूर्वकं च तत्र परोपदेशमंतरेण मिथ्यात्वकर्म्मोदयवशाद्यदाविर्भवति तत्वा
र्थाश्रद्धानलक्षणं तत्रैसर्गिकं परोपदेशनिमित्तं चतुर्विधं क्रियाऽक्रियावाद्यज्ञानिकवैनयिकवि
कल्पादथवा पंचविधं एकांतमिथ्यादर्शनं मिथ्यादर्शनं विपरीतमिथ्यादर्शनं संशयमिथ्यादर्शनं
वैनयिकमिथ्यादर्शनं अज्ञानिकमिथ्यादर्शनं चेति तत्रेदमेवेत्थमेवेति धर्म्मिधर्म्मयोरभिनिवेशए १४३
कांतः पुरुषएवेदं सर्वमिति वा नित्यएवेति सग्रंथो निर्ग्रंथः केवली कवलाहारी स्त्री सिध्यतीत्येवमा

दिविपर्ययः सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः किं स्याद्वा न वेति अन्यतरपक्षापरिग्रहः संशयः सर्व्व
देवतानां सर्व्वसमयानां च समदर्शनं वैनयिकं हिताहितपरीक्षाविरहोऽज्ञानिकत्वं उक्तं च असिदिस
दं किरियाणमकिरियाणं हो दि चुलसीदी सत्तट्ठिमण्णाणीणं वेणइयाणं तु वत्तीसं अविरतिर्द्वाद
शविधा षट्कायषट्करणविषयभेदात् षोडशकषाया नव नोकषायाः ईषद्भेदो न भेद इति पंचविंश
तिः कषायाः चत्वारो मनोयोगाः चत्वारो वाग्योगाः पंचकाययोगाः इति त्रयोदशविकल्पो योगः
आहारककाययोगाहारकमिश्रकाययोगयोः प्रमत्तसंयते संभवात् पंचदशापि भवंति प्रमादोनेक
विधः प्रमादोनेकविधः भावकायविनयेर्यापथभिक्षाप्रतिष्ठापनशयनासनवाक्शुद्ध्यष्टोदश
लक्षणो धर्म्मश्च अष्टकोत्तमक्षमादिभेदात् तएते पंच बंधहेतवः समस्ता व्यस्ताश्च भवंति तद्यथा मि
थ्यादृष्टेः पंचापि समुदिताः बंधहेतवो भवंति सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृ

१५५ ष्टीनां अविरत्यादयः चत्वारः संयतासंयतस्य अविरतिर्विरतिमिश्रा प्रमादकषाययोगाश्च प्रमत्तसंयतस्य
अप्रमत्तादीनां चतुर्णां योगकषायौ उपशांतकषायक्षीणकषायसयोगकेवलिनां एक एव योगः अयोग
केवली अबंधहेतुः उक्ता बंधहेतवः इदानीं बंधो वक्तव्यः इत्यत आह ॥ सकषायत्वाज्जीवः कर्मणो यो
ग्यान्पुद्गलानादत्ते स बंधः ॥ सह कषायेण वर्त्तत इति सकषायः सकषायस्य भावः सकषायत्वं तस्मा
त्सकषायत्वादिति पुनर्हेतुनिर्देशः किमर्थं जठराग्न्याशयानुरूपाहारग्रहणवत् तीव्रमंदमध्यमक
षायाशयानुरूपस्थित्यनुभवविशेषप्रतिपत्त्यर्थं अमूर्तिरहस्त आत्मा कथं कर्मादत्ते इति चोदितः
सन् जीव इत्याह जीवनाज्जीवः प्राणधारणादायुःसंबंधात् नायुर्विरहादिति कर्मणो योग्यानिति
लघुनिर्देशात्सिद्धेः कर्मणो योग्यानिति पृथग्विभक्त्युच्चारणं वाक्यांतरज्ञापनार्थं किं पुनस्तद्वाक्यां
तरं कर्मणो जीवः सकषायो भवतीत्येकं वाक्यं एतदुक्तं भवति कर्मण इति हेतुनिर्देशः कर्मणो हेतोर्जी १५५

वः सकषायो भवति नाकर्मकस्य कषायलेपोस्ति ततः जीवकर्मणोरनादिः संबंध इत्युक्तं भवति ते
नामूर्त्तो जीवः मूर्त्तेन कर्मणा कथं बध्यत इति चोद्यमपाकृतं भवति इतरथा हि बंधस्यादिमत्वे आत्यं
तिकीं शुद्धिं दधतः सिद्धस्येव बंधाभावः प्रसज्येत द्वितीयं वाक्यं कर्मणो योग्यान्पुद्गलानादत्त इति अ
र्थवशाद्विभक्तिपरिणाम इति प्रह्री हेतुसंबंधं त्यक्त्वा षष्ठीसंबंधमुपैति कर्मणो योग्यानिति पुद्गल
वचनं कर्मणस्तादात्म्यख्यापनार्थं तेनात्मगुणोऽदृष्टो निराकृतो भवति तस्य संसारहेतुत्वानुपपत्तेः
आदत्त इति हेतुहेतुमद्भावख्यापनार्थं अतो मिथ्यादर्शनाद्यावेशादार्द्रीकृतस्यात्मनः सर्वतो योगविशे
षात् तेषां सूक्ष्मैकक्षेत्रावगाहिनां अनंतानंतप्रदेशानां पुद्गलानां कर्मभावयोग्यानां अविभागेनोप
श्लेषो बंध इत्याख्यायते यथा भाजनविशेषे प्रक्षिप्तानां विविधरसबीजपुष्पफलानां मदिराभावेन परि
णामस्तथा पुद्गलानामप्यात्मनि स्थितानां योगकषायवशात् कर्मभावेन परिणामो वेदितव्यः स वच

Dr. BHAU DAJI MEMORIAL

नभस्य निह्नुत्यर्थः स एष बंधो नान्यो स्तीति तेन गुणगुणिबंधो निवर्त्तितो भवति कर्मादिसाधनो बंधशब्दो व्या-
ख्येयः आह किमयं बंध एकरूप एव हि श्वित्प्रकाराः अप्यस्य संतीति अत इदमुच्यते श्री प्रकृतिस्थित्य-
नुभवप्रदेशास्तद्विधयः ३ श्री प्रकृतिः स्वभावः निंबस्य का प्रकृतिः तिक्तता गुडस्य का प्रकृतिः मधु-
रता तथा ज्ञानावरणस्य का प्रकृतिः दर्शनावरणस्य का प्रकृतिः अर्थानालोचनं अर्थानवगमः वेद्यस्य
सदसल्लक्षणस्य सुखदुःखसंवेदनं दर्शनमोहस्य तत्त्वार्थाश्रद्धानं चारित्रमहस्यासंयमः आयुषो भव-
धारणं नाम्नो नारकादिनामकरणं गोत्रस्य उच्चैर्नीचैः स्थानसंशब्दनं अंतरायस्य दानादिविघ्नकरणं तदे-
वं लक्षणं कार्यं प्रक्रियते प्रभवत्यस्या इति प्रकृति स्तत्स्वभावादप्रच्युतिः स्थितिः यथा ऽजागोमहिष्या-
दिक्षीराणां माधुर्यस्वभावादप्रच्युति स्थितिस्तथा ज्ञानावरणादीनां अर्थानवगमादिस्वभावादप्रच्युतिः
स्थितिः तद्रसविशेषोनुभवः यथा अजागोमहिष्यादिक्षीराणां तीव्रमंदादिभावेन रसविशेषस्तथा कर्म- १४५

पुद्गलानां स्वगतसामर्थ्यविशेषोनुभवः इयत्तावधारणं प्रदेशः कर्मभावपरिणतपुद्गलस्कंधानां परमा- य
णुपरिच्छेदेनावधारणं प्रदेशः विधिशब्दः प्रकारवचनः त एते प्रकृत्यादयश्चत्वारः तस्य बंधस्य प्रकाराः तत्र
योगनिमित्तौ प्रकृतिप्रदेशौ कषायनिमित्तौ स्थित्यनुभवौ तत्प्रकर्षाप्रकर्षभेदात्तद्बंधविचित्रभावः त-
थाचोक्तं जोगापयडिपएसा ठिदिअणुभागं कसायदो कुणदि अपरिणउच्छिन्नेसु अबंधट्ठिदिकारणं
नत्थि तत्राद्यस्य प्रकृतिबंधस्य भेदप्रदर्शनार्थमाह श्री आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायु-
र्नामगोत्रांतरायाः आद्यः प्रकृतिबंधः ज्ञानावरणमिति वेदयति वेद्यत इति वा वेदनीयं मोहयति मुह्यते-
नेनेति वा मोहनीयं एत्यनेन नारकादिभवमित्यानं नम्यतेनेनेति वा नाम उच्चैर्नीचैश्च गूयते शब्द्यत इति
गोत्रं दातृदेयादीनामंतरं मध्यमेतीति अंतरायः एकेनात्मसुः नभयसात्मापरिणामेन आदीयमानाः पुद्ग-
लाः ज्ञानावरणाद्यनेकभेदं प्रतिपद्यंते सकृदुपयुक्तान्नपरिणामरसरुधिरादिवत् अष्टौ कर्ममूलप्रकृति

१४६ बंधोऽष्टविधः इदानीमुत्तरप्रकृतिबंधो वक्तव्य इत्यत आह ॥ श्री ॥ पंचनवद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशतद्वि
पंचभेदा यथाक्रमं ॥ श्री ॥ द्वितीय इत्यत्रहणमिह कर्त्तव्यं द्वितीयः उत्तरप्रकृतिबंधः एवं विकल्प इति न कर्त्तव्यं
पारिशेष्यात्सिद्धेः आद्यो मूलप्रकृतिबंधोऽष्टविकल्पः उक्तस्ततः पारिशेष्यादयमुत्तरप्रकृतिविधिर
भवति भेदशब्दः पंचादिभिर्यथाक्रममभिसंबध्यते पंचभेदं ज्ञानावरणीयं नवभेदं दर्शनावरणीयं
द्विभेदं वेदनीयं अष्टाविंशतिभेदं मोहनीयं चतुर्भेदमायुः द्विचत्वारिंशद्भेदं नाम द्विभेदं गोत्रं पंचभे
दोऽन्तराय इति यदि ज्ञानावरणं पंचभेदं तत्प्रतिपत्तिर्दृश्यतामित्यत आह ॥ श्री ॥ मतिश्रुतावधिमनःप
र्ययकेवलानां ॥ श्री ॥ मत्यादीनि ज्ञानानि व्याख्यातानि तेषामावृत्तेरावरणभेदो भवतीति पंचोत्तरप्रकृत
यो वेदितव्याः अत्र चोद्यते अभव्यस्य मनःपर्ययज्ञानशक्तिः संभवः पर्यायार्थादेशादभव्यस्य भावः य १४६
द्येवं भव्याभव्यविकल्पो नोपपद्यते उभयत्र तच्छक्तिसद्भावात् न शक्तिभावाभावापेक्षया भव्याभव्यवि

कल्प इत्युच्यते कुतस्तर्हि व्यक्तिसद्भावासद्भावापेक्षया सम्यग्दर्शनादिभिर्व्यक्तिर्यस्य भविष्यति स भव्यः यस्य तु
न भविष्यति सोऽभव्यः इति कनकेतरपाषाणवत् आह उक्तो ज्ञानावरणोत्तरप्रकृतिविकल्पः इदानीं द
र्शनावरणस्य वक्तव्य इत्यत आह ॥ श्री ॥ चक्षुरचक्षुरवधिकेवलानां निद्रानिद्रानिद्राप्रचलाप्रचलाप्रच
लास्त्यानगृद्धयश्च चक्षुरचक्षुरवधिकेवलानामिति दर्शनावरणापेक्षया भेदनिर्देशः चक्षुर्दर्शनाव
रणमचक्षुर्दर्शनावरणं अवधिदर्शनावरणं केवलदर्शनावरणमिति मदखेदक्लमविनोदनार्थः स्वा
पो निद्रा तस्या उपर्युपरि वृत्तिर्निद्रानिद्रा या क्रियात्मानं प्रचलयति सा प्रचला शोकश्रममदादिप्र
भवा आसीनस्यापि नेत्रगात्रविक्रियासूचिका सैव पुनःपुनरावर्त्तमाना प्रचलाप्रचला स्वप्ने यया
वीर्यविशेषाविर्भावः सा स्त्यानगृद्धिः स्त्यायतेरनेकार्थत्वात् स्वप्नार्थ इह गृह्यते गृधेरपि दीप्तिः स्त्याने स्व
प्ने गृध्यति दीप्यते यदुदयादात्मा रौद्रं बहुकर्म करोति सा स्त्यानगृद्धिः इह निद्रादिभिर्दर्शनावरणं सामा

१४७ नाधिकरणेनाभिसंबध्यते निद्रादर्शनावरणंनिद्रानिद्रादर्शनावरणमित्यादि तृतीयस्याः प्रकृतेरुत्तर
प्रकृतिप्रतिपादनार्थमाह श्री सदसद्वेद्ये यदुदयात्देवादिगतिषुशारीरमानससुखप्राप्तिस्तत्सद्वेद्यं
प्रशस्तवेद्यंसद्वेद्यमितियत्फलंदुःखमनेकविधंतदसद्वेद्यमप्रशस्तवेद्यमसद्वेद्यमिति चतुर्थ्याः प्र
कृतेः उत्तरप्रकृतिविकल्पानिदर्शनार्थमाह श्री दर्शनचारित्रमोहनीयाकषायकषायकषायवे
दनीयाख्यास्त्रिद्विनवषोडशभेदाः श्री सम्यक्त्वमिथ्यात्वतदुभयान्यकषायकषायौहास्यरत्यरतिशो
कभयजुगुप्सास्त्रीपुंनपुंसकवेदाः अनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनविकल्पाश्चैकशः
क्रोधमानमायालोभाः दर्शनादयश्चत्वारः आद्योपि तत्रयथासंख्येनसंबंधो भवति दर्शमोहनीयं
त्रिभेदंचारित्रमोहनीयंद्विभेदं अकषायवेदनीयंनवविधंकषायवेदनीयंषोडशविधमिति तत्रदर्श
नमोहनीयंत्रिभेदंसम्यक्त्वंमिथ्यात्वमुभयमिति तद्बंधंप्रत्येकंभूत्वासत्कर्म्मापेक्षयात्रिधाभवतिछे १४७

तत्रयस्योदयात्सर्वज्ञप्रणीतमार्गपराङ्मुखः तत्त्वार्थश्रद्धाननिरुत्सुकोहिताहितविचारासमर्थो मिथ्या
दृष्टिर्भवति तन्मिथ्यात्वं तदेवसम्यक्त्वंशुभपरिणामनिरुद्धस्वरसंयदौदासीन्येनावस्थितमात्मनःश्रद्धा
नंनमिरुणद्धितद्वेदयमानःपुरुषःसम्यग्दृष्टिरित्यभिधीयते तदेवमिथ्यात्वंप्रक्षालनविशेषात्क्षी
णाक्षीणमदशक्तिकोद्रववत् सामिशुद्धस्वरसंतदुभयमित्याख्यायते सम्यग्मिथ्यामितियावत् य
स्योदयादात्मनः अर्द्धशुद्धमदनकोद्रवौदनोपयोगापादितमिश्रपरिणामवत् उभयात्मको भवति
परिणामः चारित्रमोहनीयंद्वेधा अकषायकषायभेदादीदीदाषदर्थेनञः प्रयोगादीषायअकषाय
इति अकषायवेदनीयंनवविधंकुतः हास्यादिभेदात्यस्योदयाद्धास्याविर्भावःतद्धास्यं यदुदयाद्दे
शादिषुनौत्सुक्यसारतिः अरतिस्तद्विपरीताय द्विपाकात् शोचनंसशोकः यदुदयात्त्रासलक्षणउ
त्पद्यतेतद्भयं यदुदयात्परदोषानाविष्करोति आत्मदोषान्संवृणोतिसाजुगुप्सा यदुदयात्स्त्री

१४८ णांभावान्प्रतिपद्यते सस्त्रीवेदः यस्योदयात्सौस्त्रीत्वाभावानास्कंदतिसपुंवेदः यदुदयान्नपुंसकाद्भावा
न्नप्रव्रजतिसनपुंसकवेदः कषायवेदनीयंषोडशविधंकुतः अनंतानुबंध्यादिविकल्पात् तद्यथा
कषायाः क्रोधमानमानमायालोभाः तेषांचतस्रोवस्थाः अनंतानुबंधिनअनंतानुबंधिनः अप्रत्या
ख्यानावरणाः प्रत्याख्यानावरणाः संज्वलनाश्चेति अनंतसंसारकारणत्वात् मिथ्यादर्शनमनंतं
तदनुबंधिनः अनंतानुबंधिनः क्रोधमानमायालोभाः यदुदयाद्देशविरतिसंयमासंयमरव्यामल्पा
मपिकर्तुंनशक्नोति तेदेशप्रत्याख्यानमाल्वतः अप्रत्याख्यानावरणाः क्रोधमानमयालोभायदु
दयाद्विरतिकृत्स्नासंयमाख्यांनशक्नोति कर्तुंतेकृत्स्नंप्रत्याख्यानमावृत्वतः प्रत्याख्यानावरणाः
क्रधमानमायालोभाः समेकीभावेवर्त्तते संयमेनसहावस्थानादेकीभूताः ज्वलंतिसंयमोवाज्वल्य
त्येषुसत्स्वपीतिसंज्वलनाः क्रोधमानमायालोभा तएतेसमुदिताः षोडशकषाभवंति मोहनीयानंत १४८

रोदेशमाजाग्आयुषः उत्तरप्रकृतिनिर्ज्ञानार्थमाह श्री नारकतैर्यग्योनिमानुषदैवानि१ श्री नरका
दिषुभवसंबंधेनायुषोव्यपदेशः क्रियतेनरकेषुभवंनारकमायुः तिर्यग्योनिषुभवं तैर्यग्योनमनुष्ये
षुभवंमानुषं देवेषुभवंदैवमिति नरकेषुतीव्रशीतोष्णवेदनेषुयन्निमित्तंदीर्घजीवनंतन्नारकमे
वंशेषेष्वपि आयुश्चतुर्विधंव्याख्यातंतदनंतरमुद्दिष्टंयन्नामकर्मतदुत्तरप्रकृतिनिर्णयार्थमाह
श्री गतिजातिशरीरांगोपांगनिर्माणबंधनसंघातसंस्थानसंहननस्पर्शरसगंधवर्णानुपूर्व्यागुरु
लघुपघातपरघातातपोद्योतोच्छ्वासविहायोगतयः१ प्रत्येकशरीरत्रससुभगसुस्वरशुभसूक्ष्मपर्या
प्तिस्थिरादेययशःकीर्त्तिसेतराणितीर्थकरत्वंच११ श्री यदुदयादात्माभवांतरंगच्छतिसागतिः साच
तुर्विधानरकगतिस्तिर्यग्गतिर्मनुष्यगतिर्देवगतिश्चेति यन्निमित्तआत्मनोनारकोभावः तन्नरक
गतिर्नामः एवंशेषेष्वपियोज्यंते तासुनरकादिगतिषुअव्यभिचारिणासादृश्येनएकीकृतोर्थात्माजा

१४८ तिः तन्निमित्तं जातिर्नामहि स्पंचविधं एकेंद्रियजातिनाम द्वींद्रियजातिनाम त्रींद्रियजातिनाम चतुरिंद्रि
यजातिनाम पंचेंद्रियजातिनामचेति यदुदयादात्मा एकेंद्रिय इति शब्द्यते तदेकेंद्रियजातिनाम एवं
शेषेष्वपि योज्यं यदुदयात्मनः शरीरनिर्वृत्तिस्तच्छरीरनाम तत्पंचविधं उदारिकशरीरनाम वैक्रिय
कशरीरनाम आहारकशरीरनाम तैजसशरीरनाम कार्म्मणशरीरनामचेति तेषां विशेषोन्यत्र ख्यातो
यदुदयादंगोपांगविवेकस्तदंगोपांगनाम तत्त्रिविधं औदारिकशरीरांगोपांगनाम वैक्रियकशरी
रांगोपांगनाम आहारशरीरांगोपांगनामचेति यन्निमित्तात्परिनिष्पत्तिस्तन्निर्माणं तद्द्विविधं स्था
ननिर्माणं प्रमाणं चेति तज्जातिनामोदयापेक्षं चक्षुरादीनां स्थानं प्रमाणं च निर्वर्त्तयति निर्मीयते
अनेनेति निर्माणं शरीरनामकर्म्मोदयवशादुपात्तानां पुद्गलानामन्योन्यप्रदेशसंश्लेषणं यतो भ १४८
वति तद्बंधननाम यदुदयादौदारिकादिशरीराणां विवरविरहितान्योन्यप्रदेशानुप्रवेशेन एकत्वापा

दानं भवति तत्संघातनाम यदुदयादौदारिकादिशरीराकृतिनिर्वृत्तिर्भवति तत्संस्थाननाम तत्षोढा
विभक्तं समचतुरस्रसंस्थाननाम कुब्जसंस्थाननामवामनसंस्थाननाम हुंडसंस्थाननामचेति यस्योद
यादस्थिबंधनविशेषो भवति तत्संहनननाम तत्षड्विधं वज्रर्षभनाराचसंहनननाम वज्रनाराच
संहनननाम नाराचसंहनननाम अर्द्धनाराचसंहनननाम कीलिकसंहनननाम असंप्राप्तासृपाटि
कासंहनननामचेति यस्योदयात्स्पर्शप्रादुर्भावः तत्स्पर्शननाम तदष्टविधं कर्कशनाम मृदुनाम
गुरुनाम लघुनाम स्निग्धनाम शीतनाम उष्णनामचेति यन्निमित्तो रसविकल्पः तद्रसनाम तत्पंचवि
धं तिक्तनाम कटुकनाम कषायनाम आम्लनाम मधुरनाम चेति यदुदयप्रभवो गंधस्तद्गंधनाम त
द्द्विविधं सुरभिगंधनाम असुरभिगंधनाम चेति यद्धेतुको वर्णविभागस्तद्वर्णनाम तत्पंचविधं कृष्ण
वर्णनाम नीलवर्णनाम रक्तवर्णनाम हारिद्रवर्णनाम शुक्लवर्णनाम चेति पूर्वशरीराकारविनाशो य

DR. BHAU DAJI MEMORIAL

१५० स्योदयाद्भवति तदानुपूर्व्वीनाम तच्चतुर्व्विधं नरकगतिप्रायोग्यानुपूर्व्वीनाम तिर्यग्गतिप्रायोग्यानुपूर्व्वीनाम
मनुष्यगतिप्रायोग्यानुपूर्व्वीनाम देवगतिप्रायोग्यानुपूर्व्वीनाम चेति यस्योदयादयःपिंडवद्गुरुत्वान्नाधः पा-
तति न चार्कतूलवल्लघुत्वादूर्ध्वं गच्छति तदगुरुलघुनाम यस्योदयात्स्वयंकृतोद्बंधनमरुत्प्रपतनादिनिमि-
त्त उपघातो भवति तदुपघातनाम यन्निमित्तः परत्रासाघातस्तत्परघातनाम यदुदयान्निर्वृत्तमातपनं त-
दातपननाम तदादित्ये वर्त्तते यन्निमित्तमुद्योतनं तदुद्योतननाम तच्चंद्रखद्योतादिषु वर्त्तते यद्धेतुरु-
च्छ्वासः तदुच्छ्वासनाम विहाय आकाशं तत्र गतिनिर्वर्त्तकं तद्विहायोगतिनाम तद्द्विविधं प्रशस्ताप्रश-
स्तभेदात् शरीरनामकर्म्मोदयान्निर्वर्त्यमानं शरीरमेकात्मोपभोगकारणं यतो भवति तत्प्रत्येकश-
रीरनाम बहूनामात्मनामुपभोगहेतुत्वेन साधारणं शरीरं यतो भवति तत्साधारणशरीरनाम यदुदया-
द्द्वींद्रियादिषु जन्म तत्त्रसनाम यन्निमित्तः एकेंद्रियेषु प्रादुर्भावः तत्स्थावरनाम यदुदयादन्यप्रीतिप्रभव १५०

स्तत्सुभगनाम यदुदयाद्रूपादिगुणोपेतोऽप्यप्रीतिकरस्तद्दुर्भगनाम यन्निमित्तं मनोज्ञस्वरनिर्वर्त्तनं त-
त्सुस्वरनाम तद्विपरीतं दुःस्वरनाम यदुदयाद्रमणीयत्वं तच्छुभनाम तद्विपरीतमशुभनाम सूक्ष्मशरीर-
निर्वर्त्तकं सूक्ष्मनाम अन्यबाधाकरशरीरकारणं बादरनाम यदुदयादाहारादिपर्याप्तिनिर्वृत्तिस्तत्पर्या-
प्तिनाम तत्षड्विधं आहारपर्याप्तिनाम मनःपर्याप्तिनाम चेति षड्विधपर्याप्त्यभावहेतुरपर्याप्तिनाम
स्थिरभावस्य निर्वर्त्तकं स्थिरनाम तद्विपरीतमस्थिरनाम प्रभोपेतशरीरस्य कारणमादेयनाम निःप्र-
भशरीराकारकारणमनादेयनाम पुण्यगुणख्यापनकारणं यशःकीर्त्तिनाम तत्प्रत्यनीकफल-
मयशःकीर्त्तिनाम आर्हंत्यकारणं तीर्थकरत्वनाम उक्तो नामकर्म्मणः उत्तरप्रकृतिभेदः तदनंतरोद्दे-
शभाजो गोत्रस्य प्रकृतिभेदो व्याख्यायते श्री. उच्चैर्नीचैश्च गोत्रं द्विविधं उच्चैर्गोत्रं नीचैर्गोत्रमिति याल्लो-
कपूजितेषु कुलेषु जन्मकारणं तदुच्चैर्गोत्रं यदुदयात् गर्हितेषु कुलेषु जन्मकारणं तन्नीचैर्गोत्रं अष्ट

१५१ मा: कर्म्मप्रकृतेरुत्तरप्रकृतिनिर्देशनार्थमाह श्री दानलाभभोगोपभोगवीर्याणां[९३] श्री अंतरायापेक्षया
भेदनिर्देशः क्रियते दानस्यांतरायो लाभस्यांतराय इत्यादि दानादिपरिणामव्याघातहेतुत्वात्तद्व्यपदेशः
यदुदयात्दातुकामपि नो प्रयुक्ते उत्सहितुकामोपि नोत्सहते तेनैते पंचांतरायस्य भेदाः आख्याताः उ
क्तिविधविकल्पाः इदानीं स्थितिबंधविकल्पो वक्तव्यः सा स्थिति द्विविधा उत्कृष्टा जघन्या च तत्र यासां
कर्म्मप्रकृतीनां उत्कृष्टा स्थितिः समाना तन्निर्देशार्थमुच्यते श्री आदितस्तिसृणामंतरायस्य च त्रिंश
त्सागरोपमकोटीकोट्यः परा स्थितिः[९] श्री मध्ये अनंते वा तिसृणां ग्रहणं मा भूदिति आदित इत्युच्यते
अंतरायस्येति वचनं व्यवहितग्रहणार्थं सागरोपमं उक्तपरिमाणं कोटीनां कोट्यः कोटीकोट्यः परउ
त्कृष्टेत्यर्थः एतदुक्तं भवति ज्ञानावरणदर्शनावरणवेदनीयांतरायाणां उत्कृष्टा स्थितिस्त्रिंशत्सा
गरोपमकोटीकोट्य इति सा कस्य भवति मिथ्यादृष्टेः संज्ञिनः पंचेंद्रियस्य पर्याप्तकस्यान्येषामागमात्सं १५१

प्रत्ययः कर्त्तव्यः मोहनीयस्योत्कृष्टस्थितिप्रतिपत्त्यर्थमाह श्री सप्ततिर्मोहनीयस्य[९४] सागरोपमकोटीकोट्यः
परा स्थितिरित्यनुवर्त्तते इयमपि परा स्थितिर्मिथ्यादृष्टेः संज्ञिनः पंचेंद्रियस्य पर्याप्तकस्यावसेया अन्येषां
यथागममवगमः कर्त्तव्यः नामगोत्रयोरुत्कृष्टस्थितिप्रतिपत्त्यर्थमाह श्री विंशतिर्नामगोत्रयोः[९५] श्री
सागरोपमकोटीकोट्यः परा स्थितिरित्यनुवर्त्तते इयमप्युत्कृष्टा स्थितिरित्युच्यते श्री त्रयस्त्रिंशत्साग
रोपमाण्यायुषः[९] श्री पुनः सागरोपमग्रहणं कोटीकोटिनिवृत्त्यर्थं परा स्थितिरित्यनुवर्त्तते इयमपि उ
त्कृष्टस्यैव शेषाणामागमतोऽवसेया उक्तोत्कृष्टा स्थितिः इदानीं जघन्या स्थितिर्वक्तव्या तत्र समानज
घन्यस्थितीः पंचप्रकृतीरवस्थाप्य तिसृणां जघन्यस्थितिप्रसत्यर्थं सूत्रद्वयमुपन्यस्यते लघ्वर्थं श्री अप
रा द्वादशमुहूर्त्ता वेदनीयस्य[१५] श्री अपरा जघन्येत्यर्थः वेदनीयस्य द्वादश मुहूर्त्ता श्री नामगोत्रयोर
ष्टौ[१६] श्री मुहूर्त्ता इत्यनुवर्त्तते अपरा स्थितिरिति च अवस्थापितप्रकृतिजघन्यस्थितिप्रतिपादनार्थमाह

श्री शेषाणामुत्कृष्टा श्री शेषाणां पंचानां प्रकृतीनां अंतर्मुहूर्त्तोऽपरा स्थितिः ज्ञानदर्शनावरणां
तरायाणां जघन्या स्थितिः सूक्ष्मसांपराये मोहनीयस्य अनिवृत्तिबादरसांपराये आयुषः संख्येयवर्षायुष्षु
तिर्यङ्मनुष्येषु आहो भयी स्थितिरभिहिता ज्ञानावरणादीनामथानुभवः किंलक्षण इत्यत आह श्री
विपाकोनुभवः विशिष्टो नानाविधो वा पाको विपाकः सर्वेषां कषायतीव्रमंदादिभावाश्रवविशेषा
द्विशिष्टः पाकः विपाकः अथवा द्रव्यक्षेत्रकालभवभावलक्षणनिमित्तभेदजनितवैश्वरूप्यो नानावि
धः पाको विपाकः असावनुभव इत्याख्यायते शुभपरिणामानां प्रकर्षभावात् शुभप्रकृतीनां प्रकृ
ष्टोनुभवः अशुभप्रकृतीनां निकृष्टोनुभवः अशुभपरिणामानां प्रकर्षभावात् अशुभप्रकृतीनां प्रकृ
ष्टोऽनुभवो शुभप्रकृतीनां निकृष्टः स एवं प्रत्ययवशात् उपात्तोनुभवः द्विधा प्रवर्त्तते स्वमुखेन परमुखे
न च सर्वासां मूलप्रकृतीनां स्वमुखेनैवानुभवः उत्तरप्रकृतीनां तुल्यजातीयानां परमुखेनापि भवति आ १५२

युर्दर्शनचारित्रमोहवर्ज्जानां न हि नरकायुर्मुखेन तिर्यगायुर्मनुष्यायुर्वा विपच्यते नापि दर्शनमोहः
चारित्रमोहमुखेन आह आत्मोपमः प्रागुपचितनानाप्रकारकर्मविपाकोनुभव इति इदं तु न विजा
नीमः किमयं प्रसंख्यातोऽप्रसंख्यातः इत्यत्रोच्यते नुभूयत इति ब्रूमहे कुतो यतः श्री स यथानाम श्री
ज्ञानावरणस्य फलं ज्ञानाभावः दर्शनावरणस्यापि फलं दर्शनशक्त्युपरोधः इत्येवमाद्यन्वर्थसंज्ञानि
र्देशात्सर्वासां कर्मप्रकृतीनां सविकल्पानामनुभवसंप्रत्ययो जायते आह यदि विपाकोनुभवः प्रति
ज्ञायते तत्कर्मानुभूतं सत् किमाभरणवदवतिष्ठते आहोस्विन्निष्पीतसारं प्रच्यवते इत्यत्रोच्यते श्री
ततश्च निर्जरा श्री पीडानुग्रहावात्मने प्रदायाभ्यवहृतौदनादिविकारवत् पूर्वस्थितिक्षयादवस्थाना
भावात् कर्मणो निवृत्तिर्निर्ज्जरा सा द्विप्रकारा विपाकजेतरा च तत्र चतुर्गतावनेकजातिविशेषावघू
र्णिते संसारमहार्णवे चिरं परिभ्रमतः शुभाशुभस्य कर्मणः क्रमेण परिपाककालप्राप्तस्य अनुभवोद

यावलिश्रोतोनुप्रविष्टस्यारब्धफलस्ययानिवृत्तिः साविपाकजानिर्ज्जरा यत्कर्म्माप्राप्तविपाककालमौप
क्रमिकक्रियाविशेषसामर्थ्यादनुदीर्णंवलादुदीर्य्य उदयावलिंप्रवेश्यवेद्यते आम्रपनसादिपाकवत्सा
अविपाकजानिर्ज्जरा एवशब्दोनिमित्तांतरसमुच्चयार्थः तपसा [illegible] निर्ज्जरेतिवक्ष्यते ततश्चभवति अन्यतश्च
तिसूत्रार्थोयोजितः किमर्थमिहनिर्ज्जरानिर्देशः क्रियते संवरात्परानिर्देष्टव्या उद्देशवत्तल्लघ्वर्थमिहव
चनं तत्र हियावेविपाकोनुभवइति पुनरनुवादः कर्त्तव्यः स्यात आहानिहतोनुभववंधः इदानींप्रदेश
वंधोवक्तव्यः तस्मिंश्चवक्तव्येसतिइमेनिर्देष्टव्याः किंहेतवः कदाकुतः किंस्वभावः कस्मिन्नु किंप्रमाणा
श्चेतितदर्थमिदंक्रमेणपरिगृहीतप्रश्नापेक्षंभेदंसूत्रंप्रणीयते श्री नामप्रत्ययाः सर्वतोयोगविशेषा
त्सूक्ष्मैकक्षेत्रावगाहस्थिताः सर्वात्मप्रदेशेष्वनंतानंतप्रदेशाः श्री नाम्नः प्रत्ययानामप्रत्ययानामेति
सर्वाः कर्म्मप्रकृतयोऽभिधीयंतेसप्रथानामेतिवचनात् अनेनहेतुभावउक्तः सर्वेषुभवेषुसर्वतः इ

१५३

र्यंतेन्मातोपीतितसिकृतेसर्वतः अनेनकालोपादानंकृतं एकैकस्यहिजीवस्यातिक्रांताः अनंताभवाआ
गामिनः संख्येयासंख्येया अनंतानंताभवंति योगविशेषान्निमितात्कर्म्मभावेनपुद्गलाआदीयंतेइति
निमित्तविशेषनिर्देशः कृतोभवति सूक्ष्मादिग्रहणंकर्म्मग्रहणयोग्यपुद्गलस्वभावानुवर्त्तनार्थंग्रहण
योग्याःपुद्गलाः सूक्ष्मानस्थूलाइति एकक्षेत्रावगाहवचनंक्षेत्रांतरनिवृत्त्यर्थं स्थिताइतिवचनंक्रियां
तरनिवृत्त्यर्थं स्थितानगच्छंतइति सर्वात्मप्रदेशेष्विति वचनं आधारनिर्देशार्थंनैकप्रदेशादिषुकर्म्मप्र
देशावर्त्ततेकृतर्हि ऊर्द्धमधस्तिर्यक्चसर्वेष्वात्मप्रदेशेषुव्याप्यस्थिताइति अनंतानंतप्रदेशवचनं
परिमाणांतरव्यपोहार्थंनसंख्येयाः नचासंख्येयाः नाप्यनंताइति तेखलुपुद्गलस्कंधाः अभव्यानंतगु
णाःसिद्धानंतभागप्रमितप्रदेशाः घनांगुलस्यासंख्येयभागक्षेत्रावगाहिनः एकद्वित्रिचतुःसंख्येयाऽ
संख्येयसमयस्थितिकाः पंचवर्णपंचरसाः द्विगंधचतुःस्पर्शभावाः अष्टविधकर्म्मप्रकृतियोग्याः योगव

शादात्मसात्क्रियंत इति प्रदेशबंधः समासतो वेदितव्यः ॥ आह बंधपदार्थानंतरं पुण्यपापोपसंख्यानं चो
दितं तद्बंधांतर्भूतमिति प्रत्याख्यातं तत्रेदं वक्तव्यं कोत्र पुण्यबंधः कः पापबंध इति तत्र पुण्यप्रकृतिपरिग
णनार्थमिदमारभ्यते ॥ सद्वेद्यशुभायुर्नामगोत्राणि पुण्यं ॥ शुभं प्रशस्तमिति यावत् तद्गुणैः प्र
त्येकमभिसंबध्यते शुभमायुः शुभनाम शुभगोत्रमिति शुभायुस्त्रितयं तिर्यगायुर्मनुष्यायुर्देवायुरिति
शुभनाम्नः सप्तत्रिंशद्विकल्पं तद्यथा मनुष्यगतिर्देवगतिः पंचेंद्रियजातिः पंचशरीराणि त्रीण्यंगो
पांगानि समचतुरस्रसंस्थानं वज्रर्षभनाराचसंहननं प्रशस्तवर्णरसगंधस्पर्शाः मनुष्यदेवगत्यानुपू
र्व्यद्वयं अगुरुलघुपरघातोच्छ्वासातपोद्योतप्रशस्तविहायोगतयः त्रसबादरपर्याप्तिप्रत्येकशरीरस्थि
रशुभसुभगसुस्वरादेययशःकीर्त्तयः निर्माणं तीर्थकरनाम चेति शुभमेकमुच्चैर्गोत्रं सद्वेद्यमिति एता
द्वाचत्वारिंशत्प्रकृतयः पुण्यसंज्ञाः ॥ अतोन्यत्पापं ॥ अस्मात्पुण्यसंज्ञिकर्म्मप्रकृतिसमूहादन्य १५४

त् कर्म्म पापमित्युच्यते तत्द्व्यशीतिविधं तद्यथा ज्ञानावरणस्य प्रकृतयः पंच दर्शनावरणस्य नव मोह
नीयस्य षड्विंशतिः पंचांतरायस्य नरकगतितिर्यग्गती चतस्रो जातयः पंच संस्थानानि पंच संहननानि
अप्रशस्तवर्णगंधरसस्पर्शाः नरकगतितिर्यग्गत्यानुपूर्व्यद्वयमुपघाताप्रशस्तविहायोगतिस्थाव
रसूक्ष्मापर्याप्तिसाधारणशरीरास्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्त्तयश्चेति नामप्रकृतयश्चतु
स्त्रिंशत् असद्वेद्यं नरकायुर्नीचैर्गोत्रमिति एवं व्याख्यातः सप्रपंचो बंधपदार्थः अवधिमनःपर्ययके
वलज्ञानप्रत्यक्षप्रमाणगम्यस्तदुपदिष्टागमानुमेयः ॥ इति तत्वार्थवृत्तौ सर्वार्थसिद्धिसंज्ञिका
यां अष्टमोध्यायः समाप्तः इति ॥ बंधपदार्थो निर्दिष्टः इदानीं तदनंतरोद्देशभाजः संवरस्य निर्दे
शः प्राप्तकाल इत्यत इदमाह ॥ आस्रवनिरोधः संवरः ॥१॥ अभिनवकर्मादानहेतुरास्रवो व्या
ख्यातः तस्य निरोधः संवर इत्युच्यते स द्विविधो भावसंवरो द्रव्यसंवरश्चेति तत्र संसारनिमित्तक्रिया

DR. BHAU DAJI MEMORIAL

निवृत्तिर्भावसंवरः तन्निरोधे तत्पूर्वकर्मपुद्गलादानविछेदो द्रव्यसंवरः इदं विचार्यते कस्मिन्गुणस्था
नेकस्य संवर इति अत्रोच्यते मिथ्यादर्शनकर्मोदयवशीकृतः आत्मा मिथ्यादृष्टिः तत्र मिथ्यादर्शनप्रा
धान्येन यत्कर्म आश्रवति तन्निरोधात् शेषे सासादनसम्यग्दृष्ट्यादौ तत्संवरो भवति किं पुनस्तत् मिथ्या
त्वनपुंसकवेदनरकायुर्नरकगत्येकद्वित्रिचतुरिंद्रियजातिहुंडसंस्थानासंप्राप्तासृपाटिकासंह
नननरकगतिप्रायोग्यानुपूर्व्यातपस्थावरसूक्ष्मापर्याप्तकसाधारणशरीरसंज्ञकषोडशप्रकृतिल
क्षणं असंयमस्त्रिविधः अनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानोदयविकल्पात् तत्प्रत्ययस्य कर्मणः
तदभावे संवरो वेदितव्यः तद्यथा निद्रानिद्राप्रचलाप्रचलास्त्यानगृद्ध्यनंतानुबंधिक्रोधमानमायालो
भस्त्रीवेदतिर्यगायुस्तिर्यग्गतिचतुःसंस्थानचतुःसंहननतिर्यग्गतिप्रायोग्यानुपूर्व्योद्योताप्रशस्त
विहायोगतिदुर्भगदुःस्वरानादेयनीचैर्गोत्रसंज्ञिकानां पंचविंशतिप्रकृतीनां अनंतानुबंधिकषायोद

यकृतासंयमप्रधानाश्रवाणां एकेंद्रियादयः सासादनसम्यग्दृष्ट्यंताः बंधकास्तदभावे तासामुत्तरत्र सं
वरः अप्रत्याख्यानावरणक्रोधमानमायालोभमनुष्यायुर्मनुष्यगत्यौदारिकशरीरतदंगोपांगवज्रर्ष
भनाराचसंहननमनुष्यगतिप्रायोग्यानुपूर्व्यनाम्नां दशानां प्रकृतीनां अप्रत्याख्यानकषायोदयकृता
संयमहेतुकानां एकेंद्रियादयः असंयतसम्यग्दृष्ट्यंताः बंधकाः तदभावादूर्ध्वं तासां संवरः सम्यग्मि॰
थ्यात्वगुणेन आयुर्न बध्यते प्रत्याख्यानावरणक्रोधमानमायालोभानां च तसृणां प्रकृतीनां प्रत्याख्यान
कषायोदयकारणासंयमाश्रवाणां एकेंद्रियप्रभृतयः संयतासंयतावसानाः बंधकास्तदभावादुपरि
ष्टात्तासां संवरः प्रमादोपनीतस्य तदभावान्निरोधः प्रमादेनोपनीतस्य कर्मणः प्रमत्तसंयतादूर्ध्वं तदभा
वान्निरोधः प्रत्येतव्यः प्रत्येतव्यः किं पुनस्तत् असद्वेद्यारतिशोकास्थिराशुभायशःकीर्त्तिविकल्पं देवा
युर्बंधारंभस्य प्रमाद एव हेतुरप्रमादोपि तत्प्रत्यासन्नस्तत ऊर्ध्वं तस्य संवरः कषाय एवाश्रवो यस्य क

१५६ म्मैराः नप्रमादादितन्निरोधेनिरासोवसेयः सचकषायप्रमादादिविरहितः तीव्रमध्यमजघन्यभावेनत्रिषु
गुणस्थानेषुव्यवस्थितः तत्रापूर्वकरणस्यादौसंख्येयभागेद्वेकर्म्मप्रकृतीनिद्राप्रचलेवध्येतेततऊर्द्ध
संख्येयभागेत्रिंशत्प्रकृतयोदेवगतिपंचेंद्रियजातिवैक्रियकाहारकतैजसकार्म्मणशरीरसमचतुर
स्रसंस्थानवैक्रियिकाहारशरीरांगोपांगवर्णगंधरसस्पर्शदेवगत्यानुपूर्व्यागुरुलघुउपघातप
रघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकशरीरस्थिरशुभसुभगसुस्वरादेयनिर्मा
णतीर्थकराख्याः वध्यंते तस्यैवचरमसमयेचतस्रः प्रकृतयःहास्यरतिभयजुगुप्सासंज्ञावंधमुपयांति
तावतास्तीव्रकषायाश्रवाः तदभावान्निर्द्दिष्टात् भागादूर्द्धंसंव्रियंते अनिवृत्तिवादरसांपरायस्यादिसम
यादारभ्यसंख्येयेषुभागेषुपुंवेदक्रोधसंज्वलनौवध्येते ततऊर्द्धंशेषेषुसंख्येयेषुभागेषुमानसंज्वलन
मायासंज्वलनौवंधमुपगच्छतः तस्यैवचरमसमयेलोभसंज्वलनोवंधमेति तावताः प्रकृतयः मध्यमकषा १५६

याश्रवास्तदभावेनिर्द्दिष्टस्यभागस्योपरिष्टात्संवरमाप्नुवंति पंचानांज्ञानावरणानांचतुर्णांदर्शनावरणानांय
शःकीर्त्तिरुच्चैर्गोत्रस्यपंचानामंतरायाणांचमंदकषायाश्रवाणांसूक्ष्मसांपरायोवंधकः तदभावादुत्तर
त्रतेषांसंवरः केवलेनैवयोगेनसद्वेद्यस्यउपशांतकषायक्षीणकषायसयोगानांवंधोभवतितदभावाद
योगकेवलिनस्तस्यसंवरोभवति उक्तःसंवरः तद्धेतुप्रतिपादनार्थमाह श्री सगुप्तिसमितिधर्म्मानुप्रे
क्षापरीषहजयचारित्रैः यतःसंसारकारणादात्मनोगोपनंसभवतिसागुप्तिः प्राणिपीडापरिहारार्थंस
म्यगयनंसमितिः इष्टेस्थानेधत्तेइतिधर्म्मः शरीरादीनांस्वाभावानुचिंतनमनुप्रेक्षाः क्षुदादिवेदनोत्पत्तौ
कर्म्मनिर्ज्जरार्थंसहनंपरीषहः परीषहस्यजयः चारित्रशब्दः आदिसूत्रेव्याख्यातार्थः एतेषांगुप्त्यादीनांसं
वरणक्रियायाः साधकतमत्वात् करणनिर्द्देशः संवरोधिकृतोपिसइतितच्छब्देनपरामृश्यते गुप्त्या
दिभिःसाक्षात्संवंधनार्थः किंप्रयोजनमवधारणार्थंसएवसंवरोगुप्त्यादिभिरेवनान्येनोपायेनेति तेनती

१५७ तीर्थाभिषेकदीक्षाशीर्षोपहारदेवताराधनादयः निवर्त्तिता भवंति रागद्वेषमोहोपात्तस्य कर्म्मणः अन्य
थानिवृत्तिसद्भावात् संवरनिर्ज्जराहेतुविशेषप्रतिपादनार्थमाह श्री तपसा निर्ज्जरा च तपो धर्म्मेंतर्भूतम
पि पृथगुच्यते उभयसाधनत्वख्यापनार्थं संवरं प्रति प्राधान्यप्रतिपादनार्थं च ननु च तपोभ्युदयांगमिष्टं दे
वेंद्रादिस्थानप्राप्तिहेतुत्वाभ्युपगमात् कथं निर्ज्जरांगं स्यादिति नैष दोषः एकस्यानेककार्यदर्शनाद
ग्निवत् यथाग्निरेकोपि पचनविक्लेदनभस्मसाद्भावादिप्रयोजनं उपलभ्यते तथा तपोऽभ्युदयकर्म्मेमाह
श्री सम्यग्योगनिग्रहो गुप्तिः योगो व्याख्यातः कायवाङ्मनःकर्म्म योग इत्यत्र तस्य स्वेच्छाप्रवृत्तिनिवर्त्तनं
निग्रहः विषयसुखाभिलाषार्थप्रवृत्तिनिषेधार्थं सम्यग्विशेषणं तस्मात् सम्यग्विशेषणविशिष्टात्
संक्लेशाप्रादुर्भावपरात् कायादियोगनिरोधे सति तन्निमित्तं कर्म्म नास्रवतीति संवरप्रसिद्धिरवगंतव्या
सा त्रितयी कायगुप्तिर्वाग्गुप्तिर्मनोगुप्तिरिति तत्राशक्तस्य मुनेर्निरवद्यप्रवृत्तिख्यापनार्थमाह श्री इर्या १५७

भाषैषणादाननिक्षेपोत्सर्ग्गाः समितयः श्री सम्यगित्यनुवर्त्तते तेनेर्यादयो विशेष्यंते सम्यगीर्या सम्यग्भा
षा सम्यगेषणा सम्यगादाननिक्षेपो सम्यगुत्सर्ग्ग इति ता एताः पंच समितयः विदितजीवस्थानादिविधेर्मु
नेः प्राणिपीडापरिहाराभ्युपायाः वेदितव्याः तथा प्रवर्त्तमानस्य असंयमपरिणामनिमित्तकर्म्मास्रवाभा
वात् संवरो भवति तृतीयस्य संवरहेतोः धर्म्मस्य भेदप्रतिपत्त्यर्थमाह श्री उत्तमक्षमामार्द्दवार्ज्जवसत्य
शौचसंयमतपस्त्यागाकिंचन्यब्रह्मचर्याणि धर्म्मः श्री किमर्थमिदमुच्यते आद्यं प्रवृत्तिनिग्रहार्थं त
त्रासमर्थानां प्रवृत्त्युपायप्रदर्शनार्थं द्वितीयं इदं पुनः दशविधधर्म्माख्यानं समितिषु प्रवर्त्तमानस्य प्रमा
दपरिहारार्थं वेदितव्यं शरीरस्थितिहेतुमार्ग्गणार्थं परकुलान्युपगच्छतो भिक्षोर्दुष्टजनाक्रोशप्रहसनाव
ज्ञाताडनशरीरव्यापादनादीनां सन्निधाने कालुष्यानुत्पत्तिः क्षमा जात्यादिमदावेशादभिमानाभावो मार्द्दवं
माननिर्हरणं योगस्यावक्रतार्ज्जवं प्रकर्षप्राप्तलोभान्निवृत्तिः शौचं सत्सु प्रशस्तेषु जनेषु साधुवचनं सत्यमि

१५८ क्ष्यते ननु चैतद्भाषासमितावंतर्भावात नैषदोषः समितौप्रवर्त्तमानोमुनिः साधुष्वसाधुषुचभाषाव्यवहा
रंकुर्वन् हितंमितंचब्रूयादन्यथारागादनर्थदंडदोषःस्यादितिवाक्समितिरित्यर्थः इहपुनःसंतःप्रव्रजितः
तद्भक्तावायेतेषुसाधुवचनंसत्यंज्ञानचारित्रशिक्षणादिषुबह्वपिकर्त्तव्यमित्यनुज्ञायतेधर्म्मोपबृंहणार्थं
समितिषुवर्त्तमानस्यप्राणींद्रियपरिहारःसंयमःकर्म्मक्षयार्थंतप्यत इतितपः तदुत्तरत्रवक्ष्यमाणंद्वा
दशविकल्पमवसेयं संयतस्ययोग्यंज्ञानादिदानंत्यागः उपात्तेष्वपिशरीरादिषुसंस्कारापोहाय ममेद
मित्यभिसंधिनिवृत्तिराकिंचन्यं नास्यकिंचनास्त्यकिंचनः तस्यभावः कर्म्मवाआकिंचन्यं अनुभूतांगना
स्मरणकथाश्रवणस्त्रीसंसक्तशयनासनादिवर्जनाद्ब्रह्मचर्यंपरिपूर्णंभवति ष्टते स्वतंत्रवृत्तिनिवृ
त्त्यर्थोवागुरुकुलेषुब्रह्मचर्यंदृष्टप्रयोजनपरिवर्जनार्थमुत्तमविशेषणंतान्येवंभाव्यमानानिधर्म्मव्यपदे
शभाञ्जि स्वगुणप्रतिपक्षदोषसद्भावनाप्रणिहितानिसंवरकारणानिभवंति आहक्रोधाद्यनुत्पत्तिःक्षमा १५८

दिविशेषः प्रत्यनीकालंबनादिस्फक्तं तत्रकस्मात्क्षमादीनयमवलंबतेनान्यथा प्रवर्त्तत इत्युच्यते यत्
स्मात्तप्तायस्पिंडवत्क्षमादिपरिणतेनात्महितैषिणाकर्त्तव्याः ॥६॥ अनित्याशरणसंसारैकत्वान्यत्वाशु
च्यास्रवसंवरनिर्जरालोकबोधिदुर्लभधर्मस्वाख्याततत्त्वानुचिंतनमनुप्रेक्षाः ॥७॥ इमानिशरीरेंद्रियविष
योपभोगपरिभोगद्रव्याणिसमुदयरूपाणिजलबुद्बुदवदनवस्थितस्वभावानि गर्भादिष्ववस्थावि
शेषेषु सदोपलभ्यमानसंयोगविपर्ययाणिमोहादत्राज्ञोनित्यतांमन्यते नकिंचित्संसारेसमुदितं ध्रुव
मस्ति आत्मनोज्ञानदर्शनोपयोगस्वभावादन्यदितिचिंतनं अनित्यानुप्रेक्षणवस्यस्यभव्यस्यचिंतयतः
तेष्वभिष्वंगाभावात् भुक्तोज्झितगंधमाल्यादिष्विववियोगकालेपिविनिपातोनोत्पद्यते यथामृगशाव
स्यैकांतेबलवताक्षुधितेनामिषैषिणाव्याघ्रेणाभिभूतस्यनकिंचिच्छरणमस्ति तथाजन्मजरामृत्यु
व्याधिप्रभृतिव्यसनमध्येपरिभ्रमतोजंतोःशरणंनविद्यतेपरिपुष्टमपिशरीरंभोजनंप्रतिसहायीभवतिन

व्यसनोपनिपाते यत्नेन संचितोर्थोपि न भवांतरमनुगच्छति संविभक्तसुखदुःखा सुहृदोपि न मरण
कालेपरित्रायंते बांधवाः समुदिताश्च रुजापरीतं न परिपालयंति अस्ति च सुचरितो धर्म्मः व्यसनमहा
र्णवे तरणोपायो भवति मृत्युनानीयमानस्य सहस्रनयनादयो न शरणं तस्माद्भवव्यसनसंकटे धर्म्म
एव शरणं सुहृदर्थोप्यनपायी नान्यत्किंचिच्छरणमिति भावनमशरणानुप्रेक्षा एवं ह्यस्याध्यवस्य
तः नित्यमशरणोस्मीति भृशमुद्विग्नस्य सांसारिकेषु भावेष्वममत्वविनाशो भवति भगवदर्हत्सर्व
ज्ञप्रणीतपवमार्ग्गे प्रतिपत्तो भवति कर्म्मविपाकवशादात्मनो भवांतरावाप्तिः संसारः स पुरस्तात्पं
चविधपरिवर्त्तनरूपेण व्याख्यातः तस्मिन्ननेकयोनिकुलकोटिबहुशतसहस्रसंकटे संसारे परिभ्र
मन् जीवः कर्म्मयंत्रप्रेरितः पिता भूत्वा भ्राता पुत्रः पौत्रश्च भवति माता भूत्वा भगिनी भार्या दुहिता च भव
ति स्वामी भूत्वा दासो भवति दासो भूत्वा स्वाम्यपि भवति नट इव रंगे अथवा किं बहुना स्वयमात्मनः पुत्रो १५९

भवतीत्येवमादि संसारस्वभावचिंतनं संसारानुप्रेक्षा एवं ह्यस्य भावयतः संसारदुःखभयादुद्विग्नस्य
ततो निर्वेदो भवति निर्विण्णश्च संसारप्रहाणाय प्रतियतते जन्मजरामरणानुवृत्तिमहादुःखानु
भवं प्रति एक एवाहं न कश्चिन्मे स्वः परो वा विद्यते एक एवाहं जाये एक एव म्रिये न मे कश्चित्स्वजनः
परजनो वा व्याधिजरामरणादीनि दुःखान्यपहरति बंधुमित्राणि स्मशानं नातिवर्त्तंते धर्म्म एव मे
सहायः सदा अनपायीति चिंतनमेकत्वानुप्रेक्षा एवं ह्यस्य भावयतः स्वजनेषु प्रीत्यनुबंधो न भव
ति परजनेषु च द्वेषानुबंधो नोपजायते ततो निःसंगतामभ्युपगतो मोक्षायैव घटते शरीरादन्य
त्वचिंतनमन्यत्वानुप्रेक्षा तद्यथा बंधं प्रत्येकत्वे सत्यपि लक्षणभेदात् अन्योहं ऐंद्रियकं शरीरं अ
तींद्रियोहं अज्ञं शरीरं ज्ञोहं अनित्यं शरीरं नित्योहं आद्यंतवच्छरीरं अनाद्यंतोहं बहूनि मे शरीरश
तसहस्राणि अतीतानि संसारे परिभ्रमतः स एवायमहमन्यस्तेभ्य इत्येवं शरीरादप्यन्यत्वं मे किमंग पुन

BHAU DAJI MEMORIAL

१६० धीह्यस्यः परिग्रहेस्मः इत्येवह्यस्य मनः समादधानस्य शरीरादिषु स्पृहा नोत्पद्यते ततस्तत्वज्ञानभावना
पूर्वके वैराग्यप्रकर्षे सति आत्यंतिकस्य मोक्षसुखस्याप्तिर्भवति शरीरमिदमत्यंताशुचिप्रतिकयोनि
शुक्रशोणितअशुचिसंवर्द्धितमवस्करवदशुचिभाजनं त्वङ्मात्रप्रच्छादितं अतिपूतिरसनिष्यंदिश्रो
तोविलं अंगारवदात्मभावमाश्रितमप्याश्वेवापादयति स्नानानुलेपनधूपनधूपप्रघर्षवासमाल्या
दिभिरपि न शक्यमशुचित्वमपहर्तुमस्य सम्यग्दर्शनादिनां पुनर्भाव्यमानं जीवस्यात्यंतिकीं शुद्धिमा
विर्भावयतीति तत्वतो भावनमशुचित्वानुप्रेक्षा एवं ह्यस्य संस्मरतः शरीरनिर्वेदो भवति निर्विन्न
श्च जन्मोदधितरणाय चित्तं समाधत्ते आश्रवसंवरनिर्जराः पूर्वोक्ता अपि इहोपन्यस्यंते तद्गुणदो
षभावनार्थं आश्रवा इहामुत्रापाययुक्ताः महानदीश्रोतोवेगतीक्ष्णा इंद्रियकषायाव्रतादयः
तत्रेंद्रियाणि तावत्स्पर्शनादीनि वनगजवायसपन्नगपतंगहरिणादीन् व्यसनार्णवमवगाहयं १६०

ति तथा कषायादयोपि इह वधबंधापयशः परिक्लेशादीन् जनयंति अमुत्र च नानागतिषु बहुविध
दुःखप्रज्वलितासु परिभ्रमयंतीत्येवमाश्रवदोषानुचिंतनमाश्रवानुप्रेक्षा एवं ह्यस्य चिंतयतः
क्षमादिषु श्रेयस्त्वबुद्धिर्न प्रच्यवते सर्वे एते आश्रवदोषाः कूर्म्मवत्संवृतात्मनो न भवंति यथा महा
र्णवे नावो विवरपिधाने असति क्रमात् श्रुतजलाभिप्लवे सति तदाश्रयाणां विनाशोवश्यंभावी छि
द्रपिधाने च पुनः निरुपद्रवमभिलषितदेशांतरप्रापणं तथा कर्म्मागमद्वारसंवरणे सति नास्ति श्रेयः
प्रतिबंध इति संवरगुणानुचिंतनं संवरानुप्रेक्षा एवं ह्यस्य चिंतयतः संवरे नित्योद्युक्तता भवति तत
श्च निःश्रेयसपदप्राप्तिरिति निर्जरा वेदनाविपाक इत्युक्तं सा द्वेधा अबुद्धिपूर्वा कुशलमूला चेति त
त्र नरकादिषु गतिषु कर्म्मफलविपाकजा अबुद्धिपूर्वा सा अकुशलानुबंधा परीषहजये कृते कुशल
मूला सा शुभानुबंधा निरनुबंधा चेत्येवं निर्जराया गुणदोषान् भावनं निर्जरानुप्रेक्षा एवं ह्यस्यानुस्मरतः

कर्म्मनिर्ज्जरार्थे वृत्तिर्भवति लोकसंस्थानादिविधिर्व्याख्यातः समंतादनंतस्यालोकाकाशस्य बहुमध्य
देशस्थाविनो लोकस्य संस्थानादिविधिर्व्याख्यातः तत्स्वभावानुचिंतनं लोकानुप्रेक्षा एवं ह्यस्याध्यवस्य
तस्तत्त्वज्ञानविशुद्धिर्भवति एकस्मिन्निगोतशरीरे जीवाः सिद्धानामनंतगुणाः एवं सर्वलोको निरंतरं नि
चितः स्थावरैरतस्तत्र त्रसता वालिकासमुद्रे पतिता वज्रसिकताकणिकेव दुर्लभा तत्र च विकलेंद्रिया
णां भूयिष्ठत्वात् पंचेंद्रियता गुणेषु कृतज्ञतेव कृच्छ्रलभ्या तत्र च तिर्यक्षु पशुमृगपक्षिशरीसृपादिषु बहु
कृत्वःसु मनुष्यभवः चतुष्पथे रत्नराशिरिव दुरासदः ततश्च्युतस्य च पुनस्तदुपपत्तिर्दग्धतरुपुद्गलतद्भा
वोपपत्तिवत् दुर्लभा तीत्रालभ्ये च देशकुलेंद्रियसंपन्नीरोगत्वान्युत्तरोत्तरतः अतिदुर्लभानि सर्वेष्वपि
तेषु लब्धेषु सद्धर्मप्रतिलंभो यदि न स्यात् व्यर्थं जन्म वदनमिव दृष्टिविकलं तमेवं कृच्छ्रलभ्यं धर्मम
वाप्य विषयसुखे रंजनं भस्मार्थं चंदनदहनमिव विकलं विरक्तविषयसुखस्य तु तपोभावनाधर्मप्र

भावनासुखमरणादिलक्षणः सत्याधिष्ठितः विनयमूलः क्षमाबलः ब्रह्मचर्यगुप्तः उपशमप्रधानः नियति
लक्षणो निष्परिग्रहतालंबनः अस्यालाभतश्चानादिसंसारे जीवाः परिभ्रमंति दुःकर्म्मविपाकजं दुःखं
अनुभवंतः अस्य पुनः प्रतिलंभे विविधाभ्युदयप्राप्तिपूर्विका निःश्रेयसोपलब्धिर्नियतेति चिंतनं धर्म
स्वाख्याततत्त्वानुप्रेक्षा एवं ह्यस्य चिंतयतो धर्मानुरागात् सदा प्रतियत्नो भवति एवमनित्यत्वाद्यनुप्रेक्षा
सन्निधाने उत्तमक्षमादिधारणात् महान् संवरो भवति मध्ये नुप्रेक्षावचनं उभयार्थं अनुप्रेक्षा हि भाय
नुत्तमक्षमादींश्च प्रतिपालयति परीषहांश्च येनुमुत्सहते के पुनस्ते परीषहाः किमर्थं वा सह्यंत इति इ
दमाह श्री मार्गाच्यवननिर्ज्जरार्थं परिषोढव्याः परीषहाः श्री संवरस्य प्रकृतत्वात् तेन मार्गो विशेष्यते सं
वरमार्ग इति तदच्यवनार्थं च निर्ज्जरार्थं च परिसोढव्याः परीषहाः क्षुत्पिपासादिसहनं कुर्वतः जिनोपदि
ष्टतिमर्यादप्रच्यवमानाः तन्मार्गपरिक्रमणपरिचयेन कर्म्मागमद्वारसंवृण्वंतः उपक्रमिकं कर्म्मफलमनु

१६२ नवतः क्रमेणनिर्ज्जीर्णकर्म्मणः मोक्षमवाप्नुवंति तत्स्वरूपसंख्यासंप्रतिपत्त्यर्थमाह श्री क्षुत्पिपासाशीतो
ष्णदंशमशकनाग्न्यारतिस्त्रीचर्य्यानिषद्याशय्याक्रोशवधयाचनालाभरोगतृणस्पर्शमलसत्कारपुरस्का
रप्रज्ञाज्ञानादर्शनानि क्षुदादयोवेदनाविशेषाः द्वाविंशतिरेतेषांसहनंमोक्षार्थिनाकर्त्तव्यं तद्यथा भिक्षो
र्निरवद्याहारगवेषिणः तदलाभेईषल्लाभेचअनिवृत्तवेदनस्यअकालेअदेशेचभिक्षांप्रतिनिवृत्तेच्छस्य
आवश्यकपरिहाणिंमनागप्यसहमानस्यस्वाध्यायध्यानभावनापरस्यबहुकृत्वः स्वकृतपरकृतानशना
वमोदर्यस्यनीरसाहारस्यतसभ्राष्ट्रपतितजलबिंदुकतिपयवत् सहसापरिशुष्कपानस्यउदीर्णक्षुद्वेद
नस्यापिसतः भिक्षालाभादलाभमधिकगुणंमन्यमानस्यक्षुद्बाधांप्रत्यचिंतनंक्षुद्विजयः १ जलस्नानाव
गाहनपरिषेकपरित्यागिनः पतत्त्रिवदनियतासनावसथस्य अतिलवणस्निग्धरूक्षविरुद्धाहारग्रैष्मा
तपपित्तज्वरानशनादिभिरुदीर्णांशरीरेंद्रियोन्माथिनींपिपासांप्रतिनादियमानप्रतीकारस्यपिपासान १६२

लशिखांधृतिनवमृद्घटपूरितशीतलसुगंधिसमाधिवारिणाप्रशमयतः पिपासासहनंप्रशस्यते २ परित्य
क्तप्रच्छादनस्यपक्षिवदनवधारितालयस्यवृक्षमूलपथिशिलातलादिषुहिमानीपतनशीतानिलसंपाते
तत्प्रतीकारप्राप्तिंप्रतिनिवृत्तेच्छस्यपूर्वानुभूतशीतप्रतीकारहेतुवस्तूनांअस्मरतः ज्ञानभावनागर्भागारे
वसतः सीतवेदनापरिसहनंकीर्त्यते ३ निर्वाते निर्जले ग्रीष्मरविकिरणपरिशुष्कपतितपर्णव्यपेतच्छा
यातरुण्यटव्यंतरेयदृच्छयोपनिपतितस्यानशनाद्यभ्यंतरसाधनोत्पादितदाहस्यदवाग्निदाहपरुषवा
तातपजनितगलतालुशोषस्यतत्प्रतीकारहेतून्बहूननुभूतानचिंतयतः प्राणिपीडापरिहारावहितचेत
सः चारित्ररक्षणमुष्णसहनमित्युपवर्ण्यते दंशमशकग्रहणंदंशमशकोपलक्षणं यथाकाकेभ्योरक्ष्यतां
सर्पिरिति उपघातकोपलक्षणंकाकग्रहणं तेनदंशमशकमक्षिकापिशुकपुत्तिकामत्कुणकीटपिपीलिका
वृश्चिकादयोगृह्यंते तत्कृतांबाधामप्रतीकारां सहमानस्यतेषांबाधांत्रिधाप्यकुर्वाणस्यनिर्वाणप्राप्तिमात्रसं

कल्पप्रावरणस्य तद्वेदनासहनं दंशमशकपरीषहक्षमेत्युच्यते ४ जातरूपवन्निष्कलंकं जातरूपधारणमश
क्यप्रार्थनीयं याचनरक्षणहिंसनादिदोषविनिर्मुक्तं निःपरिग्रहत्वान्निर्वाणप्राप्तिं प्रत्येकं साधनमनन्यबा
धनं नाग्न्यं बिभ्रतः नमोविक्रियाविप्लुतिविरहात् स्त्रीरूपाण्यत्यंताशुचिकुणपरूपेण भावयतः रात्रिंदिवं ब्र
ह्मचर्यमखंडमातिष्ठमानस्याचेलव्रतधारणमनवद्यमवगंतव्यं ५ संयतस्येंद्रियेष्टविषयसंबंधं प्रतिनि
रुत्सुकस्य गीतनृत्यवादित्रादिविरहितेषु शून्यागारदेवकुलतरुकोटरशिलागुहादिषु स्वाध्यायध्यानभा
वनारतिमास्कंदतः दृष्टश्रुतानुभूतरतिस्मरणतत्कथाश्रवणकामशरप्रवेशनिर्विवरहृदयस्य प्राणिषु
सदासदयस्य अरतिपरीषहजयो वसेयः ६ एकांतेषु आरामभवनादिप्रदेशेषु नवयौवनमदविभ्रममदि
रापानप्रमत्तप्रमदासु बाधमानासु कूर्मवत्संहृतेंद्रियहृदयविकारस्य ललितस्मितमृदुकथितसविला
सवीक्षणप्रहसनमदमंथरगमनमन्मथशरव्यापारविफलीकरणवरणस्य स्त्रीबाधापरीषहसहनमव १६३

गंतव्यं ७ दीर्घकालमुषितगुरुकुलब्रह्मचर्यस्य अधिगतबंधमोक्षपदार्थतत्त्वस्य संयमायतनभक्तिहेतोः दे
शांतरातिथेः गुरुणाभ्यनुज्ञातस्य पवनवन्निःसंगतामंगीकुर्वतः बहुशोऽनशनावमोदर्यवृत्तिपरिसंख्यान
रसपरित्यागादिबाधापरिक्लांतकायस्य देशकालप्रमाणोपेतमगमनं संयमविरोधिपरिहरतः निराकृत
पादावरणस्य परुषशर्कराकंटकादिव्यधनजातचरणखेदस्यापि सतः पूर्वोचितयानवाहनादिगमनम
स्मरतः यथाकालमावश्यकापरिहाणिमास्कंदतः चर्यापरीषहसहनमवसेयं ८ श्मशानोद्यानशून्या
यतनगिरिगुहागह्वरादिष्वभ्यस्तपूर्वेषु निवसतः आदित्यस्वेंद्रियज्ञानप्रकाशपरीक्षितप्रदेशे कृतनि
यमक्रियस्य निषद्यां नियमितकालामास्थितवतः सिंहव्याघ्रादिविविधभीषणध्वनिश्रवणान्निवृत्तभयस्य
चतुर्विधोपसर्गसहनादप्रच्युतमोक्षमार्गस्य वीरासनोत्कुटिकाद्यासनादविचलितविग्रहस्य तत्कृतबाधासह
नं निषद्यापरीषहविजय इति निश्चीयते ९ स्वाध्यायध्यानाध्वश्रमपरिखेदितस्य मौहूर्तिकीं खरविषमप्र

प

१६४ क्षुरशर्क्करा कपालसंकटातिशीतोष्णेषु भूमिप्रदेशेषु निद्रामनुभवतः यथाकृतैकपार्श्वदंडायतादिसायिनः
प्राणिबाधापरिहाराय पतितदारुवद्व्यपगतासुवदपरिवर्त्तमानस्य ज्ञानभावनावहितचेतसोनुष्ठितव्यंत
रादिविविधोपसर्गादप्यचलितविग्रहस्य अनियमितकालांतरत्कृतबाधांक्षममानस्य शय्यापरीषहक्षमा
कथ्यते १० मिथ्यादर्शनोद्रिक्तामर्षपरुषावज्ञानिंदासभ्यवचनानि क्रोधाग्निशिखाप्रवर्द्धनानि सृण्व
तोपि तदर्थेष्वसमाहितचेतसः सहसा तत्प्रतीकारं कर्त्तुमपि शक्नुवतः पापकर्म्मविपाकमभिचिंतयतः
तान्याकर्ण्य तपश्चरणभावनापरस्य कषायविषलवमात्रस्याप्यनवकाशमात्महृदयं कुर्वत आक्रोश
परीषहसहनमवधार्यते ११ तिक्ष्णासिमुशलमुद्गरादिप्रहरणताडनपीडनादिभिः व्यापा
द्यमानशरीरस्य व्यापादकेषु मनागपि मनोविकारमकुर्वतः मम पुराकृतदुःकर्म्मफलमिदमिमेवराकाः
किंकुर्वंति शरीरमिदं जलबुद्बुदवत् विशरणस्वभावं व्यसनकारणं एतैर्वाबाध्यते सज्ञानदर्शनचारित्राणि १६४

मम नकेनचिदुपहन्यंते इति चिंतयतः वाशीतक्षणचंदनानुलेपनसमदर्शिनो वधपरीषहक्षमा मन्यते १२
बाह्याभ्यंतरतपोनुष्ठानपरस्य तद्भावनावसेन निःसारीकृतमूर्त्तेः पटुतपनतापनिःपीतसारतरोरिव विरहित
छायस्य त्वगस्थिसिराजालमात्रतनुयंत्रस्य प्राणात्ययेपि आहारवसतिभेषजादीनि दीनाभिधानमुखवैव
र्ण्यांगसंज्ञादिभिरयाचमानस्य भिक्षाकालेपि विद्युदुद्योतवद्दुरुपलक्ष्यमूर्त्तेर्याचनपरीसहनमवसीयते
१३ वायुवदसंगादनेकदेशचारिणः अभ्युपगतैककालसंभोजनस्य वाचंयमस्य तत्समस्य वा सकृत्स्वतनु
दर्शनमात्रतंत्रस्य पाणिपुटमात्रपात्रस्य बहुषु दिवसेषु बहुषु च गृहेषु भिक्षामनवाप्याप्यसंक्लिष्टचेतसः दा
तृविशेषपरीक्षानिरुत्सुकस्य लाभादप्यलाभो मे परमं तप इति संतुष्टस्यालाभविजयोवसेयः १४ सर्वासुचि
निधानमिदमनित्यमपरित्राणमिति शरीरे निःसंकल्पत्वाद्विगतसंस्कारस्य गुणरत्नभांडसंचयवर्द्धनसंरक्षण
संधारणकारणत्वादभ्युपगतस्थितिविधानस्य अक्षम्रक्षणवत् व्रणालेपनवद्बहूपकारमाहारं अभ्युप

DR. BHAU DAJI MEMORIAL

१६५ गछतः विरुद्धाहारपानसेवनवैषम्यजनितवातादिविकाररोगस्य युगपदनेकशतसंख्यव्याधिप्रकोपेसत्यपि
तद्दसवर्त्तितांविजहतः जल्लौषधिप्राप्त्याद्यनेकतपोविशेषर्द्धियोगेसत्यपिशरीरनिस्पृहत्वात्तत्प्रतीकारानपे
क्षिणः रोगपरीषहसहनमवगंतव्यं १५ तृणग्रहणमुपलक्षणंकस्यचिद्व्यधनदुःखकारणस्यतेनशुष्कतृणपरु
षशर्कराकंटकनिशितमृत्तिकाशूलादिव्यधनकृतपादवेदनाप्राप्तौसत्यांतत्राप्रणिहितचेतसः चर्याशय्या
निषद्यासुप्राणिपीडापरिहारेनित्यमप्रमत्तचेतसोमुनेस्तृणादिस्पर्शबाधापरीषहविजयोवेदितव्यः १६
अप्कायिकजंतुपीडापरिहारायामरणादस्नानव्रतधारिणः पटुरविकिरणप्रतापजनितप्रस्वेदाक्तपवना
नीतपांशुनिचयस्यसिध्मकछुदद्रूदीर्णकंडूयायामुत्पन्नायामपिकंडूयनविमर्द्दनसंघटनविवर्जितमूर्त्तेः
स्वगतमलोपचयपरमलोपचययोरसंकल्पितमनसः सज्ञानचारित्रविमलशलिलप्रक्षालनेनकर्म्ममल
पंकनिराकरणायनित्यमुद्यतमतेः मलपीडासहनमाख्यायते १७ सत्कारः पूजाप्रशंसात्मकः पुरस्कारोना १६५

मक्रियारंभादिष्वग्रतः करणमामंत्रणंवातत्रानादरोमयिक्रियते चिरोषितब्रह्मचर्यस्यमहातपस्विनः स्वप
रसमयनिर्णयज्ञस्यबहुकृत्वाः परवादिविजयिनः प्रणामभक्तिमंतः किंचिदजानंतमपिसर्वज्ञसंभावनया
सन्मान्यस्वसमयप्रभावनंकुर्वंति व्यंतरादयः पुरात्युग्रतपसांप्रत्यग्रपूजांनिर्वर्त्तयंतीतिमिथ्याश्रु
तिर्यदिनस्यात् इदानींकस्मात्मादृशांनकुर्वंतीतिदुःप्रणिधानविरहितचित्तस्यसत्कारपुरस्कारपरीष
हविजयइतिविज्ञायते १८ अंगपूर्वप्रकीर्णकविशारदस्यशब्दन्यायाध्यात्मनिपुणस्यममपुरस्तादितरे
भास्करप्रभाभिभूतखद्योतोद्योतवन्नितरांनावभासंतइतिविज्ञानमदनिरासः प्रज्ञापरीषहजयः प्रत्येतव्यः
१९ अज्ञोयंनवेत्तिपशुसमइत्येवमाद्यधिक्षेपवचनंसहमानस्यपरमदुश्चरतपोनुष्ठायिनः नित्यमप्रमत्त
चेतसोमेअद्यापिज्ञानातिशयोनोत्पद्यतइतिअनभिसंदधतोअज्ञानपरीषहजयोवगंतव्यः २० परमवैरा
ग्यभावनाशुद्धहृदयस्यविदितसकलपदार्थतत्वस्यअर्हदायतनसाधुधर्म्मपूजकस्यचिरंतनप्रव्रजित

१६६ स्याद्यापि मे ज्ञानातिशयो नोत्पद्यते महोपवासाद्यनुष्ठायिनां प्रातिहार्यविशेषाः प्रादुरभूवन्निति प्रलाप
मात्रमनर्थिकेयं प्रव्रज्या विफलं व्रतपरिपालनमित्येवमसमादधानस्य दर्शनविशुद्धियोगाददर्शनपरी
षहसहनमवसातव्यं २१ एवं परीषहानसंकल्पोपस्थितान्सहमानस्यासंक्लिष्टचेतसः रागादिपरिणा
मास्रवनिरोधान्महान्संवरो भवति आह किमिमे परीषहाः सर्वे संसारमहाटवीमतिक्रमितुमभ्युद्यतं अभिद्रवंति=४
उत कश्चित्प्रतिविशेषोऽस्तीति अत्रोच्यते अमी व्याख्यातलक्षणाः क्षुदादयः चारित्रांतराणि प्रति भाज्याः नि
यमेन पुनरनयोः प्रवृत्तिर्वाः श्री सूक्ष्मसांपरायछद्मस्थवीतरागयोश्चतुर्दश १० श्री क्षुत्पिपासाशीतो
ष्णदंशमशकचर्याशय्यावधालाभरोगतृणस्पर्शमलप्रज्ञाज्ञानानि चतुर्दश इति वचनादन्येषां परीष
हाणामभावो वेदितव्यः आह युक्तं तावत् वीतरागछद्मस्थे मोहनीयाभावात् वक्ष्यमाणनाग्न्यारतिस्त्री
निषद्याक्रोशयाचनसत्कारपुरस्कारादर्शनानि निराति तत्कृताष्टपरीषहाभावात् चतुर्दशनियमवचनं सू १६६

=१ सद्भावात् चतुर्दशेति नियमो नोपपद्यते॥ तदयुक्तं॥ सन्मात्रत्वात्। तत्र हि केवलो लोभसंज्वलनकषायोदयः सोप्यतिसूक्ष्मः ततो वीतरागछद्मस्थकल्प
त्वाच्चतुर्दशेति नियमस्तत्रापि युज्यते ननु मोहोदय=१

क्ष्मसांपरायेतु मोहोदयसहायाभावात् मंदोदयत्वाच्च क्षुदादिवेदनाभावात् तत्सहनकृतपरीषहव्य
पदेशो न युक्तिमवतरति तन्न किं कारणं शक्तिमात्रस्य विवक्षितत्वात् सर्वार्थसिद्धिदेवस्य सप्तमपृथि
वीगमनसामर्थ्यव्यपदेशवत् आह यदि शरीरवत्यात्मनि परीषहसन्निधानं प्रतिज्ञायते अथ भगवति
उत्पन्नकेवलज्ञाने कर्मचतुष्टयफलानुभवनवशवर्तिनि कियंत उपनिपतंतीत्यत्रोच्यते तस्मिन्पुनः
एकादश जिने ११ श्री निरस्तघातिकर्मचतुष्टये जिने वेदनीयसद्भावात् तदाश्रया एकादशपरीषहाः
संति ननु च मोहनीयोदयसहायाभावात् क्षुदादिवेदनाभावे परीषहव्यपदेशो न युक्तः सत्यमेव
मेतत् वेदनाभावेपि द्रव्यकर्मसद्भावापेक्षया परीषहोपचारः क्रियते निरवशेषनिरस्तज्ञानावरणे युग
पत्सकलपदार्थतत्त्वावभासिनि केवलज्ञाने चिंतानिरोधाभावेपि तत्फलकर्मनिर्हरणफलापे
क्षया ध्यानोपचारवत् अथवा एकादश जिने न संतीति वाक्यशेषः कल्पनीयः सोपस्कारत्वात् सूत्राणां क

ना।

चवक्तव्यं ऽधीनं हीत्यनुपगमात् मोहोदयसहायकत्वं कृदादिवेदनाभावात् =१

१६७ ल्पो हि वाक्यशेषः वाक्यं [redacted]ः आह यदि सूक्ष्मसांपरायादिषु व्यस्ताः परीषहाः अथ समस्ताः क्वेति श्री
बादरसांपराये सर्वे श्री सांपरायः कषायः बादरः संपरायो यस्य स बादरसांपराय इति नेदं गुणस्थानवि
शेषग्रहणं किं तर्हि अर्थनिर्देशः तेन प्रमत्तादीनां संयतानां ग्रहणं तेषु हि अक्षीणाशयत्वात् सर्वे संभवं
ति कस्मिन् पुनः चारित्रे सर्वेषां संभवः सामायिकछेदोपस्थापनपरिहारशुद्धिसंयमेषु प्रत्येकं सर्वेषां
संभवः आह गृहीतमेतत्परीषहाणां स्थानविशेषावधारणं इदं तु न विद्मः कस्याः प्रकृतेः कः कार्य इ
त्यत्रोच्यते श्री ज्ञानावरणे प्रज्ञाज्ञाने श्री इदमयुक्तं वर्तते किमत्रायुक्तं ज्ञानावरणे सत्यज्ञानपरीष
हः उपपद्यते प्रज्ञापरीषहः पुनस्तदपाये भवतीति कथं ज्ञानावरणस्यादित्यत्रोच्यते क्षायोपशमिकी
प्रज्ञा अन्यस्मिन् ज्ञानावरणे सति मदं जनयति न सकलावरणक्षये इति ज्ञानावरणे सतीत्युपपद्यते पु
नरपरयोः परीषहयोः प्रकृतिविशेषनिर्देशार्थमाह श्री दर्शनमोहांतराययोरदर्शनालाभौ श्री १६७

यथासंख्यमभिसंबंधः दर्शनमोहे अदर्शनपरीषहः लाभांतराये अलाभपरीषह इति आह यद्याद्ये
मोहनीयभेदे एकपरीषहः अथ द्वितीयस्मिन् कति भवंतीति अत्रोच्यते श्री चारित्रमोहे नाग्न्यारतिस्त्रीनि
षद्याक्रोशयाचनासत्कारपुरस्काराः श्री पुंवेदोदयादिनिमित्तत्वात् नाग्न्यादिपरीषहाणां मोहोदयनिमि
त्तत्वं प्रतिपद्यामहे निषद्यापरीषहस्य कथं तत्रापि प्राणिपीडापरिहारार्थत्वात् मोहोदये सति प्राणिपीडापरि
णामः संजायत इति अवशिष्टपरीषहप्रकृतिविशेषप्रतिपादनार्थमाह श्री वेदनीये शेषाः श्री उक्ता ए
कादश परीषहाः तेभ्योऽन्ये शेषाः वेदनीये सति भवंतीति वाक्यशेषः के पुनस्ते क्षु[redacted]पासाशीतोष्णदंशम त्पि=४
शकचर्याशय्यावधरोगतृणस्पर्शमलपरीषहाः आह व्याख्यातनिमित्तलक्षणविकल्पाः प्रत्यात्मनि प्रादु
र्भवंतः कति युगपदवतिष्ठंत इत्यत्रोच्यते श्री एकादयो भाज्या युगपदेकस्मिन्नैकान्नविंशतिः श्री कश्चिद्यु
गपद्भवंती स्वगम्यते तत्कथमिति चेदुच्यते शीतोष्णपरीषहयोरेकः शय्यानिषद्याचर्याणां चान्यतम एव

=रेआङ् अभिविध्यर्थः तेन एकान्नविंशति =२

१६८ भवति एकस्मिन्नात्मनि कुतः विरोधात् ततः त्रयाणामपगमे युगपदेकात्मनि इतरेषां संभवादेकान्नविंशा-
तिविकल्पो वोढव्यः ननु प्रज्ञाज्ञानयोरपि विरोधाद्युगपदसंभवः श्रुतज्ञानापेक्षया प्रज्ञापरीषहः अव
धिज्ञानाद्यभावापेक्षया अज्ञानपरीषह इति नास्ति विरोधः आह उक्ताः गुप्तिसमितिधर्मानुप्रेक्षापरीषह-
जयाः संवरहेतवः पंच संवरहेतुश्चारित्रसंज्ञो वक्तव्य इति तद्भेददर्शनार्थमुच्यते श्री सामायिकछेदो
पस्थापनापरिहारविशुद्धिसूक्ष्मसंपराययथाख्यातमिति चारित्रं श्री अत्र चोद्यते दशविधधर्मे संयम
उक्तः स एव चारित्रमिति पुनर्ग्रहणमनर्थकमिति नानर्थकं धर्मेन्तर्भूतमपि चारित्रमंते गृह्यते मोक्षप्रा
प्तेः साक्षात्कारणमिति ज्ञापनार्थं सामायिकमुक्तं क्व दिग्देशानर्थदंडविरति सामायिकं इत्यत्र तत् द्विविधं
नियतकालमनियतकालं च स्वाध्यायादि नियतकालं ईर्यापथाद्यनियतकालं च प्रमादकृतानर्थप्रबंधवि
लोपे सम्यक्प्रतिक्रिया छेदोपस्थापना विकल्पनिवृत्तिर्वा परिहरणं परिहारः प्राणिवधान्निवृत्तिः तेन विशि १६८

=उपशांतस्यानंतर्यार्थं हन्निलान्निरवशेषमोहस्योपशमो नंतरमाविर्भवतीत्यर्थः यथा=२

ष्टा शुद्धिर्यस्मिंस्तत्परिहारविशुद्धिचारित्रं अतिसूक्ष्मकषायत्वात्सूक्ष्मसंपरायंचारित्रं मोहनीयस्य निरवशे
षस्योपशमात्क्षयाच्च आत्मस्वभावावस्थापेक्षालक्षणं यथाख्यातचारित्रमित्याख्यायते पूर्वचारित्रानु
थि ष्ठायिभिराख्यातं न तत्प्राप्तं प्राङ्मोहक्षयोपशमाभ्यामित्यथाख्यातं अथयथाख्यातमितिवा यथात्मस्वभावो व
स्थितः तथैवाख्यातत्वात् इतिशब्दः परिसमाप्तौ द्रष्टव्यः ततो यथाख्यातचारित्रात्सकलकर्मक्षयपरि
समाप्तिर्भवतीति ज्ञाप्यते सामायिकादीनामानुपूर्व्यवचनमुत्तरोत्तरगुणप्रकर्ष ख्यापनार्थं क्रियते
आह उक्तं चारित्रं तदनंतरमुद्दिष्टं यत्तपसा निर्जरा चेति तस्येदानीं तपसो विधानं कर्तव्यमित्यत्रोच्यते तत
द्विविधं बाह्यमभ्यंतरं च तत्प्रत्येकं षड्विधं तत्र बाह्यभेदप्रतिपत्त्यर्थमाह श्री अनशनावमौदर्यवृत्तिप
रिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशा बाह्यं तपः श्री दृष्टफलानपेक्षं संयमप्रसिद्धि
रागोच्छेदकर्मविनाशध्यानागमावाप्त्यर्थमनशनं संयमप्रजागरदोषप्रशमसंतोषस्वाध्यायादिसु

१६५ स्वसिद्ध्यर्थमवमोदर्यं निद्राथिनो मुनेः एका[redacted]गारादिविषयसंकल्पचिंतावरोधो वृत्तिपरिसंख्यानमा
शानिवृत्त्यर्थमवगंतव्यं इंद्रियदर्प्पनिग्रहनिद्राविजयस्वाध्यायसुखसिद्ध्याद्यर्थो घृतादिवृष्यरसपरि
त्यागः चतुर्थं तपः सून्यागारादिषु विविक्तेषु जंतुपीडाविरहितेषु संयतस्य शय्याशनं आबाधात्ययब्रह्म
चर्यस्वाध्यायध्यानादिप्रसिद्ध्यर्थं कर्त्तव्यमिति पंचमं तपः आतपस्थानं वृक्षमूलनिवासनिरावरणशा
यनं बहुविधप्रतिमास्थानमित्येवमादिकायक्लेशः तत् षष्ठं तपः तत्किमर्थं देहदुःखतितिक्षासुखान
भिष्वंगप्रवचनप्रभावनाद्यर्थं परीषहस्यास्य च को विशेषः यदृच्छयोपनिपतितः परीषहः स्वयंकृतः का
बाह्यत्वमस्य उतः यक्लेशः बाह्यद्रव्यापेक्षत्वात् परप्रत्यक्षत्वाच्च बाह्यत्वं अभ्यंतरतपोभेदप्रदर्शनार्थमाह श्री प्रायश्चित्त
विनयवैयावृत्यस्वाध्यायव्युत्सर्गध्यानान्युत्तरं श्री कथमस्याभ्यंतरत्वं मनोनियमनार्थत्वात् प्रमाद
दोषपरिहारः प्रायश्चित्तं पूज्येष्वादरो विनयः कायचेष्टयाद्रव्यांतरेण चोपासनं वैयावृत्यं ज्ञानभावनाल १६५

स्य त्यागः स्वाध्यायः आत्मात्मीयसंकल्पत्यागो व्युत्सर्गः चित्तविक्षेपत्यागो ध्यानं तद्भेदप्रतिपादनार्थमाह
श्री नवचतुर्दशपंचद्विभेदा यथाक्रमं प्राग्ध्यानात् श्री यथाक्रममिति वचनात् नवभेदं प्रायश्चित्तं विन
यश्चतुर्विधः वैयावृत्यं दशविधं स्वाध्यायः पंचविधः द्विभेदो व्युत्सर्ग इत्यभिसंबध्यते प्राग्ध्यानादिति
वचनं ध्यानस्य बहुवक्तव्यत्वात् पश्चाद्वक्ष्यत इति आद्यस्य भेदस्वरूपनिर्ज्ञानार्थमाह श्री आलोचन
प्रतिक्रमणतदुभयविवेकव्युत्सर्गतपश्छेदपरिहारोपस्थापनाः श्री तत्र गुरवे प्रमादनिवेदनं दशदोष
विवर्जितमालोचनं मिथ्या दुःकृताभिधानादभिव्यक्तप्रतिक्रियं प्रतिक्रमणं संसर्गे सति विशोधनात्तदु
भयं संसक्तान्नपानोपकरणादिविभजनं विवेकः कायोत्सर्गादिकरणं व्युत्सर्गः अनशनावमोदर्या
दिलक्षणं तपः दिवसपक्षमासादिना प्रव्रज्याहापनं छेदः पक्षमासादिविभागेन दूरतः परिवर्जनीयं प
रिहारः पुनर्दीक्षाप्रापणमुपस्थापना विनयविकल्पप्रतिपत्त्यर्थमाह श्री ज्ञानदर्शनचारित्रोपचाराः २३

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

१७० विनयइत्यधिकारेणाभिसंबंधः क्रियते ज्ञानविनयः दर्शनविनयः चारित्रविनयः उपचारविनयश्चेति
सबहुमानंमोक्षार्थंज्ञानग्रहणाभ्यासस्मरण[redacted]दिर्ज्ञानविनयः शंकादिदोषविरहितंतत्त्वा
र्थश्रद्धानंदर्शनविनयः तद्वतश्चारित्रसमाहितचित्तता चारित्रविनयः प्रत्यक्षेष्वाचार्यादिष्वभ्युत्थाना
भिगमनांजलिकरणादिरुपचारविनयः परोक्षेष्वपिकायवाङ्मनोभिरंजलिक्रियागुणसंकी[illegible]नानुस्म
रणादिः वैयावृत्त्यभेदप्रतिपादनार्थमाह श्री आचार्योपाध्यायतपस्विशैक्षग्लानगणकुलसंघसाधु
मनोज्ञानां श्री आचार्यवैयावृत्त्यमुपाध्यायवैयावृत्त्यमित्यादि तत्र आचरंति यस्माद्व्रतानीत्याचार्यः मो
क्षायशास्त्रमुपेत्यतस्मादधीयत इत्युपाध्यायः महोपवासाद्यनुष्ठायीतपस्वी शिक्षाशीलः शैक्षः रुजा
दिक्लिष्टशरीरोग्लानः गणः स्थविरसंततिः दीक्षकाचार्यशिष्यसंस्त्यायः कुलं चातुर्वर्णश्रमणनिव
हः संघः चिरप्रव्रजितः साधुः मनोज्ञोलोकसंमतः ते[redacted]ःषांव्याधिपरीषहमिथ्यात्वाद्युपनिपातेका १७०

=धवैयावृत्त्यंदशधाभिद्यतेकुतोविषयभेदात्=ध

यचेष्टयाद्रव्यांतरेणवातत्प्रतीकारोवैयावृत्त्यं समाध्याधानविचिकित्साभावप्रव[redacted]चनवात्सल्याद्यभिव्यक्त्य
र्थंस्वाध्यायविकल्पविज्ञानार्थमाह श्री वाचनापृच्छनानुप्रेक्षाम्नायधर्मोपदेशाः श्री निरवद्यग्रंथा
र्थोभयप्रदानंवाचना संशयच्छेदायनिश्चितबलाधानायवापरानुयोगः पृच्छना अधिगतार्थस्यमनसा
भ्यासोनुप्रेक्षा घोषशुद्धंपरिवर्त्तनमाम्नायः धर्मकथाद्यनुष्ठानंधर्मोपदेशः सएषपंचविधः स्वाध्यायः
किमर्थः प्रज्ञातिशयः प्रशस्ताध्यवसायः परमसंवेगस्तपोवृद्धिरतिचारविशुद्धिरित्येवमाद्यर्थः व्युत्स
र्गभेदनिर्ज्ञानार्थमाह श्री बाह्याभ्यंतरोपध्योः श्री व्युत्सर्जनंव्युत्सर्गस्त्यागः सद्विविधः बाह्योपधि
त्यागः अभ्यंतरोपधित्यागश्चेति अनुपात्तंवास्तुधनधान्यादिबाह्योपधिः क्रोधादिरात्मभावोभ्यंतरोपधिः
कायत्यागश्चनियतकालोयावज्जीवंवा[redacted]भ्यंतरोपधित्यागः इत्युच्यते सकिमर्थः निःसंगत्वनिर्भयत्वजी
विताशाव्युदासाद्यर्थः यदुक्तंवक्ष्यंध्यानमितिपृथगवस्थापितंतस्येदानींनिर्देशविधानंप्राप्तकालंतदु

म=१

मं=२

११९ लंघ्यतस्य प्रयोक्तृस्वरूपकालनिर्धारणार्थमुच्यते श्री उत्तमसंहननस्यैकाग्रचिंतानिरोधो ध्यानमांतर्मुहूर्त्ता
त् श्री आद्यं त्रितयसंहननमुत्तमं वज्रवृषभनाराचसंहननं वज्रनाराचसंहननं नाराचसंहननमिति
तत्त्रितयमपि ध्यानस्य साधनं भवति मोक्षस्य तु आद्यमेव तदुत्तमसंहननं यस्य सोयमुत्तमसंहननः तस्योत्त
ह त्तमसंहननस्येत्यनेन प्रयोक्तृनिर्द्देशः कृतः अग्रं मुखं एकमग्रमस्य एकाग्रः नानार्थावलंबनेन चिंताप
रिस्पंदवती तस्या अन्याशेषमुखेभ्यो व्यावर्त्य एकस्मिन्नग्रे नियमः एकाग्रचिंतानिरोध इत्युच्यते अने
न ध्यानस्वरूपमुक्तं भवति मुहूर्त्त इति कालपरिमाणं अंतर्गतो मुहूर्त्तः आंतर्मुहूर्त्तमित्यनेन काला
वधिः कृतः ततः परं दुर्द्ध्यानात् एकाग्रचिंतायाः चिंताया निरोधो यदि ध्यानं निरोधश्चाभावः तेन ध्यानमस
त् खरविषाणवत्स्यात् नैष दोषः अन्यचिंतानिवृत्त्यपेक्षयाऽसदिति चोच्यते स्वविषयाकारप्रवृत्तेः
सदिति च अभावस्य भावांतरत्वाद्धेत्वंगत्वादिभिरभावस्य वस्तुधर्म्मत्वसिद्धेश्च अथवा नायं भावसाधनः ११९

स

निरोधनं=२ निरोधनमिति किं तर्हि कर्म्मसाधनं निरुध्यत इति निरोधः चिंता चासौ निरोधश्च चिंतानिरोध इति एतदुक्तं भव
ति ज्ञानमेवापरिस्पंदमानं अपरिस्पंदाग्निशिखावदवभासमानं ध्यानमिति तद्भेदप्रदर्शनार्थमाह श्री
आर्त्तरौद्रधर्म्यशुक्लानि श्री ऋतं दुःखं अर्द्दनमर्त्तिर्वा तत्र भवमार्त्तं रुद्रः क्रूराशयः तस्य कर्म्म तत्र भवं बोध्या=३
वा रौद्रं धर्म्मो व्याख्यातः धर्म्मादनपेतं धर्म्यं शुचिगुणयोगाच्छुक्लं तदेतच्चतुर्विधं ध्यानं द्वैविध्यमश्नुते कु
तः प्रशस्ताप्रशस्तभेदात् अप्रशस्तमपुण्यास्रवकारणत्वात् कर्म्मनिर्द्दहनसामर्थ्यात् प्रशस्तं पुनस्त किं=५
द्विविधमुच्यते श्री परे मोक्षहेतू श्री परमुत्तरमंत्यं तत्सामीप्यात् धर्म्यमपि परमित्युपचर्यते द्विवच
ननिर्द्देशसामर्थ्यात् गौणमपि गृह्यते परे धर्म्यशुक्ले मोक्षहेतू इति वचनात् पूर्वे आर्त्तरौद्रे संसारहेतू इ
त्युक्तं भवति कुतः तृतीयस्य साध्यस्याभावात् तत्रार्त्तं चतुर्विधं तत्राद्य विकल्पलक्षणनिर्द्देशार्थमाह श्री द्य=२
आर्त्तममनोज्ञस्य संप्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः श्री अमनोज्ञमप्रियं विषकंटकशत्रुशस्त्रादि

त स

१७२ तद्बाधाकारणत्वात् अमनोज्ञमित्युच्यते अस्य संप्रयोगे कथं नाम मे न स्यादिति संकल्पः चिंताप्रबंधः स्मृति
समन्वाहारः प्रथममार्त्तमित्याख्यायते द्वितीयस्य विकल्पस्य लक्षणनिर्देशार्थमाह श्री विपरीतं मनोज्ञस्य ३१
श्री कुतो विपरीतं पूर्वोक्तात् तेनेतदुक्तं भवति मनोज्ञस्येष्टस्य पुत्रदारधनादेः विप्रयोगे संप्रतिपादनार्थ
माह श्री वेदनायाश्च वेदनाशब्दः सुखे दुःखे च वर्त्तमानेपि आर्त्तस्य प्रकृतत्वात् दुःखवेदनायां प्रवृत्ते त
स्या वातादिविकारजनितवेदनायाः उपनिपाते तस्याः अपायः कथं नाम मे स्यादिति विकल्पः चिंताप्र
बंधः तृतीयमार्त्तमुच्यते तुरीयस्यार्त्तस्य लक्षणनिर्देशार्थमाह श्री निदानं च ३३ भोगाकांक्षातुरस्यानाग
तविषयप्राप्तिं प्रति मनःप्रणिधानं संकल्पश्चिंताप्रबंधः तुरीयमार्त्तं निदानमित्युच्यते तदेतच्चतुर्विधमार्त्तं
किंस्वामिकमिति चेदुच्यते श्री तदविरतदेशविरतप्रमत्तसंयतानां ३४ श्री अविरताः असंयतसम्यग्दृष्ट्यं
ताः देशविरताः संयतासंयताः प्रमत्तसंयताः पंचदशप्रमादोपेताः क्रियानुष्ठायिनः तत्र अविरतदेशवि १७२

३ विरत

रतानां चतुर्विधमप्यार्त्तं भवति असंयमपरिणामोपेतत्वात् प्रमत्तसंयतानां तु निदानवर्ज्जमन्यदार्त्तत्रयं प्र
मादोद्रेकात् कदाचित्स्यात् व्याख्यातमार्त्तं संज्ञादिभिः द्वितीयस्य संज्ञाहेतुस्वामि [redacted] निर्धारणार्थमाह
श्री हिंसानृतस्तेयविषयसंरक्षणेभ्यो रौद्रमविरतदेशविरतयोः ३५ श्री हिंसादीन्युक्तलक्षणानि तानि रौद्रध्यानो
त्पत्तेः निमित्तीभवंतीति हेतुनिर्देशो विज्ञायते तेन हेतुनिर्देशेनानुवर्त्तमानः [redacted] स्मृतिसमन्वाहारोभि
संबध्यते हिंसायाः स्मृतिसमन्वाहार इत्यादि तद्रौद्रं ध्यानमविरतदेशविरतयोर्वेदितव्यं अविरतस्य भवतु
रौद्रध्यानं देशविरतस्य कथं तस्यापि हिंसाद्यावेशात् वित्तादिसंरक्षणतंत्रत्वाच्च कदाचिद्भवितुमर्हति तत्पुन
र्नारकादीनामकारणं सम्यग्दर्शनसामर्थ्यात् संयतस्य तु न भवत्येव तदारंभे संयमप्रच्युतेः आह परे मो
क्षहेतू उपादिष्टे तत्राद्यस्य मोक्षहेतोः ध्यानस्य भेदस्वरूपस्वामिनिर्देशः कर्त्तव्य इत्यत आह श्री आज्ञापायवि
पाकसंस्थानविचयाय धर्म्यं ३६ विचयनं विचयः विवेको विचारणेत्यर्थः आज्ञापायविपाकसंस्थानानां विचयः आ

१७३ ज्ञापायविपाकसंस्थानविचयः स्मृतिसमन्वाहारः इत्यनुवर्त्तते सत्रस्यैकं संबध्यते आज्ञाविचयाय स्मृतिसम
न्वाहार इत्यादि तद्यथा उपदेष्टुरभावात् मंदबुद्धि त्वात् कर्म्मोदयात् सूक्ष्मत्वाच्च पदार्थानां हेतुदृष्टांतो
परमे सर्वज्ञप्रणीतमागमं प्रमाणीकृत्य इत्थमेवेदं नान्यथा वादिनो जिना इति गहनपदार्थश्रद्धानात् अर्थाव
धारणमाज्ञाविचयः अथवा स्वयं विदितपदार्थतत्वस्य सतः परं प्रतिपिपादयिषोः स्वसिद्धांताविरोधेन तत्वस
मर्थनार्थः तर्कनयप्रमाणयोजनपरः स्मृतिसमन्वाहारः सर्वज्ञाज्ञाप्रकाशनार्थत्वात् आज्ञाविचय इत्युच्य
ते जात्यंधवत् मिथ्यादृष्टयः सर्वज्ञप्रणीतमार्गाद्विमुखा मार्गापरिज्ञानात् सुदूरमेवापयंतीति सन्मार्गापाय
चिंतनमपायविचयः अथवा मिथ्यादर्शनज्ञानचारित्रेभ्यः कथं नाम इमे प्राणिनो पेयुरिति स्मृतिसमन्वा
हारोपायविचयः कर्म्मणां ज्ञानावरणादीनां द्रव्यक्षेत्रकालभवभावप्रत्ययफलानुभवनं प्रतिप्रणिधानं
विपाकविचयः लोकसंस्थानस्वभावविचयाय स्मृतिसमन्वाहारः संस्थानविचयः उत्तमक्षमादिलक्षणो ध १७३

× सर्वेध   धर्मोक्षार्थिनः सम्यग्मा ×

र्म्म उक्तः तस्मादनुपेतं धर्म्यं ध्यानं चतुर्विकल्पमवसेयं तदविरतदेशविरतप्रमत्ताप्रमत्तसंयतानां भवति त
त्रयाणां ध्यानानां निरूपणं कृतं इदानीं शुक्लध्यानं निरूपयितव्यं तद्वक्ष्यमाणं चतुर्विधविकल्पं तत्राद्ययोः
स्वामिनिर्देशार्थमिदमुच्यते श्री शुक्ले चाद्ये पूर्वविदः श्री वक्ष्यमाणेषु शुक्लध्यानविकल्पेषु आद्ये शु
क्लध्याने पूर्वविदो भवतः श्रुतकेवलिन इत्यर्थः चशब्देन धर्म्यमपि समुच्चीयते तत्र व्याख्यानतो विशेष
प्रतिपत्तिरिति श्रेण्यारोहणात् प्राग् धर्म्यं श्रेण्योः शुक्ले इति व्याख्यायते अवशिष्टे कस्य भवतः इत्यत्रोच्यते
श्री परे केवलिनः श्री प्रक्षीणसकलज्ञानावरणस्य केवलिनः सयोगस्य अयोगस्य च परे उत्तरे शुक्लध्या
ने भवतः यथासंख्यं तद्विकल्पप्रतिपादनार्थमिदमुच्यते श्री पृथक्त्वैकत्ववितर्कसूक्ष्मक्रियाप्रतिपाति
व्युपरतक्रियानिवर्त्तीनि पृथक्त्ववितर्कं सूक्ष्मक्रियाप्रतिपातिव्युपरतक्रियानिवर्त्तिरिति चतुर्विधं शुक्ल
ध्यानं वक्ष्यमाणलक्षणमपेक्ष्य सर्वेषामन्वर्थमवसेयं तस्यालंबनविशेषनिर्द्धारणार्थमाह श्री त्र्येकयोगका

एकत्ववितर्कं=२

१७४ पयोगा योगानां योगशास्त्रे व्याख्यातार्थाः कायवाग्मनःकर्म्मयोग इत्यत्र उक्तैश्चतुर्भिः शुक्लध्यानविकल्पैस्त्रियो
गादीनां चतुर्णां यथासंख्येनाभिसंबंधो वेदितव्यः त्रियोगस्य पृथक्त्ववितर्कं त्रिषु योगेष्वेकयोगस्यैकत्ववि
तर्क्कं काययोगस्य सूक्ष्मक्रियाप्रतिपाति अयोगस्य व्युपरतक्रियानिवृत्तीति तत्राद्ययोर्विशेषप्रतिपत्त्यर्थ
मिदमुच्यते ॥ एकाश्रये सवितर्कवीचारे पूर्वे ॥ एकः आश्रयो ययोस्ते एकाश्रये उभयेप्यपि परिप्रा
प्तश्रुतज्ञाननिष्ठेनारभ्येते इत्यर्थः वितर्कश्च वीचारश्च वितर्कवीचारौ सह वितर्कवीचाराभ्यां वर्त्तेते इ
ति सवितर्कवीचारे पूर्वे पृथक्त्वैकत्ववितर्के इत्यर्थः तत्र यथासंख्यप्रयोगे निष्टे निवृत्त्यर्थमिदमुच्यते ॥
अवीचारं द्वितीयं ॥ पूर्वयोर्यत् द्वितीयं तदवीचारं प्रत्येतव्यं एतदुक्तं भवति आद्यं सवितर्कं सवीचारं
भवति द्वितीयं सवितर्कमवीचारं चेति अथ वितर्कवीचारयोः कः प्रतिविशेष इत्यत्रोच्यते ॥ वितर्कः
=१ श्रुतं विशेषेण तर्कणं ऊहनं वितर्कः श्रुतज्ञानमित्यर्थः अथ को वीचारः ॥ वीचारोर्थव्यंजनयोगसंक्रां १७४

६३

एं=१

लि=१

=उयोगांत्पस्का=

ति ॥ अर्थो ध्येयः द्रव्यं पर्यायो वा व्यंजनं वचनं योगः कायवाग्मनः कर्म्मलक्षणः संक्रांतिः परिवर्त्तनं द
व्यं विहाय पर्यायमुपैति पर्यायं त्यक्त्वा द्रव्यमित्यर्थसंक्रांतिः एवं श्रुतवचनमुपादाय वचनांतरमालंबते
तदपि विहायान्यदिति व्यंजनसंक्रांतिः काययोगात्तरं गृह्णाति योगांतरं त्यक्त्वा काययोगमिति योगसंक्रां
तिः एवं परिवर्त्तनं वीचार इत्युच्यते संक्रांतौ सत्यां कथं ध्यानमिति चेत् ध्यानसंतानमपि ध्यानमुच्यते इत्यनदो
षः तदेतत्सामान्यविशेषनिर्द्दिष्टं चतुर्विधं धर्म्यं शुक्लं च पूर्वोदितगुप्त्यादिबहुप्रकारोपायं संसारनिवृत्त
ये मुनिर्ध्यातुमर्हति कृतपरिकर्म्मा तत्र द्रव्यपरमाणुं भावपरमाणुं वा ध्यायन्नाहितवितर्कसामर्थ्यः अर्थ
व्यंजने कायवचसी च पृथक्त्वेन संक्रामता मनसा अपर्याप्तबालोत्साहवदव्यवस्थितेनानिशितेनापि शस्त्रेण
चिरात्तरुं छिंदन्निव मोहप्रकृतीरुपशमयन् क्षपयंश्च पृथक्त्ववितर्कविचारध्यानभाग्भवति स एव पुनः
समूलतूलं मोहनीयं निर्द्दिधक्षन्ननंतगुणविशुद्धियोगविशेषमाश्रित्य बहुतराणां ज्ञानावरणसहायीभूतानां

र्क

DR. BHAU DAJI MEMORIAL

१७५ प्रकृतीनांबंधंनिरुंधनस्थिति ह्रासक्षयौ च कुर्वन् श्रुतज्ञानोपयोगो निवृत्तार्थव्यंजनयोगसंक्रांतिः अ
विचलितमनाः क्षीणकषायो वैडूर्यमणिरिव निरुपलेपो ध्यात्वा पुनर्न्न निवर्त्तत इत्युक्तं एकत्ववितर्कं ए
वमेकत्ववितर्कशुक्लध्यानवैश्वानरनिर्दग्धघातिकर्म्मेंधनः प्रज्वलितकेवलज्ञानगभस्तिमंडलो मेघ
पंजरनिरोधनिर्गत इव घर्मरश्मिर्बभासमानो भगवांस्तीर्थकर इतरो वा केवली लोकेश्वराणामभि
गमनीयोर्चनीयश्चोत्कर्षेणायुषः पूर्वकोटीं देशोनां विहरति स यदांतर्मुहूर्त्तशेषायु[redacted]स्तुल्यस्थि का-५
तिवेद्यनामगोत्रश्च भवति तदा सर्व्ववाङ्मनसयोगं बादरकाययोगं च परिहाप्य सूक्ष्मकाययोगालंब
नः सूक्ष्मक्रियाप्रतिपातिध्यानमास्कंदितुमर्हतीति यदा पुनरंतर्मुहूर्त्तशेषायुष्कस्ततोऽधिकस्थि
तिशेषकर्म्मत्रयो भवति योगी तदात्मोपयोगातिशयस्य सामायिकसहायस्य विशिष्टकरणस्य म
हासंवरस्य लघुकर्म्मपरिपाचनस्य शेषकर्म्मरेणुपरिशातनशक्तिस्वाभाव्याद्दंडकपाटप्रतरलोक १७५

वि

पूरणानि स्वात्मप्रदेशविसर्प्पणतश्चतुर्भिः समयैः कृत्वा समुपहृतप्रदेशविसरणः समीकृतस्थितिशेष
कर्म्मचतुष्टयः पूर्व्वशरीरप्रमाणो भूत्वा सूक्ष्मकाययोगेन सूक्ष्मक्रियाप्रतिपातिध्यानं ध्यायति ततस्तदनंत
रं समुच्छिन्नक्रियानिवर्त्तिध्यानमारभते समुच्छिन्नप्राणापानप्रचारसर्व्वकायवाङ्मनोयोगसर्व्वप्रदेशप
रिस्पंदक्रियाव्यापारत्वात् समुच्छिन्नक्रियानिवर्त्तीत्युच्यते तस्मिन्समुच्छिन्नक्रियानिवर्त्तिनि ध्याने सर्व्व
बंधाश्रवनिरोध[redacted]सेषकर्म्मसातनसामर्थ्योपपत्तेरयोगिनः केवलिनः संपूर्णयथाख्यातचारि
त्रज्ञानदर्शनं सर्व्वसंसारदुःखजालपरिष्वंगोच्छेदजननं साक्षान्मोक्षकारणमुपजायते स पुनरयोग
केवली भगवांस्तदा ध्यानातिशयाग्निनिर्दग्धसर्व्वमलकलंकबंधनो निरस्तकिट्टधातुपाषाणजात्यक
नकवद्व्यक्तात्मा परिनिर्वाति तदेतद्द्विविधं तपः अभिनवकर्माश्रवनिरोधहेतुत्वात्संवरकारणं प्राक्त
नकर्म्मरजोविधूननिमित्तत्वात् निर्ज्जराहेतुरपि भवति अत्राह सम्यग्दृष्टयः सर्व्वे किं समनिर्ज्जराः

आहोस्वित्कश्चिदस्ति प्रतिविशेष इत्यत्रोच्यते ॥ सम्यग्दृष्टिश्रावकविरतानंतवियोजकदर्शनमोहक्षप- कोपशामकोप-२
शांतमोहक्षपकक्षीणमोहजिनाः क्रमशोऽसंख्येयगुणनिर्जराः ~~दर्शनमोहक्षपकोपशामकोपशांत~~
~~मोहक्षपकक्षीणमोहजिनाः क्रमशोऽसंख्येयगुणनिर्जराः~~ त एते दश सम्यग्दृष्ट्यादयः क्रमशोऽसंख्येय
गुणनिर्जराः तद्यथा भव्यः पंचेंद्रियः संज्ञीपर्याप्तः पूर्वोक्तकाललब्ध्यादिसहायः परिणामविशुद्ध्या
वर्द्धमानः क्रमेणापूर्वकरणादिसोपानपंक्त्या प्लवमानो बहुतरकर्मनिर्जरो भवति स पुनः प्रथम
सम्यक्त्वप्राप्तिनिमित्तसन्निधाने सति सम्यग्दृष्टिर्भवन्नसंख्येयगुणनिर्जरो भवति स एव पुनश्चारित्रमो
हकर्मविकल्पाप्रत्याख्यानावरणक्षयोपशमनिमित्तपरिणामप्राप्तिकाले विशुद्धिप्रकर्षयोगात् श्रा
वको भवन् ततोऽसंख्येयगुणनिर्जरो भवति स एव पुनः प्रत्याख्यानावरणक्षयोपशमकारणपरिणामवि
शुद्धियोगात् विरतव्यपदेशभाक् सन् ततोऽसंख्येयगुणनिर्जरो भवति स एव पुनः अनंतानुबंधिक्रोधमा १७६

=प्रकृतित्रयतृणनिचयं निर्दिधक्षन्परिणामविशुद्ध्यातिशययोगाद्दर्शनमोह=२

नमायालोभवियोजनपरो भवति यदा तदा परिणामविशुद्धिप्रकर्षप्रयोगात्ततोऽसंख्येयगुणनिर्जरो भव
ति स एव पुनर्दर्शनमोहक्षपकव्यपदेशभाक् पूर्वोक्तादसंख्येयगुणनिर्जरो भवति एवं क्षायिकसम्यग्दृष्टि
र्भूत्वा श्रेण्यारोहणाभिमुखश्चारित्रमोहोपशामं प्रति व्याप्रियमाणो विशुद्धिप्रकर्षयोगात् उपशामकव्य
पदेशमनुभवन् पूर्वोक्तादसंख्येयगुणनिर्जरो भवति स एव पुनः अशेषचारित्रमोहोपशमनिमित्तस
न्निधाने प्राप्तोपशांतकषायव्यपदेशः पूर्वोक्तादसंख्येयगुणनिर्जरो भवति स एव पुनः चारित्रमो
हक्षपणं प्रत्यभिमुखः परिणामविशुद्ध्या वर्द्धमानः क्षपकव्यपदेशमनुभवन् पूर्वोक्तादसंख्येयगुणनिर
र्जरो भवति स यदा निःशेषचारित्रमोहक्षपणकारणपरिणामाभिमुखः क्षीणकषायव्यपदेशमास्कंदन्
पूर्वोक्तादसंख्येयगुणनिर्जरो भवति स एव द्वितीयशुक्लध्यानानलनिर्दग्धघातिकर्मनिचयः सन् जिन
व्यपदेशभाक् पूर्वोक्तादसंख्येयगुणनिर्जरो भवति आह सम्यग्दर्शनसन्निधानेऽपि यद्यसंख्येयगुणनिर्ज

१७७ स्यात् परस्परतो न साम्यमेषां हंत तर्हि श्रावकवदमी विरतादयो गुणभेदान्न निर्ग्रंथतामर्हंतीत्युच्यते नैतदे
वं कुतो यस्मात् गुणभेदादन्योन्यविशेषेपि नैगमादिनयव्यापारात् सर्वेपि हि भवंति श्री पुलाकवकुशकुशी
कुशीलनिर्ग्रंथस्नातका निर्ग्रंथाः श्री उत्तरगुणभावनापेतमनसः व्रतेष्वपि क्वचित्कदाचित्परिपूर्णता
मपरिप्राप्नुवंतः अविशुद्धपुलाकसादृश्यात् पुलाकाः इत्युच्यते नैर्ग्रंथ्यं प्रतिस्थिताः अखंडितव्रताः शरी
रोपकरणविभूषानुवर्तिनः अविविक्तपरिवारानुमोदछेदशबलयुक्ता वकुशाः सबलपर्यायवाची व
कुशशब्दः कुशीला द्विविधाः प्रतिसेवनाकुशीलाः कषायकुशीलाश्चेति अविविक्तपरिग्रहाः परिपू
र्णाभियाः कथंचिदुत्तरगुणविराधिनः प्रतिसेवनाकुशीलाः वशीकृतान्यकषायोदयाः संज्वलनमात्रतंत्राः का:३
कषायकुशीलाः उदकदंडराजिवदनभिव्यक्तोदयकर्माणः ऊर्ध्वं मुहूर्तादुद्भिद्यमानकेवलज्ञानद
र्शनभाजो निर्ग्रंथाः प्रहीणघातिकर्माणः केवलिनो द्विविधाः स्नातकाः त एते पंचापि निर्ग्रंथाः चारित्रप १७७

रिणामस्य प्रकर्षाप्रकर्षभेदे सत्यपि नैगमसंग्रहादिनयापेक्षया सर्वेपि ते निर्ग्रंथा इत्युच्यंते तेषां पुलाका
दीनां भूयोपि विशेषप्रतिपत्त्यर्थमाह श्री संयमश्रुतप्रतिसेवनातीर्थलिंगलेश्योपपातस्थानविकल्पतः
साध्याः श्री त एते पुलाकादयः संयमादिभिरष्टाभिरनुयोगैः साध्याः व्याख्येयाः तद्यथा पुलाकवकुशप्रति
सेवनाकुशीलां द्वयोः संयमयोः सामायिकछेदोपस्थापनयोर्वर्त्तंते कषायकुशीलाः द्वयोः [redacted]ःपरि
हारविशुद्धिसूक्ष्मसंपराययोः सर्वेयोश्च निर्ग्रंथस्नातका एकस्मिन्नेव यथाख्यातसंयमे संति श्रुतं पुलाक
वकुशप्रतिसेवनाकुशीलाः उत्कर्षेणाभिन्नाक्षरदशपूर्वधराः कषायकुशीलानिर्ग्रंथाश्चतुर्दशपूर्वध
राः जघन्येन पुलाकस्य श्रुतमाचारवस्तु वकुशकुशीलनिर्ग्रंथानां श्रुतमष्टौ प्रवचनमातरः स्नातकाः अ
पगतश्रुताः केवलिनः प्रतिसेवनाः पंचानां मूलगुणानां रात्रिभोजनवर्जनस्य च पराभियोगात् बलात् अ
न्यतमं प्रतिसेवमानः पुलाको भवति वकुशो द्विविधः उपकरणवकुशः शरीरवकुशश्चेति तत्रोपकरणवकुशः

प्रतिसेवना=१

१७८ वकुशविशेषयुक्तोपकरणाकांक्षी शरीरसंस्कारसेवी शरीरवकुशः कुशीलो मूलगुणानविराधयन्नुत्तरगुणे
षु कांचिद्विराधनां प्रतिसेवते कषायकुशीलनिर्ग्रंथस्नातकानां प्रतिसेवना नास्ति तीर्थमिति सर्वे सर्वेषां
तीर्थकराणां तीर्थेषु भवंति लिंगं द्विविधं द्रव्यलिंगं भावलिंगं चेति भावलिंगं प्रतीत्य पंच निर्ग्रंथा लिंगि
नो भवंति द्रव्यलिंगं प्रतीत्य भाज्याः लेश्याः पुलाकस्योत्तरास्तिस्रो वकुशप्रतिसेवनाकुशीलयोः षड
पि कषायकुशीलस्य चतस्र उत्तराः सूक्ष्मसंपरायस्य निर्ग्रंथस्नातकाश्च शुक्लैव केवला अयोगा अले यो=५
केषु=६ श्याः उपपादः पुलाकस्योत्कृष्ट उपपाद उत्कृष्टस्थितिदेवेषु (अष्टादशसागरोपम) सहस्रारे वकुशप्रतिसेवनाकुशीलयोर्द्वा
विंशतिसागरोपमस्थितिषु आरणाच्युतकल्पयोः कषायकुशीलनिर्ग्रंथयोस्त्रयस्त्रिंशत्सागरोपमस्थि
तिषु सर्वार्थसिद्धौ सर्वेषामपि जघन्यः सौधर्मकल्पे द्विसागरोपमस्थितिषु स्नातकस्य निर्वाणमिति स्थानं
असंख्येयानि संयमस्थानानि कषायनिमित्तानि भवंति तत्र सर्वजघन्यानि लब्धिस्थानानि पुलाककषा १७८

यकुशीलयोः तौ युगपदसंख्येयानि स्थानानि गच्छतः ततः पुलाको व्युच्छिद्यते कषायकुशीलस्ततोऽसंख्ये
यानि स्थानानि गच्छत्येकाकी ततः कषायकुशीलप्रतिसेवनाकुशीलवकुशा युगपदसंख्येयानि स्थाना
नि गच्छंति ततो वकुशो व्युच्छिद्यते ततोऽप्यसंख्येयानि स्थानानि गत्वा प्रतिसेवनाकुशीलो व्युच्छिद्यते ततो
ऽप्यसंख्येयानि स्थानानि गत्वा कषायकुशीलो व्युच्छिद्यते अत ऊर्ध्वमकषायस्थानानि निर्ग्रंथः प्रतिपद्यते
सोऽप्यसंख्येयानि स्थानानि गत्वा व्युच्छिद्यते अत ऊर्ध्वमेकं स्थानं गत्वा स्नातको निर्वाणं प्राप्नोति एषां सं
यमलब्धिरनंतगुणा भवति श्री इति तत्त्वार्थवृत्तौ सर्वार्थसिद्धिसंज्ञिकायां नवमोऽध्यायः समाप्तः ९
आह अंते निर्दिष्टस्य मोक्षस्येदानीं स्वरूपाभिधानं प्राप्तकालमिति सत्यमेवं मोक्षप्राप्तिः केवलज्ञानावा
प्तिपूर्विकेति केवलज्ञानोत्पत्तिकारणमुच्यते श्री मोहक्षयाज्ज्ञानदर्शनावरणांतरायक्षयाच्च केवलं इति
श्री इह वृत्तिकरणं न्याय्यं कुतः लघ्वर्थं कथं क्षयशब्दस्याकरणात् विभक्त्यंतरनिर्देशस्योपनावा च्चशब्दः

१७५

स्यवाप्रयोगात्तल्लघुसत्वं भवति मोहज्ञानदर्शनावरणांतरायक्षयाच्चकेवलमितिसत्यमेतत् क्षयक्रमप्रतिपा
दनार्थो वाक्यभेदेननिर्देशः क्रियते प्रागेवमोहं वाक्यभेदेननिर्देशः क्रियते प्रागेवमोहं क्षयमुपनीयअंत
वा मुहूर्त्तं क्षीणकषायव्यपदेशमवाप्यततोयुगपत्ज्ञानदर्शनांतरायाणां क्षयं कृत्वाकेवलमवाप्नोतीति तत्क्ष
यहेतुः केवलोत्पत्तेरिति हेतुलक्षणविभक्तिनिर्देशः कृतः कथं प्रागेवमोहः क्षयमुपनीयतेइतिचेदुच्यते भ
व्यः सम्यग्दृष्टिः परिणामविशुद्ध्यावर्द्धमानः असंयतसम्यग्दृष्टिसंयतासंयतप्रमत्ताप्रमत्तगुणस्थानेषु क
स्मिंश्चित्मोहस्यसप्तप्रकृतीः क्षयमुपनीयक्षायिकसम्यग्दृष्टिर्भूत्वाक्षपकश्रेणीरोहणाभिमुखः अधःप्र
वृत्तकरणंअप्रमत्तस्थाने प्रतिपद्यअपूर्वकरणप्रयोगेण अपूर्वकरणक्षपकगुणस्थानव्यपदेशमनुभू
यतत्रा   भिनवशुभाभिसंधितनूकृतपापप्रकृतिस्थित्यनुभागः विवर्द्धितशुभकर्मानुभावः अनिवृत्तिकरण १७५
प्राप्यअनिवृत्तिवादरसंपरायक्षपकगुणस्थानमधिरुह्यतत्रकषायाष्टकं नष्टं कृत्वानपुंसकवेदनासमीया

=१ क्रोधसंज्वलनं= =२ मानसंज्वलनं=१

द्यस्त्रीवेदमुन्मूल्यनोकषायषट्कंपुंवेदेप्रक्षिप्यक्षपयित्वा पुंवेदंक्रोधसंज्वलनेमानसंज्वलनेमायासंज्वल
=३ मायासंज्वलनं= नेच लोभसंज्वलनेक्रमेणवादरकृष्टिविभागेनविलियमुपनीयलोभसंज्वलनंतनूकृत्यसूक्ष्मसंपरायक्षप
कमनुभूयनिरवशेषंमोहनीयंनिर्मूलकाषंकषित्वाक्षीणकषायतामधिरुह्यअवतारितमोहनीयभारः
उपांत्यसमये निद्राप्रचलेप्रलयमुपनीयपंचानांज्ञानावरणानांचतुर्णांदर्शनावरणानांपंचानांचांतराया
णांअंते [redacted] समुपगम्यतदनंतरं [redacted] ज्ञानदर्शनस्वभावंकेवलपर्यायमप्रतर्क्यविभूतिविशेषमवाप्नोति
आहकस्माद्धेतोर्मोक्षः किंलक्षणश्चेतिअत्रोच्यते श्री वंधहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो
मोक्षः श्री मिथ्यादर्शनादिहेत्वभावादभिनवकर्माभावः पूर्वोदितनिर्जराहेतुसन्निधानेचार्जितकर्म
निरासः ताभ्यांवंधहेत्वभावनिर्जराभ्यामितिहेतुलक्षणविभक्तिनिर्देशः ततोभवस्थितिहेतुसमीकृतशेष
कर्मावस्थेयुगपदात्यंतिकः कृत्स्नकर्मविप्रमोक्षोमोक्षः प्रत्येतव्यः कर्माभावोद्विविधः यत्नसाध्यअयत्न

MEMORIAL

१८०

साध्यश्च तत्रवामदेहस्य नरकतिर्यग्देवायुषामभावो न यत्नसाध्यः असत्त्वात् यत्नसाध्य इतऊर्द्धमुच्यते अ
संयतसम्यग्दृष्ट्यादिषु चतुर्षु गुणस्थानेषु कस्मिंश्चित्स्थाने प्रकृतिक्षयः क्रियते निद्रानिद्राप्रचलाप्रचला
स्त्यानगृद्धिनरकतिर्यगात्यैकद्वि त्रिचतुरिंद्रियजातिनरकगतितिर्यग्गतिप्रायोग्यानुपूर्व्यातपोद्योत
स्थावरसूक्ष्मसाधारणसंज्ञिकानां षोडशानां कर्मप्रकृतीनां अनिवृत्तिबादरसंपरायस्थाने युगपत्क्षयः
क्रियते ततः परं तत्रैव कषायाष्टकं नष्टं क्रियते नपुंसकवेदः स्त्रीवेदश्च क्रमेण तत्रैव क्षयमुपयांति नो॰
षायषट्कं च सहैकेनैव प्रहारेण विनिपातयति ततः पुंवेदसंज्वलनक्रोधमानमायाः क्रमेण तत्रैका
स्पतिकं ध्वंसमास्कंदंति लोभसंज्वलनं सूक्ष्मसंपरायांते यात्यंतं निद्राप्रचले क्षीणकषाय वीतराग
छद्मस्थस्योपांत्यसमये प्रलयमुपव्रजतः पंचानां ज्ञानावरणानां चतुर्णां दर्शनावरणानां पंचानामंतरा
याणां च तस्यैवांत्यसमये प्रक्षयो भवति अन्यतरवेदनीयदेवगत्यौदारिकवैक्रियकाहारकशरीरांगोपां १८०

तैजसकार्म्मणशरीरबंधनपंचपंचसंघातसंस्थानषट्कौदारिकवैक्रियकाहारक=१

प्रशस्ताप्र=२

शु=२
गषट्संहननपंचप्रशस्तवर्णपंचाप्रशस्तवर्णगंधद्वयपंचप्रशस्तरसपंचाप्रशस्तरसस्पर्शाष्टकदेवगति
प्रायोग्यानुपूर्व्यागुरुलघूपघातोछ्वासप्रशस्तविहायोगत्यपर्याप्तकप्रत्येकशरीरस्थिरशुभाशुभदुर्भगसु स्थिरा=२
दुःस्वर=२ स्वरानादेयायशःकीर्त्तिनिर्माणनामनीचैर्गोत्राख्या द्वासप्ततिः प्रकृतयः अयोगकेवलिनः उपांत्यसम
ये विनाशमुपयांति अन्यतरवेदनीयमनुष्यायुर्मनुष्यगतिपंचेंद्रियजातिमनुष्यगतिप्रायोग्यानुपूर्व्या
त्रसबादरपर्याप्तकसुभगादेययशःकीर्त्तितीर्थकरनामोच्चैर्गोत्रसंज्ञिकानां त्रयोदशानां प्रकृतीनां अ
योगकेवलिनश्चरमसमये क्षयो भवति आह किमासां पौद्गलिकानामेव द्रव्यकर्मप्रकृतीनां नि
राशान्मोक्षोऽवसीयते उत भावकर्मणोऽपीत्युच्यते श्री औपशमिकादिभव्यत्वानां च श्री किं मोक्ष
इत्यनुवर्त्तते भव्यत्वग्रहणमन्यपारिणामिकनिवृत्त्यर्थं तेन पारिणामिकेषु भव्यत्वस्य औपशमिकादी
नां च भावानामभावान्मोक्षो भवतीत्यवगम्यते आह यद्यपवर्गो भावोपरतेः प्रज्ञायते नन्वौपशमकादि

१८१ भावनिवृत्तिवत्सर्वक्षायिकभावनिवृत्तिरपि प्राप्नोतीति मुक्तस्य प्राप्नोतीतिस्याद्देतदेवं यदि विशेषो नोच्यते
अस्ति तु विशेष इति अपवादविधानार्थमुच्यते श्री अन्यत्रकेवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः श्री अन्यत्र
शब्दापेक्षया को निर्देशः केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः अन्यस्मिन्नयं विधिरिति यदि चत्वार
एवावशिष्यन्ते अनंतवीर्यादीनां निवृत्तिं प्राप्नोति नैष दोषः ज्ञानदर्शनाविनाभावित्वादनंतवीर्यादीना
मविशेषः अनंतसामर्थ्यहीनस्यानंतावबोधवृत्त्यभावात् ज्ञानमयत्वाच्च सुखस्येति अनाकारत्वान्मु
क्तानामभाव इति चेन्नातीतानंतरशरीराकारत्वात् स्यान्मतं यदि शरीरानुविधायी जीवः तदभावात्स्वाभा
विकलोकाकाशप्रदेशपरिमाणत्वात् तावद्विसर्पणं प्राप्नोति नैष दोषः कुतः कारणाभावात् नाम
कर्म्मसंबंधो हि संहरणविसर्पणकारणं तदभावात्पुनः संहरविसर्पणाभावः यदि कारणाभावान्न
संहरणं न विसर्पणं तर्हि गमनकारणाभावादूर्द्ध्वगमनमपि न प्राप्नोति अधःतिर्यग्गमनाभाववत् १८१

ततो यत्र मुक्तस्तत्रैवावस्थानं प्राप्नोतीत्यत्रोच्यते श्री तदनंतरमूर्द्ध्वं गच्छत्यालोकांतात् श्री तस्यानंतरं
कस्य सर्वकर्म्मविप्रमोक्षस्य आङ् अभिविध्यर्थः ऊर्द्ध्वं गच्छत्यालोकांतात् अनुपदिष्टहेतुकमिदमूर्द्ध्वगमनं
कथमध्यवसातुं शक्यमित्यत्रोच्यते श्री पूर्वप्रयोगादसंगत्वाद्बंधच्छेदात्तथागतिपरिणामाच्च श्री आ
ह हेत्वर्थः पुष्कलोऽपि दृष्टांतसमर्थनमन्तरेणाभिप्रेतार्थसाधनाय नालमित्यत्रोच्यते श्री आविद्धकुला
लचक्रवद्व्यपगतलेपालाबुवदेरंडबीजवदग्निशिखावच्च श्री पूर्वसूत्रोदितानां हेतूनामत्रोक्तानां
दृष्टांतानां च यथासंख्यमभिसंबंधो भवति तद्यथा कुलालप्रयोगापादितहस्तदंडचक्रसंयोगपूर्वकं
भ्रमणं उपरतेऽपि तस्मिन्पूर्वप्रयोगादासंस्कारक्षयात् भ्रमति एवं भवस्थेनात्मनापवर्गप्राप्तये बहुशो यत्प्र
णिधानं तदभावेऽपि तदावेशपूर्वकं मुक्तस्य गमनमवसीयते किं च असंगत्वात् यथा मृत्तिकालेपजनितगौ
रवमलाबुद्रव्यं जलेऽधःपतितं जलक्लेदविश्लिष्टमृत्तिकाबंधनं लघु सदूर्द्ध्वमेव गच्छति तथा कर्म्मभारा

१८२ क्रांतिवसीकृतआत्मातदावेशवशात् संसारेऽनियमेनगच्छति तत्संगविमुक्तोऽउपर्येवोपयाति किंचवंधछे
दात् यथावीजकोशवंधछेदादेरंडवीजस्यगतिर्दृष्टातथामनुष्यादिभवप्रापकगतिजातिनामादिसकलक
र्म्मवंधछेदात् मुक्तस्यगतिरवसीयते किंचतथागतिपरिणामात् यथातिर्यक्प्लवनस्वभावसमीरणसंबं
धनिर्मुक्ताप्रदीपशिखास्वभावादुत्पतति तथामुक्तात्मापिनानागतिविकारणकर्म्मनिवारणेसतिऊ
र्द्धगतिस्वभावादूर्द्धमेवावरोहति आहयदिमुक्तऊर्द्धगतिस्वभावः लोकांतादूर्द्धमपिकस्मान्नोत्पततीति
अत्रोच्यते श्री धर्म्मास्तिकायाभावात् श्री गत्युपग्रहकारणभूतोधर्म्मास्तिकायोनोपर्यस्तीतिअलोक
गमनाभावः तदभावेचलोकविभागाभावः प्रसज्यते आहअमीपरिनिर्वृताःगतिजात्यादिभेदकारणभा
वात् अतीतभेदव्यवहाराएवेति अस्तिकथंचिद्भेदोपिकुतः श्री क्षेत्रकालगतिलिंगतीर्थचारित्रप्रत्येक
बुद्धबोधितज्ञानावगाहनांतरसंख्याल्पबहुत्वतःसाध्याः श्री क्षेत्रादिभिर्द्वादशभिरनुयोगैः सिद्धाःसाध्याः १८२

विकल्पादस्यार्थः प्रत्युत्पन्नभूतानुग्रहतंत्रनयद्वयविवक्षावशात् तद्यथा क्षेत्रेणतावत्कस्मिन्क्षेत्रेसि
ध्यंति प्रत्युत्पन्नग्राहिनयापेक्षया सिद्धिक्षेत्रेस्वप्रदेशेआकाशप्रदेशेवासिद्धिर्भवति भूतग्राहिनयापेक्ष
याजन्मप्रतिपंचदशकर्म्मभूमिषुसंहरणंप्रतिमानुषक्षेत्रेसिद्धिः कालेनकस्मिन्कालेसिद्धिः प्रत्युत्पन्न
नयापेक्षयाएकसमयेसिध्यन्सिद्धोभवति भूतप्रज्ञापननयापेक्षयाजन्मतः अविशेषणउत्सर्प्पिण्य
वसर्प्पिण्योर्जातः सिध्यति विशेषेणावसर्प्पिण्यांसुषमदुःषमायाअंतेभागेदुःखमसुखमायां च जातः
सिध्यति नतुदुःखमायांजातः दुःखमायांसिध्यति अन्यदानैवसिध्यति संहरणतः सर्व्वस्मिन्कालेउत्स
र्प्पिण्यामवसर्प्पिण्यांचसिध्यति गत्यांकस्यांगतौसिद्धिः मनुष्यगतौवा लिंगेनकेनसिद्धिः अवेदत्वेनत्रि
भ्योवावेदेभ्यः सिद्धिर्भवतोनद्रव्यतः पुल्लिंगेनैवसिद्धिः अथवानिर्ग्रंथलिंगेनसग्रंथलिंगेनवासिद्धिः
भूतपूर्व्वनयापेक्षयातीर्थेनकेनतीर्थेनसिद्धिः द्वेधातीर्थकरेतरविकल्पात् इतरेद्विविधासतितीर्थकरेसि

१८३ द्धाः असतिचेति चारित्रेणैकेनसिध्यंतिअव्यपदेशेनैकचतुःपंचविकल्पचारित्रेणवासिद्धिःस्वशक्तिपरोप
देशनिमित्तज्ञानभेदात् प्रत्येकबुद्धबोधितविकल्पाः ज्ञानेनकेनएकेनद्वित्रिचतुर्भिश्चज्ञानविशेषैःसिद्धिः
आत्मप्रदेशव्यापित्वमवगाहनंतत्द्विविधंउत्कृष्टजघन्यभेदात् तत्रोत्कृष्टंपंचधनुःशतानिपंचविंशत्यु
त्तराणि जघन्यंअर्द्धचतुर्थारत्नयोदेशोनाः मध्येविकल्पाएकस्मिन्नवगाहेसिध्यति किमंतरंसिध्यतांअ
नंतरं जघन्येनद्वौसमयौ उत्कर्षेणाष्टौ अंतरंजघन्येनैकसमयःउत्कर्षेणषण्मासाः संख्याजघन्येनएकसम
येएकःसिध्यउत्कर्षेणाष्टोत्तरशतसंख्याः क्षेत्रादिभेदभिन्नानांपरस्परतःसंख्याविशेषोल्पबहुत्वं तद्य
था प्रत्युत्पन्ननयापेक्षयासिद्धिक्षेत्रेसिध्यतांनास्त्यल्पबहुत्वंभूतपूर्वनयापेक्षयातुचिंत्यंतेक्षेत्रसिद्धा
द्विविधाजन्मतःसंहरणतश्चतत्राल्पेसंहरणसिद्धाः जन्मसिद्धाःसंख्येयगुणाः क्षेत्राणांविभागः कर्मभू
मिरकर्मभूमिःसमुद्रोद्वीपःऊर्द्धमधस्तिर्यगिति तत्रस्तोकाऊर्द्धलोकसिद्धाः अधोलोकसिद्धासंख्येयगु १८३

णास्तिर्यग्लोकसिद्धाःसंख्येयगुणाः सर्वत्रस्तोकाः समुद्रसिद्धाः द्वीपसिद्धाःसंख्येयगुणाः एवंतावदविशे
षेणसर्वत्रस्तोकाः लवणोदसिद्धाः कालोदसिद्धाः संख्येयगुणाः जंबूद्वीपसिद्धाः संख्येयगुणाः धातकी
खंडसिद्धाः संख्येयगुणाः पुष्करद्वीपार्द्धसिद्धाः संख्येयगुणा इतिएवंकालादिविभागेपियथागममल्प
बहुत्वंवेदितव्यं॥छ॥ स्वर्गापवर्गसुखमाप्तुमनोभिरार्यैः जैनेंद्रशासनवरामृतसारभूता सर्वार्थसिद्धि
रितिसद्भिरुपात्तनामा तत्त्वार्थवृत्तिरनिशंमनसाप्रधार्या १ तत्त्वार्थवृत्तिमुदितांविदितार्थतत्त्वाः श्रृण्वंतिये
परिपठंतिसुधर्मभक्त्या हस्तेकृतंपरमसिद्धिसुखामृतंतेर्मर्त्यामरेश्वरसुखेषुकिमस्तिवाच्यं २ येनेदमप्र
तिहतंसकलार्थतत्त्वमुद्योतितंविमलकेवललोचनेन भक्त्यातमद्भुतगुणंप्रणमामिवीरमारान्नराभरग
णार्चितपादपीठं ३ इतितत्त्वार्थवृत्तौसर्वार्थसिद्धिसंज्ञकायांदशमोध्यायःसमाप्तः १० अनुष्टुप्छंद
सालोकेस्मिन्चत्वारिश्रुतकोविदैः शतान्याणिसहस्राणिग्रंथस्यप्रमितिकिलः १ ॥४२००॥श्रीमंगलंभूयात॥श्री

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

२८४

सरवार्थसिध

२८४